Tanjore Saraswathi Mahal Series No. 102

DHARMĀKŪTAM

KIṢKINDHĀKĀNDA

BY

TRYAMBAKARĀYAMAKHĪ

Edited by:

P. V. VARADARAJA SARMA, M. A., B. O, L., R. B. Bisharad,
Librarian,
T. M. S. S. M. Library, Thanjavur.

Published by:

O. A. NARAYANASWAMI, B. A., B. L.,
Honorary Secretary,
T. M. S. S. M. Library, Thanjavur.

Śaka 1885 A. D. 1963 Price: Rs. 16/-

This book is published under the scheme of 'Editing and Publication of Rare Manuscripts' No. 18-11/60 C. 2 of the Government of India, Ministry of Scientific Research and Cultural Affairs, New Delhi-2.

समष्टि व्यष्टि राष्ट्रसञ्चालक मन्त्रिमण्डल-विश्राणितानल्पवित्तोपकारेण मुद्राप्य प्रकाशितो-ऽयं ग्रन्थः विजयते ।

सरस्वतीमहाल् ग्रन्थमालायाः पुष्पं-१०२

धर्माकूतम्

(किष्किन्धाकाण्डः)

श्री त्र्यम्बकरायमखिविरचितम्

तञ्जपुरी सरस्वतीमहाल् प्राच्यग्रन्थशालाध्यक्षेण
भारद्वाज **वेङ्कटेशवरदराजशर्मणा** एम्. ए., बि. ओ. एल्., आर. बि. विशारद
बिरुदभाजा संकलितम्

तञ्जपुरी सरस्वतीमहाल् निर्वाहकसमित्यक्रीत कार्यदर्शिना
ओ. ए. नारायणस्वामिना बि. ए., बि. एल्., बिरुदालंकृतेन
प्रकाशितम्

शकाब्दाः १८८५ क्रिस्त्वब्दाः १९६३

मूल्यम् रूप्यकाणि १६

PREFACE

We have great pleasure in placing Dharmākūta Kiṣkindhākānda in the hands of scholars and announcing that Yuddhakānda also will reach their hands in a few months time. The publication of this remarkable encyclopedia of our national culture was taken up by Sri Vani Vilas Syndicate about 40 years ago. They published Balakanda and Ayodhyakānda; later our Library published Āraṅyakānda and Sundarakānda.

Dharmākūtam is a rare work in Sanskrit literature. It is a commentary on Srimad Rāmāyana of Vālmīki in the form of a series of discourses on different topics directly or indirectly related to the righteous conduct of Rāmachandra and it is a noteworthy feature of this work that every subject taken up for discussion is dealt with exhaustively. A good number of works are profusely quoted.

Tryambakarāyamakhi, the author of this work, was a comtemporary of Shahaji, Serfoji and Tulajāji. Another work called Shtridharma Paddhati is also attributed to him. It is said that he wrote it at the behest of his mother. He was a Mahārāstra brahmin who perhaps came with Ekoji to Tanjore and settled at Swāmimalai. The introduction to Sundarakānda gives a detailed account of this talented author Tryambakarāyamakhi.

There is only one copy of the manuscript of Ḳishkindhākānda of Dharmākuta B. L. No. 1014. The present edition is based on this single manuscript. Profuse quotations from a large number of literary works, sometimes with the names of the works and sometimes with the names of the authors highlight the work. Bhartṛhari, Magha, Bharavi, Ḥitopadesa are cited as prācheenas.

Alphabetical index of the Rāmāyana verses, and the verses quoted in Dharmākūta, topic index of Dharmākūta and list of authors and works quoted therein are useful additions to this publication.

The editor of this work Sri P. V. Varadarāja Sarma, Librarian, Sarasvathī Mahāl, is a great and unostentatious Sanskrit scholar and he has done an excellent job of his work. We congratulate him on his achievement.

We are deeply indebted, to the Union and State Government who by their liberal grants, have enabled us to publish this and other valuable works lying hidden in palm leaves in the Sarasvathī Mahāl.

O. A. NARAYANASWAMI,
Honorary Secretary.

वक्तव्यं किञ्चित्

वागर्थवत्, प्रकृतिपुरुषवत्, स्त्रीपुंसवत्, अयनद्वयवन्नयनद्वयवच्च चिरादिदं प्रत्नं पुरावृत्तरत्नद्वयं भारतरामायणाभिधेयं लोकमिमं स्वधर्मविधृतं, असंभिन्नं च स्थापयतीति सर्वसम्प्रतिपन्नमिदम्। चक्राभ्यामिव शकटस्य, युग्याभ्यामिव रथस्य, पक्षाभ्यामिव पत्ररथस्य, दिवाकरनिशाकराभ्यामिव चेतनाचेतनवर्गस्य, तस्यास्य रथिनश्शरीरिणो गतिरनुत्खाता, आभ्यामेव पुरापि नवाभ्यां निरुह्यते।

'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्न'मित्युपक्रम्य 'स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव' इत्यन्तस्य ग्रन्थसन्दर्भस्यायमर्थो भवति यत्तदुक्तं धर्मः, तदुक्तकारित्वं श्रेयसे कल्पत इति। अत एव प्रत्यजानात् फाल्गुनः 'करिष्ये वचनं तवेति'। दृष्टो धर्मव्यतिक्रमस्साहसं च महतां, इति महदाचरितस्य धर्मत्वे तदाचरिताचरणस्य श्रेयःप्रेयोमूलत्वे च जायमानो वितर्कः अलब्धनिर्णयः चिरात्समाधिमाकाङ्क्षन्नपोह्यते रामचरितेन।

धर्माकूतम्

'रामो विग्रहवान् धर्मः, 'धर्मात्मा, इत्यादिवचनैः भगवता वाल्मीकिना रामस्य मूर्तधर्मत्वं प्रत्यपाद्यत शतकृत्वस्सहस्रकृत्वश्च। एवं च मूर्तस्य धर्मस्याचरितमपि निखिलं धर्म एव, तदाचरिताचरणेन च श्रेयःप्रेयसोर्लाभ इति निश्शेषस्य रामचरितस्य धर्मत्वप्रतिपादनैकतानोऽयं ग्रन्थः धर्माकूतमित्याख्यायत यौगिकीं वृत्तिमाश्रित्य। व्याख्यानरूपेऽस्मिन् ग्रन्थे समादृता सरणिरन्यादृशी, अचुम्बिता प्रायः सकलैरेवातिक्रान्तैर्व्याख्यातृभिरित्यसावुट्टङ्कनीयोंशः। नात्र दृश्यते पदार्थप्रतिपादनं, नवा वाक्यार्थस्याविष्करणं वरीवर्ति, किन्तु सन्दर्भविशेषस्य क्वचित् क्वचित् प्रबन्धस्यैवाकूतमविकलमाविष्कृतम्।

तर्कस्याप्रतिष्ठितत्वेऽपि 'यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः, इत्यादिभिर्वचनैर्धर्मनिर्णये तर्कस्योपादेयता मुक्तकण्ठमूरीकृता प्रामाणिकैः, तर्काप्रतिष्ठानादित्यस्यापि तर्कत्वात्। ग्रन्थकृता चानेनास्मिन् ग्रन्थे शास्त्रानुगृहीतस्तर्क आकूतनिर्णयेऽतिमात्रं

क्रोडीकृतः। सङ्गीतवैद्यखगोलभूगोलधर्मशास्त्राणां, नहि नहि चतुर्दशानामपि विद्यास्थानानां, आमूलमालोडनं लीलयैव तत्र तत्र कृतं कृतधियामपि चेतश्चित्रयत्येव। यथा शाकुन्तले 'यस्सदारः स विश्वास्यः, इत्यादीनि कतिपयवाक्यानि मुद्रितपुस्तकेष्वनुपलभ्यमानानि, ग्रन्थकर्तुर्मातृकासु सत्तामलप्सतेति समाधेयम्।

ग्रन्थकर्ता

आजानपावने यायजूकान्ववाये जनिमलब्धासौ ग्रन्थकर्ता श्रीत्र्यंबकरायमखी; बाबाजियज्वात्मजगङ्गाधराध्वरिणः कृष्णांबिकायाश्च पुत्रः नृसिंहयज्वनः कनीयान् भ्राता भारद्वाजगोत्रः, सद्धूरीतिसम्पन्नोसावध्वरीन्द्रः तञ्जमण्डलविराजमानं स्वामिशैलमध्यवात्सीत्; तदात्वे धृतराज्यधुराणां महाराष्ट्रवंश्यानां राज्ञामन्यतमेन एकोजिमहाराजेन (1676—1705 A. D.) आदृतः सत्कृतश्चायं ग्रन्थकृत् अमात्यपदवीमप्यलञ्चकार; मात्रानुशिष्टः मातुर्मुदे स्त्रीधर्मसंग्रहाख्यं ग्रन्थान्तरमप्यररचदित्यादयो विषयाः सरस्वतीमहाल्द्वारा प्रकाशिते धर्माकूतसुन्दरकाण्डोपोद्घाते वर्णितास्तत एवावगन्तव्या इति न पिष्टस्य पेषणे यत्न आधीयते।

मातृकापरिचयः

अस्य ग्रन्थस्य 1450 क्रैस्तवाब्दादारभ्य 1832 पर्यन्तं पूर्वं नायकवंश्यैस्तदनन्तरं महाराष्ट्रवंश्यैश्च राजभिः यथाक्रमं संगृहीते, परिवर्धिते प्राच्यकोशागारे, सरस्वतीमहाल् इति विश्रुते ग्रन्थागारे सुरक्षिता B. L. 1041 क्रमाङ्कयुता 111 पत्रैः परिमिता च मातृका एकैवोपलभ्यते। तामेवास्पदं विधायायं तत्प्रकाशनयत्नः। पुत्रिकान्तरस्यालाभान्नान्वभूयत तोलनपरिश्रमः। "तमभ्यभाष सौमित्रे, इत्यादिषु स्थलेषु मुद्रितमूलग्रन्थानुसारेण पाठस्यान्यथाकरणे ग्रन्थकर्तुः पाठ उपेक्षितो भवेदिति भीत्या यथाश्रुत एव पाठः मुद्रापितः। एवमेवोदाहरणपद्येष्वपि बहुषु मुद्रितग्रन्थेषु इहत्यात्पाठाद्भूयान् भेदो दृश्यते, अथापि मुद्रितपाठप्रत्ययमालंब्य अस्यां मातृकायां विद्यमानस्य पाठस्यान्यथाभावो नैवाकारि येन ग्रन्थकृतः पाठः न सुरक्षितो भवेत्।

अन्ते च रामायणपद्यानुक्रमणिका, धर्माकूतोदाहृतपद्यानुक्रमणिका च सुखबोधार्थं

मूलग्रन्थपरिचयार्थं चायोजिते । अस्मिन् ग्रन्थे उदाहृतानां ग्रन्थानां, निर्दिष्टानां प्रमाण-ग्रन्थकर्तॄणां सूचीं चोपक्रम एवायोजयाम ।

धन्यवादसमर्पणम्

अन्ते चास्य ग्रन्थस्य, अचिरात्प्रकाशं नेष्यमाणस्य धर्माकूतयुद्धकाण्डस्य च प्रकाशन-मुद्रापणयोः पर्याप्तधनवितरणेनात्यन्तं विहितोपकारेभ्यः समष्टिराज्यकर्तृभ्यः व्यष्टिराज्य-सञ्चालकेभ्यः, एवमेवानुरूपे कर्मण्यस्मिन्नस्मान्प्रेरितवद्भ्यः सरस्वतीमहाल् निर्वाह-समित्यङ्गभूतेभ्यो महाशयेभ्यः, विशिष्याक्रीतकार्यदर्शिमहामहिमशालिभ्यः हार्दान् बहुकृत्वो धन्यवादान् विश्राणयन्तो लेखिनीं नियच्छामः ।

इत्थं

विदुषां विधेयः,

पि. वि. वरदराजशर्मा.

धर्माकूतविषयानुक्रमणिका

विषयाः	पृष्ठसंख्या
राजधर्मप्रतिपादनाय किष्किन्धाकाण्डोपक्रम इति काण्डावतरणिका	१
रामस्य पम्पासरोदर्शनम् । पम्पासरोवर्णनम्	,,
रामस्य विरहवेदनावर्णनम्	२
अरण्यानीप्रवेशवर्णनम्	,,
वसन्तवर्णनम्	३
रामस्य विरहप्रलापवर्णनम्	४-५
लक्ष्मणकृतरामाश्वासनवर्णनम्	६
सुग्रीवेण रामलक्ष्मणयोरवलोकनम्	,,
सुग्रीवशङ्कावर्णनम्	,,
राजभिरशङ्क्यस्यापि शङ्क्यत्ववर्णनम्	,,
भीतेन सुग्रीवेण अमात्येभ्यो निवेदनम्	७
रामलक्ष्मणयोर्वालिप्रणिधित्वशङ्कावर्णनम्	,,
अमात्यकृतसुग्रीवसान्त्वननम्	,,
आपत्स्वपि राज्ञा बुद्धियुक्तेन भवितव्यमिति निरूपणम्	,,
तत्र कामन्दकविदुरादीनां सम्मतिनिरूपणम्	८
राजसु विश्वासो न कर्तव्य इति निरूपणम्	,,
तत्र राजधर्मसम्मतिनिरूपणम्	,,
प्रच्छन्नैः परेषां स्वभावो विचारणीयः इति कथनम्	,,
इङ्गितादिभिः दुष्टादुष्टाभिप्रायपरिज्ञानकथनम्	९
तत्र मनुबृहस्पतिकामन्दकादीनामाशयनिरूपणम्	,,
हनुमतो रामोपगमनवर्णनम्	१०

विषयाः	पृष्ठ-संख्या
दूतेन स्तुतिपूर्वकं सन्देशो निवेदनीय इति कथनम्	१०
हनुमता स्वागमनप्रयोजनकथनम्	,,
हनूमता भाषणे लक्ष्मणस्य निर्देशः	,,
अनधीतवेदवेदाङ्गेन तादृशभाषणमशक्यमिति कथनम्	११
साङ्गवेदाध्ययनस्यापशब्दादिदोषरहितव्यवहारोपयुक्तत्वनिरूपणम्	,,
व्याकरणादीनां मुखत्वादिनिरूपणम्	,,
लोकवेदयोरशब्दानन्यत्वनिरूपणम्	१२
व्याकरणस्य साधुशब्दानुशासकत्वाशङ्कावर्णनम्	१३
व्याकरणस्य साधुशब्दानुशासकत्वे प्रमाणपरीक्षा	,,
आगमविरोधादिभिर्हेतुभिर्व्याकरणस्याप्रमाणतानिरूपणम्	१३–१५
रक्षोहादिप्रयोजनाभावाच्च व्याकरणमप्रमाणमिति समर्थनम्	१६–१७
व्याकरणशब्दार्थनिरूपणम्	१७
व्याकरणस्य साधुशब्दानुशासकत्वनिरूपणम्	१८
आगमादिविरोधपरिहारवर्णनम्	१९
रक्षोहादिप्रयोजनसद्भावाच्च व्याकरणस्य प्रमाणत्वनिरूपणम्	२०–२७
वर्णोच्चारणसमये मुखनेत्रादिविकाराणां वर्जनीयत्वकथनम्	२९
सन्दिग्धत्वादिवर्ज्यदोषनिरूपणम्	,,
व्यवहारे मध्यमादिवृत्तिनिरूपणम्	३०
शब्दोत्पत्तिप्रकारनिरूपणम्	,,
उरःकण्ठाद्यभिघाताद्वायोः पञ्चाभिधानिरूपणम्	३१
मन्द्रमध्याद्यभिधाननिरूपणम्	,,
वाग्गेयकारशीक्षादिप्रमाणोपन्यासः	,,
शरीरगतस्य वायोः शब्दात्मना परिणतिवर्णनम्	,,
उपांश्वादिषड्वाक्स्थाननिरूपणम्	३२

विषयाः	पुट-संख्या
मन्द्रादीनां प्रातःसवनादिषूपयोगवर्णनम्	३२
तारनामकसप्तमस्थानवर्णनं, तत्प्रयोगश्च	३३
तत्रापस्तम्बाश्वलायनादीनां सम्मतिनिरूपणम्	,,
वाचि संस्कारशब्दार्थविचारः	,,
वाचि क्रमशब्दार्थनिरूपणम्	,,
वाचां सम्यगुच्चारणे फलनिरूपणम्	३४
वाचामसम्यगुच्चारणे विपरीतफलनिरूपणम्	,,
ब्राह्मणादिजातिभेदेन वर्णानां स्वराणां च भिन्नत्वनिरूपणम्	,,
वर्णगणनाक्रमनिरूपणम्	३५
अङ्गुलिपर्वणामुपयोगप्रदर्शनम्	,,
लघुत्वसमतालोपागमादिछन्दोभाषाङ्गनिरूपणम्	,,
गुणाढ्यो दूतः कार्यसाधक इति कथनम्	,,
दूतलक्षणम्, पुराणसाराशयकथनम्	,,
दूतत्रैविध्यनिरूपणम्	,,
तत्र कामन्दकमतोपन्यसनम्	,,
दूतस्य प्रकारान्तरेण द्विविधत्वकथनम्	,,
दूतगुणवर्णनम्	३६
उद्योगपर्वराजधर्ममनुपुराणसारनृसिंहपुराणोक्तदूतलक्षणम्	,,
कामन्दकोक्तदूतस्वरूपकथनम्	३७
रामायणोक्तदूतलक्षणम्	३८
उत्तममध्यमाधमभेदेन युद्धकाण्डे दूतलक्षणवर्णनम्	,,
समीचीनसहायलाभः कार्यसाधक इति प्रतिपादनम्	३९
लक्ष्मणहनुमतोरालापः	,,
निकृष्टैरपि व्यवहारे प्रियवचनं वक्तव्यमिति कथनम्	,,

विषयाः	पुट-संख्या

भारतकामन्दकमतोपन्यसनम् ४०

सत्यवक्तुर्मुखप्रसादादिवर्णनम् ,,

तत्र याज्ञवल्क्यमतोपन्यासः ,,

रामसुग्रीवसख्यनिरूपणम् ४१

अग्निसाक्षिकं सख्यं कर्तव्यमित्यत्र प्रमाणकथनम् ,,

समानसुखदुःखित्वरूपमित्रगुणकथनम् ,,

सुग्रीवकृताभयप्रार्थनवर्णनम् ४२

सुग्रीवभयनिराकरणाय रामकृतप्रतिज्ञावर्णनम् ,,

उपकारेणैव मित्रत्वं मित्रं प्रति च स्वदुःखं निवेदनीयं तेन तल्लघु भवतीति वामनपुराण, कामन्दक, भारतादिवचनैर्निरूपणम् ४३

परित्यक्तशोकानां धीराणामेव कार्यसिद्धिरिति कथनम् ४४

आपदि मित्रं सर्वबन्ध्वतिशयितमिति कथनम् ,,

महापुरुषेण लब्धसख्यस्य सर्वं सुलभमिति प्रतिपादनम् ४५

प्राणपरित्यागेनापि मित्रस्य रक्षणीयत्ववर्णनम् ,,

विना परबलाबलज्ञानं तदुत्सादने यत्नः न कर्तव्य इति कथनम् ४६

कामन्दकाशयानुवर्णनम् ,,

मत्तादिभिर्युद्धस्यानौचित्यकथनम् ४७

दत्ताभयवधस्य महापातकत्वनिरूपणम् ४८

शूराणां रिपुकृतधर्षणं दुःसहमिति कथनम् ४९

भ्रातुर्दानादिभिर्लालनीयत्वकथनम् ५०

बलवद्विरोधो न कर्तव्य इति कथनम् ,,

वालिकृतस्ववधाधर्म्यत्वप्रश्ननिरूपणम् ,,

रामकृतवालिनिग्रहधर्म्यत्वप्रतिपादनम् ५९

शङ्खलिखितोदाहरणकथनम् ६०

विषयाः	पुट-संख्या
दण्ड्यानां दण्डनाद्दण्ड्यस्य दण्डधरस्य च शुद्धिरिति कथनम्	६०
जीवतो भ्रातुर्दारप्रवृत्तो वाली दण्ड्य इति निरूपणम्	६१
अहिंसाप्रतिज्ञापालनयोर्मध्ये प्रतिज्ञापालनस्यैव मुख्यत्वमिति प्रतिपादनम्	,,
क्षत्रियस्य प्रतिज्ञापालनमवश्यकर्तव्यमिति भारतरामायणादि-वचनोपन्यासेन निरूपणम्	६२–६३
स्वमित्रसुग्रीवशत्रुत्वात्, स्वामित्ररावणमित्रात्वाच्च वालिनो वध्यत्वनिरूपणम्	६४
भारतवचनेन स्वमित्रशत्रोः शत्रुत्वोपपादनम्	,,
मित्ररक्षणायान्यायेनापि शत्रुवधस्य कर्तव्यत्वनिरूपणम्	,,
भूरिश्रवसो निदर्शनत्वेनोपन्यासः	,,
रामस्य साक्षाद्वालिवधेऽप्रवृत्तौ कारणोपन्यसनम्	६५
सुग्रीवं पुरस्कृत्य तथा प्रवृत्तौ हेतुकथनम्	,,
छद्मना वालिवधस्यायुक्तत्वप्रतिपादनम्	६६
आपदि छद्मनापि वधस्यादोषत्वनिरूपणम्	,,
दीनरक्षणार्थं वालिवधस्य युक्तत्वोपपादनम्	६७
शरणागतस्य सर्वथा रक्षणीयत्वकथनम्	६८
अवश्यरक्षणीयस्य रक्षार्थं छलस्याप्युपादेयताकथनम्	७०
कण्टकशोधनस्यावश्यकर्तव्यत्वाच्च वालिवधस्योपपन्नत्वप्रतिपादनम्	७२
अकीर्तेर्द्वैविध्यनिरूपणम्	,,
लोभमूलकाकार्यकरणप्रयुक्ताकीर्तेः प्रत्यवायाधायकत्वं प्रतिज्ञा-परिपालनाय निषिद्धसेवनप्रयुक्ताकीर्तेरप्रत्यवायकरत्वमिति सोपपत्तिकवर्णनम्	७३
भीमकृतोरुभङ्गस्योदाहरणम्	,,
वालिवधे सीताप्राप्तिलोभस्याहेतुत्वकथनम्	७४

विषयाः	पुट-संख्या
न्यक्कतापरिहारार्थमेव रावणवध इति प्रतिपादनम्	७४
लोभमूलकछद्माचरणाद्युधिष्ठिरस्यापकीर्तिः प्रत्यवायकरी, न तथा रामस्येति वर्णनम्	७५
वालिवधस्य धर्म्यत्वं वालिनाप्यभ्युपपन्नमिति कथनम्	७६
परदाराभिमर्शस्य प्राणैश्वर्यनाशकत्वकथनम्	७७
शुभाशुभकर्मनिमित्तस्सुखदुःखभोग इति वर्णनम्	,,
क्षेत्रविशेषे फलपरिवृद्धिवद्दोषपरिवृद्धिरपीति कथनम्	७८
अस्थिरदेहपातप्रयुक्तशोकस्याकर्तव्यत्वकथनम्	,,
स्त्रीपर्वणि विदुरवचनोपन्यसनम्	,,
पुत्रपरित्यागेन भर्तृसहगमनस्य श्रेयस्त्वप्रतिपादनम्	७९
पितृव्यस्य पितृस्थानीयत्वकथनम्	,,
भारतवचनानां प्रमाणतयोपन्यसनम्	,,
प्रत्युपकारस्य कर्तव्यत्वप्रतिपादनम्	८०
राजपुत्राणां पितरि वर्तितव्यधर्माणामुपदेशः	,,
नीतिसारवचनोदाहरणम्	८१
शूराय कन्या न देयेति कथनम्	,,
भ्रातृवधस्य पापाधायकत्वकथनम्	८२
सोदरसन्निकर्षप्रशंसा	,,
स्त्रीणां पुरुषात्मभूतत्वकथनम्	८३
जितस्वर्गो न शोच्य इति आनुशासनिकवचनैरुपपादनम्	८४
गौतमीलुब्धकवृत्तान्तवर्णनम्	
हन्तुरस्वतन्त्रतया न पापप्रातिभाव्यमिति गौतमीलुब्धकाख्यायिकया निरूपणम्	८५—८९
गुणवतः पुत्रस्य यौवराज्याभिषेकः कर्तव्य इति कथनम्	९०

विषयाः	पृष्ठ-संख्या
वर्षासु यात्रायाः अकर्तव्यत्वं शरदि कर्तव्यत्वं च	९०
समीचीनकारी सकलश्लाघ्यो भवतीति कथनम्	९१
वर्षावर्णनम्	९२
सद्योवृष्टिलक्षणकथनम्	९३
सामान्यवृष्टिचिह्ननिरूपणम्	,,
कार्तिकमासप्रभृति मेघानां गर्भधारणम्	९४
मेघानां गर्भसंभवचिह्ननिरूपणम्	९५
गर्भोपघातचिह्नानि	९६
वृष्टिसूचकमेघलक्षणम्	९७
अध्येतॄणां ब्रह्मचारिणां धर्मनिरूपणम्	९८
वर्षाकालवैचित्र्यवर्णनम्	१००
विष्णुपुराणे वर्षावर्णनम्	,,
हरेर्निद्राकालनिरूपणम्	१०१
हरेर्निद्राकाले व्रतस्य धार्यत्वकथनम्	,,
अवश्यकर्तव्यव्रतनिरूपणम्	,,
हरेर्निद्राकाले वर्ज्यपदार्थनिरूपणम्	,,
हरेर्निद्रासमाप्तिकालनिरूपणम्	,,
बलाकानां गर्भधारणार्थं सजलमेघोपगमनम्	१०२
वर्षाकाले स्त्रीणां कामोद्रेककथनम्	,,
अभिसारिकालक्षणकथनम्	,,
अभिसारिकायास्त्रैविध्यकथनम्	,,
स्वीयायाः पुनस्त्रैविध्यकथनम्	१०३
मुग्धादीनां स्वरूपलक्षणकथनम्	,,
दिवाभिसारिकादिभेदेन तासां पुनस्त्रैविध्यम्	,,

विषयाः	पृष्ठ-संख्या
सङ्गीतशब्दार्थविचारः	१०४
वीणायाः द्विप्रकारत्वनिरूपणम्	१०५
वीणायाः मनुष्यशरीरेण साम्यवर्णनम्	,,
एकतन्त्रीभेदेन वीणायाः पुनरनेकविधता	,,
वीणावादने त्रिविधानां करव्यापाराणां वर्णनम्	,,
धातपातादिभेदेन करव्यापाराणां चतुर्विंशतिसंख्यानिरूपणम्	,,
धातादीनां व्यापाराणां निरूपणम्	,,
नकुलादिभेदेन वीणानां अन्ये प्रकाराः	१०६
गानस्य रक्तादिगुणनिरूपणम्	,,
वीणायाः सर्वदेवतामयत्वेन दर्शनस्पर्शनादिकं महाफलमिति कथनम्	
वीणावादनतत्वज्ञ इति श्लोकार्थकथनम्	१०७
महत्यादीनां नानाविधवीणानां परिगणनम्	,,
सङ्गीतप्रणवस्वरूपकथनम्	,,
तानस्य सङ्गीतप्रणवत्वकथनम्	,,
तालशब्दार्थविस्तारः निर्वचनम्	,,
उक्ततालस्याङ्गभूताः दशप्राणाः प्राणा इव ताल निर्वर्तका इति कथनम्	१०८
कालरूपत्वात्तालस्य प्रथमतः तन्निरूपणम्	,,
प्रसिद्धस्य कालस्य क्षणादिभेदेन द्वादशविधत्वम्	,,
लघुगुरुप्लुतपताकादीनां निरूपणम्	,,
मार्गस्य षड्विधत्वप्रतिपादनम्	,,
मार्गतालस्य चतुरश्रादिभेदकथनम्	,,
देशतालस्यादितालादिभेदेन विंशत्यधिकशतमितत्वकथनम्	,,
गौरी, सरस्वती, कण्ठाभरणो लग्नक इति कण्ठाभरणतालस्य भेदाः	,,

विषयाः	पृष्ठ-संख्या
ध्रुव,मध्यरूपकादिसप्ततालनिरूपणम्	१०८
ध्रुवस्य षोडशविधत्वकथनम्	,,
तालफलनिरूपणम्	१०९
तालस्य शिवशक्त्यात्मकतानिरूपणम्	,,
मुरजवाद्यस्य पटमद्दलादिभेदेन वैविध्यप्रदर्शनम्	,,
वामदक्षिणमुखयोः मध्यस्य च परिमाणनिरूपणम्	,,
नर्तनस्य नाट्यनृत्यनर्तनभेदेन त्रैविध्यनिरूपणम्	,,
शार्ङ्गदेवस्याभिप्रायवर्णनम्	११०
नर्तनारम्भवेलायां पात्रप्रवेशे विशेषनिरूपणम्	,,
नन्दिकेश्वरमतोपन्यासः	,,
नन्दिकेश्वरोक्तनृत्यफलकथनम्	,,
शारीरगानवर्णनम्	,,
नाभेर्निर्गतस्य वायोः ध्वन्यात्मकता, वर्णात्मकता, मन्द्रमध्याताराद्यात्मना व्यक्तिनिरूपणम्	,,
नादस्य द्वाविंशतिश्रुतीनां निरूपणम्	१११
श्रुतीनां दीप्तादिभेदेन पञ्चजातिमत्त्वकथनम्	१११
आयतायाः पञ्चविधत्वकथनम्	,,
करुणायास्त्रैविध्यप्रतिपादनम्	,,
मृदोश्चतुर्विधत्वकथनम्	,,
मध्यायाष्षड्विधत्ववर्णनम्	,,
संगीतरत्नाकरमतकथनम्	,,
श्रुतिषु सप्तस्वराणां उत्पत्तिकथनम्	,,
कासु कासु श्रुतिषु के के स्वराः समुत्पद्यन्त इति निरूपणम्	११२
स्वराणां संज्ञानिरूपणम्	,,

विषयाः	पृष्ठसंख्या
नारदमतकथनम्	११२
ऋषभशब्दार्थनिर्वचनम्	,,
धैवतशब्दार्थनिर्वचनम्	,,
तत्र नारदमतप्रदर्शनम्	,,
स्वराणां शुद्धविकृतभेदेन द्विविधत्वकथनम्	,,
च्युताच्युतभेदेन मध्यमस्य द्विविधत्वनिरूपणम्	,,
पञ्चमगान्धारनिषादानामपि प्रत्येकं द्विविधत्वकथनम्	११३
चतुश्श्रुतित्वत्रिश्रुतित्वैकश्रुतित्वादीनां निरूपणम्	,,
संगीतरत्नाकरमतवर्णनम्	,,
भरताचार्यमतवर्णनम्	११४
ग्रामत्रयनिरूपणम्	,,
ग्रामशब्दार्थनिर्वचनम्	,,
शार्ङ्गदेवमतकथनम्	,,
आकरमतकथनम्	,,
ग्रामाणां देवतानिरूपणम्	११५
ग्रामाणां कालविशेषनिरूपणम्	,,
मूर्च्छनाशब्दार्थनिरूपणम्	,,
संगीतरत्नाकरमतकथनम्	,,
चतुर्दण्डिप्रकाशिकानुसारेण मूर्च्छनानिरूपणम्	११६
गमकस्वरूपविचारः	,,
स्वरकम्पस्य गमकस्य पञ्चदशविधत्ववर्णनम्	,,
गीतेः शुद्धादिभेदेन पञ्चविधत्वनिरूपणम्	,,
पञ्चविधगीतीनां अवान्तरभेदकथनम्	११७
रागगानकर्तुश्चतुर्विधत्वकथनम्	,,

विषयाः	पृष्ठ-संख्या
संगीतरत्नाकरोक्ततल्लक्षणकथनम्	११७
वाग्गेयकारादीनां स्वरूपकथनम्	,,
गायनस्य शिक्षाकारादिभेदेन पञ्चविधत्वकथनम्	,,
शारीरशब्दार्थविचारः	,,
शार्ङ्गसूरिमतकथनम्	,,
पुण्यवतः पुंसः शारीरं भवतीति निश्शङ्कदेवमतकथनम्	,,
सभानायकेन नर्तकैश्चालङ्कृतैर्भवितव्यमित्यत्र संगीतरत्नाकर-वचनोपन्यसनम्	११८
सभास्वरूपनिर्वचनम्	,,
वृन्दगानस्वरूपकथनम्	११९
उत्तमादिभेदेन वृन्दगानस्य पञ्चविधत्वकथनम्	,,
संगीतरत्नाकरमतकथनम्	,,
प्रकारान्तरेण वृन्दगानलक्षणम्	,,
भरतमुनेर्मतवर्णनम्	,,
निबद्धानिबद्धभेदेन वृन्दगानस्य द्वैविध्यकथनम्	,,
संगीतचूडामण्युक्तप्रबन्धलक्षणम्	,,
उद्ग्राहादिभेदेन धातूनां चातुर्विध्यप्रतिपादनम्	,,
निर्युक्तानिर्युक्तभेदेन प्रबन्धगानद्विप्रकारतावर्णनम्	१२०
सूडादिभेदेन पुनः त्रैविध्यकथनम्	,,
तेषां लक्षणं स्वरूपवर्णनं च	,,
वर्णमात्रात्मकानां गणानां गुरुलघ्वादिरूपकथनम्	,,
हेयस्य गानस्य कथं रामायणे संघटनमित्याक्षेपनिरूपणम्	,,
श्रौतकर्माङ्गभूतस्य गानस्योपादेयत्वकथनम्	१२१
गानस्योपादेयत्वे याज्ञवल्क्य आश्वलायन आपस्तम्बादीनां वचनानि	,,

विषयाः	पृष्ठ-संख्या
गानस्य महाफलत्ववर्णनम्	१२४
गानस्य चतुर्विधपुरुषार्थप्रदत्ववर्णनम्	,,
परमपुरुषाभिध्यानार्थतया गीतिरूपं रामचरितं वर्णितमिति कथनम्	१२६
सामादीनामध्ययनकालनिरूपणम्	,,
उत्सर्जनकालनिरूपणम्	१२७
वसिष्ठ-संवर्त-व्यास-बृहस्पतीनां मतकथनम्	१२८
शाखाभेदेन उपाकर्मकालनिर्णयः	,,
तैत्तिरीयाणां उपाकरणकालः	,,
बह्वृचानामुपाकरणकालः	,,
गोभिलमतवर्णनम्	,,
उपाकरणकाले निष्कर्षः	१२९
तत्र कूर्मपुराणवचनम्	,,
आपस्तम्बाश्वलायनवचनानि	,,
गृहस्थस्यपि वेदाध्ययनस्य कर्तव्यत्वोपदेशः	१३०
महापुरुषाः स्वकार्यविरोधेऽपि परहितमाचरन्तीति कथनम्	,,
कामवृत्तो राजा सचिवैः बोधनीय इति कथनम्	१३१
तत्र कामन्दकमतोपन्यसनम्	,,
एकाङ्गेनापि विकलं राज्यं न साधु वर्तत इति कामन्दकमतप्रदर्शनम्	,,
राज्याङ्गानां वर्णनम्	,,
मनोराशयकथनम्	१३२
कार्यकालातिपाते महाननर्थ इति कामन्दकवचनैः प्रतिपादनम्	,,
कृतोपकारस्य गुणाढ्यस्य कार्यं सर्वथा साधनीयं, अधार्मिकस्य तु उपेक्षणीयमिति कथनम्	१३३
शरत्कालवर्णनम्	१३५

विषयाः	पृट-संख्या
नवोढालक्षणकथनम्	१३५
शरदि गजानां मदोद्रेककथनम्	१३६
शरदि गवामपि मदोद्रेको भवतीति कथनम्	,,
प्रगल्भालक्षणकथनम्	१३८
प्रगल्भात्रैविध्यकथनम्	,,
रसमञ्जरीवचनोदाहरणम्	१३९
राज्ञां जयोद्योगकालः शरत्काल इति कथनम्	,,
महापुरुषैः पापाधायकः क्रोधः परिहर्तव्य इति कथनम्	१४२
आनुशासनिकवचनानां प्रमाणत्वेनोपन्यसनम्	,,
अविचार्य मित्रपरित्यागो दण्डपातनं वा न कर्तव्यमित्यत्र कामन्दकमतप्रदर्शनम्	,,
अनर्थमूलं परुषवचनं परिहृत्य साम्नैव व्यवहर्तव्यमिति कथनम्	,,
तत्र कामन्दकसम्मतिप्रदर्शनम्	१४३
सुग्रीवेऽपि वालिगतभ्रातृदारपरिग्रहदोषशङ्कानिरूपणम्	,,
स्त्रीणां भर्त्रनतिक्रमणस्य महाफलत्वे मन्वादिवचनोपन्यासः	,,
विवाहपूर्वकं तारोपभोगे अतथात्वेऽपि दोषप्रतिपादनम्	१४४
'नष्टे मृते प्रव्रजिते, इति वचनपर्यालोचनया अन्यत्र कलौ अन्यभर्तृपरिग्रहस्य धर्म्यत्वकथनम्	१४५
अतो न वालिना तुल्यदोषत्वमिति निरूपणम्	१४६
व्यसनप्रवृत्तस्य राज्ञः सत्कार्ये प्रवृत्तिः मन्त्रिभिः कारयितव्येति कथनम्	,,
खलानां मिथ्योपजापादिना मित्रभेदकर्तृत्वकथनम्	१४७
मनश्चापलादल्पेनापि हेतुना मित्रं भिद्यत इति वर्णनम्	,,
सापराधेन पुरुषेण आप्तजनोपालम्भं सोढ्वापि तत्प्रसादनमवश्यकर्तव्यमिति कथनम्	,,

विषयाः	पृष्ठ-संख्या
परुषभाषणप्रसक्तौ पुरुषान्तरमुखेन भाषेतेति निरूपणम्	,,
मन्त्रिभी राजा निर्भयं प्रबोधनीय इति कथनम्	,,
पूर्वोपकारिणा कृतः कोपः सोढव्य इति कथनम्	,,
भार्यायाः भर्त्रधीनत्ववर्णनम्	१४९
परस्यान्तःपुरे सहसा प्रवेशस्यानुचितत्वकथनम्	,,
विदुराचरितस्य प्रमाणत्वेनोपन्यासः	,,
महापुरुषाः स्त्रीषु कोपं न कुर्वन्तीति कथनम्	१५०
परस्यान्तःपुरे अवाङ्मुखस्तिष्ठेदिति कथनम्	,,
पानस्य परिहर्तव्यत्वकथनम्	,,
पानस्य सर्वानर्थकरत्वप्रतिपादनम्	,,
कामन्दकवचनानामुपन्यसनम्	,,
प्रत्युपकाराकरणस्य प्रत्यवायकरत्वकथनम्	१५१
स्वजनकृतापराधस्य सोढव्यत्वकथनम्	,,
अल्पसत्वे कोपस्याप्रदर्शनीयत्वकथनम्	,,
अत्यन्तस्त्रीकामुकस्य धर्मभ्रष्टत्वं भवतीति कथनम्	,,
कामस्य महर्षिभिरप्यपरिहार्यत्वकथनम्	१५२
दुष्टबुध्या परदारावलोकस्य वर्ज्यत्वकथनम्	,,
सत्यवादिनो राज्ञः श्रेष्ठत्वकथनम्	१५३
अश्वानृतादीनां नरकहेतुत्ववर्णनम्	,,
कृतघ्नतादोषस्य सर्वदोषाधिकत्वकथनम्	१५४
कृतघ्नोपाख्यानवर्णनम्	१५५–१५७
यथाकालं त्रिवर्गोपसेविनः सुखित्वकथनम्	१५८
मित्रसंग्रहस्यामित्रनिग्रहस्य च कर्तव्यत्वकथनम्	१५९
एकादिपरार्धपर्यन्तसंख्यावर्णनम्	,,
प्रभुसन्निधौ स्वातन्त्र्यं नालंबनीयमिति कथनम्	१६०
चारमुखेन शत्रोः स्थित्यादिकं ज्ञात्वा कर्म आरंभणीयमिति कथनम्	१६१

विषयाः	पुट-संख्या
मन्देहोपाख्यानम्	१६४
और्वस्य महर्षेः कोपाग्निरेव हयशिरो भूत्वा समुद्रं दहतीति कथनम्	१६५
और्ववृत्तान्तवर्णनम्	१६६
पूर्वादीनां दिशां निर्वचनम्	१६७
अतिपीडाकरस्य यमलोकस्य वर्णनम्	१७२
विष्णुपुराणवचनोपन्यसनम्	,,
सेवकोऽपि गुरुजनः प्रार्थनया कार्येषु नियोजनीय इति कथनम्	१७३
विष्णोरशंखचक्रादीनां स्थानकथनम्	१७६
उत्तरकुरुमाहात्म्यवर्णनम्	१८२
भृत्यानां नियोजनावसरे प्रोत्साहनीयत्वकथनम्	१८४
भर्त्रा परिगृहीतस्य कार्यसाधकत्वकथनम्	१८५
युवराजे अङ्गदे स्वतन्त्रतया हनुमत्पुरस्कारस्य अयुक्तत्वाशङ्का	१८६
ज्ञातीनामविश्वास्यत्वकथनम्	१८७
अविश्वसनीयमङ्गदमपहाय हनुमतः पुरस्कारस्य युक्तताप्रतिपादनम्	१८९
ज्ञातीनामपरित्याज्यत्वकथनम्	,,
ज्ञातीनामवश्यरक्षणीयत्वकथनम्	१९०
ज्ञातिसंरक्षणस्य फलकथनम्	,,
ज्ञातिभिरुपेतानां पराप्रधृष्यत्वकथनम्	१९१
ज्ञातीनां उपायेन वशीकर्तव्यत्वकथनम्	१९२
कथं भवान् मण्डलं भुवः जानीते इति रामकृतप्रश्ननिरूपणम्	१९३
गवेषणीयप्रदेशानां विशेषकथनस्य फलकथनम्	,,
महति कार्ये प्रवृत्तस्य व्रतानुष्ठानं कर्तव्यमिति कथनम्	१९४
पुण्यदेशतीर्थादीनां वर्णनस्य महाफलत्ववचनम्	१९५
पुण्यश्लोकानां राज्ञामृषीणां च नामतो ग्रहणम्	१९८
भूगोलवर्णनम्	१९९
सिद्धान्तशिरोमण्यनुसारेण भूगोलवर्णनम्	२०६

विषयाः	पृष्ठ-संख्या
भूगोलज्ञानफलकथनम्	२११
अनिर्वेदस्य कार्यसाधकत्वकथनम्	२१२
परिहृतश्रमं अतिथिं वृत्तान्तं पृच्छेदिति कथनम्	२१३
रहस्यस्य निर्बन्धप्रश्नविषयतानिरसनम्	२१४
आज्ञामननुष्ठाय राज्ञः समीपगमनमयुक्तमिति कथनम्	,,
राजशासनभङ्गकर्तुर्दण्ड्यत्वप्रतिपादनम्	,,
कृतकार्याणामपराधस्यादोषत्वकथनम्	,,
बुद्धेरष्टाङ्गत्वनिरूपणम्	२१५
बलचतुष्टयनिरूपणम्	,,
चतुर्दशगुणनिरूपणम्	,,
उपायचतुष्टयनिरूपणम्	२१६
साम्नः पञ्चविधत्वप्रतिपादनम्	,,
सामोपायस्यावश्यप्रयोक्तव्यत्वकथनम्	,,
सामोपायविषयनिरूपणम्	२१७
दानस्य पञ्चविधत्वकथनम्	,,
दानोपायस्यावश्योपादेयतावर्णनम्	,,
भेदस्य त्रैविध्यकथनम्	,,
भेदप्रयोगविषयनिरूपणम्	,,
भेदस्य प्रच्छन्नवेषप्रयोज्यत्वकथनम्	,,
भेद्यस्वरूपलक्षणकथनम्	२१८
भेदोपायस्य प्रयोगकालकथनम्	,,
भेदस्यापि सामदानपुरस्सरं कर्तव्यत्वप्रतिपादनम्	,,
दण्डस्य द्विविधत्वनिरूपणम्	२१९
प्रकाशाप्रकाशदण्डविषयनिरूपणम्	,,
उपेक्षाविषयनिरूपणम्	,,
मानुषीदैवीभेदेन मायायाः द्वैविध्यवर्णनम्	,,

विषयाः	पुट-संख्या
सप्तविधोपायप्रयोक्तुः फलकथनम्	२१९
हनूमत्कृतवानरभेदनम्	२२०
परिवारभेदनस्य प्रधानभेदनात्पूर्वं कर्तव्यत्वकथनम्	,,
स्वामिन्यत्यन्तरक्तानामभेद्यत्वकथनम्	२२०
सकुटुम्बस्य विश्वास्यत्वकथनम्	,,
आहारविशेषाणां चक्षुष्यत्वकथनम्	२२३
अनिरोधेनोत्सर्गस्य चक्षुष्यत्वकथनम्	२२४
गन्धर्वाणां तीक्ष्णकामत्ववर्णनम्	,,
सामवक्तुः सर्वावध्यत्वनिरूपणम्	,,
यथाशक्ति परेषामुपकर्तव्यमिति कथनम्	२२५
बुद्धिमतः सर्वत्राकुण्ठितत्वकथनम्	,,
दातुः सर्वजनोपसेव्यत्वकथनम्	,,
राजा परिजनैर्गृहप्रवेशपर्यन्तमनुसर्तव्य इति कथनम्	२२६
भार्यया भर्तुरादौ निवेद्यैव भोक्तव्यमिति वचनम्	,,
सेनापतिः प्रबलः कर्तव्य इति कथनम्	२२८
वृद्धानुमत्यैव कार्यजातं वक्तव्यमिति वर्णनम्	,,
अभयप्रदानस्य सर्वश्रेष्ठतानिरूपणम्	२२९
सेनापतिना सैन्यमुख्यप्रोत्साहनस्य कर्तव्यत्वकथनम्	,,
स्वामिनः कार्यार्थतया अप्रेषणीयत्वकथनम्	२३०
द्रोणपर्ववचनोदाहरणम्	,,
उत्साहयुक्तस्यापि प्रोत्साहनेन बलाभिवृद्धिर्भवतीति कथनम्	२३१
बृहस्पतिप्रोत्साहनेन इन्द्रस्य बलाभिवृद्धिकथनम्	,,
कृष्णप्रोत्साहनेनार्जुनस्य बलवृद्धिकथनम्	,,
औरसादीनां पुत्राणां स्वरूपलक्षणप्रतिपादनम्	२३२
हनुमत्प्रतिज्ञा	२३४
ग्रन्थसमाप्तिः	२३४

श्रीः

ओम्

श्री गणेशाय नमः

धर्माकूतम्

किष्किन्धाकाण्डः

आरण्यकाण्डे दण्डकारण्यवासिनिखिलमुनिजनसन्निधिप्रतिज्ञातदुष्टनिग्रहशिष्टपरिपालनलक्षणक्षत्रियासाधारणधर्मः खरदूषणादिराक्षसवधमुनिजनरक्षणरूपरामचरितवर्णनमुखेन प्रतिपादितः। अधुना "वन्यानामहमपि राजराण्मृगाणा"मिति भरतसन्निधिप्रतिज्ञातवन्यराजत्वनिर्वहणरूपं धर्मं वालिहननसुग्रीवराज्यप्रदानाङ्गदयौवराज्याभिषेचनरूपस्य वानरैरेव निखिलस्वकार्यसाधनरूपराजधर्मस्य रामचरितस्य वर्णनमुखेन प्रतिपादयितुं किष्किन्धाकाण्डमारभते भगवान्वाल्मीकिः—

> स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलाम्।
> रामः सौमित्रिसहितो विललापाकुलेन्द्रियः॥
> तस्य दृष्ट्वैव तां हर्षादिन्द्रियाणि चकम्पिरे।
> स कामवशमापन्नः सौमित्रिमिदमब्रवीत्॥

अये लक्ष्मण! पश्यपश्य! इयं किल निदाघविगमसमयसमुज्जृम्भितपर्जन्यघनगर्जितसमुद्गच्छदच्छतरनिबिडविदूरमणिकन्दलसन्दोहनिर्मलसलिलान्तरस्फुटदृश्यमानतला जवनेतरपवनेरितपरिफुल्लकल्हारकमलावलीविनिर्गलदनर्गलमत्सरीमाधुरीसाधुरीतिपरिचयादिव नितान्तमधुरोदका तटनिकटप्ररूढविविधविशङ्कटविटपिविटपपटलविशीर्णकुसुमसमूहाभिरामतया स्फुटतरतारकां शारदाम्बरस्थलीमिव विडम्बयन्ती उद्यानवनाधिकहृद्यवनसमुल्लसितमल्लिकातल्लजमालतीचम्पकमाधवीकुटजपाटलकेतकीकरवीरकुरण्टकझिंटीकुरवककुरुविन्दकुन्दादितरुलताकुसुमपरागधूसरपरिसरा तरलतरतरङ्गदोलाहारसुखितमदकलकलहंससुन्दरीकलक्कणितसम्पादितविरहिजनमनःकम्पा विभाति पम्पा। तथाहि अस्याममी रणदलितिमुखरासु समीरणदलितदलासु सन्ततोदण्डपुण्डरीकमण्डलीषु हिण्डमानाः कारण्डवचक्रवाकमुखाः शकुन्त-

सन्ततय: निजसहचरीचञ्चुपुटाञ्चलकण्डूयनसुखातिशयदरसङ्कुचितलोचनाः निरन्तरायमेव निरन्तरं सुखमनुभवन्ति। किञ्चैतानि क्रौञ्चसारसकादम्बकुटुम्बकानि विशालपुलिनवेदिकामध्यकृतासितकानि पार्श्वगतनिजनिजविलासिनीवदनार्धचर्वितबिसकिसलयशकलग्रासकृतार्थजन्मानि मदमेदुरकलकूजितपरवशीकृतपथिकजनहृदयानि भूयोऽपि मदन्तःकरणमादीपयन्ति।

एते च जलतरङ्गसङ्घसङ्घट्टनविशीर्णशीकरासारशीतलाः विलोलकिसलयाङ्गुलिप्रदर्शिताभिनयानां श्रमवशादिव निष्यन्दमानमकरन्दस्वेदबिन्दूनां अङ्गीकृतभृङ्गीगणसङ्गीतकानां वनलतालासिकानां विलासलास्योपदेशमिवाचरन्तः कामिनीजनमनोवशीकरणचूर्णमुष्टिभिरिव विकसितकेतकीकुसुमपांसुवर्षैरन्धकारितदिशामुखाः मञ्जुलवञ्जुलनिकुञ्जसञ्चवनविहारिशबरसुन्दरीस्वेदबिन्दुमौक्तिकनिचयमलिम्लुचा इव मन्दं मन्दं सञ्चरन्तः वनदेवतानिश्वसितपरम्परा इव अतिसुरभयः वनकरिकरामृदितसल्लकीतरुपल्लवक्षीरमसृणमांसलाः प्रकम्पयन्तीव मनो मम पम्पापावनमारुताः इति कथयन् परिक्षुभितान्तःकरणो रामः लक्ष्मणेन सह वन्यमददन्तिदन्तकुन्तान्तसन्ताडनसाध्वसादिव प्रतिबिम्बदम्भादन्तर्निलीनतीरतरुगणं अहिमकरतापानभिज्ञसञ्चरदहिमकरमच्छकच्छपसम्बाधं क्वचिदतिविषमवनमहिषविषाणशिखरविक्षोभाकुलीकृतकमलिनीकुलं क्वचन मध्यन्दिनदिनमणिकिरणप्रतापजनितोदन्यवन्यगजयूथपाथोविहारसम्भ्रमसमुत्क्षिप्तबिसकाण्डषण्डपाण्डरं, क्वचन मुनिजननिर्वर्तितशिवपूजावसानसमुत्सारितविविधपुष्पपरागभक्तिचित्रीकृतं, आदर्शमिव वनदेवतानां, आवासमिव भगवतो वरुणस्य, अवतारमिव शरदम्बरस्य, द्रवीभावमिव स्फटिकाचलस्य, निधानमिव सुधारसस्य, प्रतिनिधिमिव कलशार्णवस्य, वेलाभवैलालवङ्गपाटलोशीरचम्पकफलकुसुममूलजालकजालकलितवासनं अरण्यकरिण्यवमृदिततीरकदलीगर्भदलगलितघनघनसारसारविसरातिशिशिरीकृतं तत्तादृशं सरोवरं विलोकयन् तत्तीर एव तालहिन्तालतमालकृतमालसालरसालाङ्कोलतक्कोलबहुलहिंजुलनिचुलजंभकेसरनागकेसर-नागपुंनागतिलकामलककरकचमरकमरुवककुरुवककपित्थाश्वत्थचिरिबिल्वखर्जूरार्जुनचन्दन-स्यन्दनमन्दारमाकन्दप्रमुखनानाविधानोकहशाखाशतप्रच्छायतलविच्छन्दस्पन्दकलितचङ्क्र-मणहरिणबृन्दां विपुलविटपघटाघटितविकटकोटराटीकमानचटुलव्याघ्राटदार्वाघाटनिशाटखञ्जरीटकुक्कुटकरटंककलविंककाकशुकलावकोलूककालकण्ठकलकण्ठनीलकण्ठकलितोत्तालकोलाहलाकुलां सर्वतो गर्वतः प्रसृमरचमरभल्लूकमलशल्यककिटिकरटिप्लवङ्गकुरङ्गयूथां मत्तवनमहिषविषाणाग्रकोटिपाटितहरिणीगर्भिणीरुधिरधाराशोणीकृतमार्गां अमन्दमारुतान्दोलितोद्दण्डभण्डीरविशालविटपदोलाधिरोहणमहोत्सवानन्दितगोलाङ्गूलजालां पम्पाजलपिपासासमागतकण्ठीरवकण्ठारवश्रवणजनितभयपलायमानवनमदकुञ्जरां, उल्ललदधिकझिल्लिकागणझींकारमेदुरलतागुल्मां सर्वसत्वशरण्यां अरण्यानीमाविवेश।

तदनन्तरमनन्तरमणीयगन्धफलिकाकलिकां निकायनिकामाभिरामं त्रिभुवनविजयोद्यतकुसुमशरशरासनटङ्कारशङ्कावहमदकलकलकण्ठकण्ठनिक्वाणं अदभ्रमधुसम्भ्रमद्भ्रमरझङ्कारालङ्कृतमञ्जुलमञ्जरीपुञ्जपिञ्जरितदिङ्मण्डलं विकसितकुसुमसमुदयविलासहासमनोहराभिर्ललनाभिरिव लताभिः स्वयमेव विहिताभङ्गुरालिङ्गनतया समुल्लसितपल्लवतल्लजव्याजेन निजान्तर्गतरागमिवोद्गिरद्भिस्तरुगणैरचिरसंसूचिताविर्भावं पुङ्खानुपुङ्खं रिङ्खदसंख्यमधुपकुलशृङ्खलाकृष्यमाणमदनमहारथिकाधिरूढमलयपवनरथं तरुशिखरनिपतदनेककुसुमसौरभाधिवासितदिशामुखं मानिनीमानमथनसहकारिसहकारतरुशिखरसम्भृतमदनशरनिकरं नीराजितमिव तरुणारुणमञ्जरीपुञ्जनिराकृतलोकशोकैरशोकैः, अभ्यर्च्यमानमिव विकीर्यमाणकुसुमवृन्दैः कुन्दैः, सानन्दमीक्षमाणमिव विकसितप्रसूनविगलितमरन्दबिन्दुवारैः सिन्दुवारैः, वनदेवतानिवर्तितनाराात्रिकविधिमिव व्याकोशपलाशैः, कलितकुशलप्रश्नमिव गुञ्जदलिकुलैर्बकुलैः, प्रसाधितमिव वनश्रीतिलकैस्तिलकैः, विधृतातपत्रमिव नवसमुद्गतहरितदलनिरन्तरशाखाशतकृतदिग्रोधैर्न्यग्रोधैः, कृतोपहारमिव प्रसारितशाखाग्रविन्यस्तमालैस्तमालैः, सुरभीकृतमिव जगदानन्दनैश्चन्दनैः, पीतांशुकावृतमिव काननस्थलीमुखहारिद्रवर्णकारैः कर्णिकारैः, विहितवितानमिव निर्भरविकचकुसुमपाटलैः पाटलैः, स्तूयमानमिव विकस्वरैः पिकस्वरैः, उपगीयमानमिव विगीतैर्मधुकरगीतैः, सपरिवारमिव शुककुलैः, सवयस्यमिव मलयमारुतैः, सविलासहासमिव मल्लिकादिवल्लरीकुसुमैः, सांगरागमिव बन्धूककान्तिभिः, सकलत्रमिव वनलक्ष्म्या, सनाथमिव मन्मथेन, पम्पातीरवनराजिषु कृतनवावतारं प्रियविरहविधुरकामिनीजनकृतान्तं वसन्तमवलोक्य दुस्सहजानकीविरहशोकायासपरवशीकृतमानसतया सञ्जातधैर्यविरामो रामस्तत्र तत्र वनभूमिषु विचित्रवस्तुविलोकनात् मुहुरपि जनकतनयां स्मारंस्मारं स्मरशरासननिरन्तरनिस्सरच्छरपरम्पराजर्जरितसकलावयवः सकरुणं सुमित्रानन्दनं इदमुदीरयामास ।

हन्त लक्ष्मण ! किमाचक्षे ? पुरा किल पृथुलगण्डोपलतलोपरिपतनझलज्झलितवननिर्झरनित्यमुदितनात्यूहमिथुननिनादमेदुरासु मधुसमयसमुदितमधुमदमुदितविचित्रपत्रिगणविमुक्तवाशितोल्लसितवृक्षगुल्मलतासु पथिकजनजीवनोदन्तपरिकुपितवसन्तकोपानलशंकाकलङ्किकुसुमोद्दीपितासु शिशिरावसानसमयसमुन्मिषदनल्पपुष्पभराकल्पकल्पनानल्पशोभमानपादपासु वनभूमिषु तासु तासु तया विदेहराजसुतया प्रपञ्चितानुरागया सञ्चरमाणस्य मे ये ये विहगमृगनगलतादयः निरुपमानमानन्दभूमानमजनयन् , तत एवैते स्वभावरमणीया अपि तया समुपनतविप्रयोगस्य मे क्षततनोरिव क्षारतां सम्प्रति सम्प्रथयन्ति ।

तथा हि— एष किल नवसमुन्मिषितरसालकिसलयसगर्वचर्वणकषायकण्ठः निजोपकण्ठचरीं सहचरीं सानुरागमालोकमानः लोकमानसोद्दीपनैः मुहूरचितकुहूरवैः तर्जयतीव मां

वनकोकिलः। अयं च दरदलविरलबहुलबकुलमुकुलविगलितधूलिपालिधूसराकारः मधुमासवासरावतारविकसितरसालकुसुमासवास्वादवशादिव पदे पदे परिस्खलितगतिर्विविधप्रलापमुखरमधुपकुलानुगतः मत्त इव मलयमारुतो हन्त स्वरूपानुरूपमेव सञ्चेष्टते। अयं च पञ्चशरसामन्तो वसन्तः भयतरङ्गितकुरङ्गाङ्गनापाङ्गचलाचलविलोचनाञ्चलां सुकुमारीं जनकराजकुमारीं अपश्यतो मम शिलीमुखानिव शिलीमुखानङ्गारानिव प्रवालभृङ्गारान् कशाप्रहारानिव प्रसूनहारान्, दृढतरहृदयशङ्कूनिव बालान्तरान् विषलताकन्दमिव माकन्दं धैर्यलवनमिव कमलवनं अनलानिलानिव मलयानिलान् पितृपतिमिव रतिपतिमपि कुर्वाणाः निष्कारणमेव वैरनिर्यातनाय समुद्युङ्क्ते।

हन्त किं करोमि मन्दभाग्यः। एते किल समुदञ्चितकलिकासञ्चयरोमाञ्चकञ्चुकितवासन्तिकादृढालिङ्गिताः कोटरोत्सङ्गनिषण्णविहङ्गमकुलकलितकोलाहलाः धवलतरकुसुमकदंबदंभेन जानकीयोगविधुरं मां हसन्तीव मन्दारशाखिनः, इत्यादि विलपन् अत्यायतजानकीविरहशोकायाससान्द्रः श्रीरामचन्द्रः कतिपयपदान्तरं सन्तरन् उद्दण्डताण्डवारम्भविलोलशिखिमण्डलं विततपिञ्छभारचन्द्रकप्रकरविरचितेन्द्रायुधसहस्रशोभं अनरालगलनालगर्भितनिर्भरकेकारवमधुरया निकामसुखिन्या शिखिन्या सह निर्वर्त्यमानविलासनृत्योत्सवं कञ्चन पञ्चशरशरवशंवदं नीलकण्ठयुवानम् आलक्ष्य तदीयबर्हलक्ष्मीनिरीक्षणोत्क्षिप्तक्षितितनयाकेशपक्षरामणीयकस्मरणो लक्ष्मणमिदमाचचक्षे—

पश्य लक्ष्मण नृत्यन्तं मयूरमुपनृत्यति।
शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुषु॥

तामेव मनसा रामां मयूरोऽप्यनुधावति।
वितत्य रुचिरौ पक्षौ रुतैरपहसन्निव॥

मयूरस्य वने नूनं रक्षसा न हृता प्रिया।
तस्मान्नृत्यति रम्येषु वनेषु सह कान्तया॥

हन्त! विचित्रा खलु शांबरी शम्बरवैरिणः यदियं तिर्यग्योनिजातापि मयूरसुन्दरीयं पञ्चशरप्रपञ्चवञ्चिता स्वयमेवाभ्येति नीलकण्ठोपकण्ठम्—

मामप्येवं विशालाक्षी जानकी जातसम्भ्रमा।
मदनेनाभिवर्तेत यदि नापहृता भवेत्॥

हन्त दैवहतकविप्रलब्धोऽयं वसन्तोदयः। तथा हि सीतावियोगेन—

रुचिराण्यपि पुष्पाणि पादपानामतिश्रिया।
निष्फलानि महीं यान्ति समं मधुकरोत्करैः॥

हा हतोऽस्मि सर्वथामुना दुर्विदग्धेन । सा खलु निखिलललनाजनललामभूता भूतानामप्यदृश्या सन्ततमसूर्यंपश्या वरसौधमणिकुट्टिमाङ्कणसञ्चारादपि संजनितखेदा स्वप्नेऽप्यसंभावितमद्वियोगा सीता संप्रति रूक्षतीक्ष्णराक्षसाधिक्षेपलक्ष्यतया संजातचित्तविक्षेपा निजहृदयवेदनानिवेदनोचितं कञ्चिदपि स्वजनमनालोकमाना कामिजनालिङ्गितकामिनीमदविवर्धनान् प्रोषितपतियोषिदभिषेणनोद्युक्तविषमेषुविजयडिंडिमायितकलकण्ठकण्ठान् दुरन्तसन्तापावतारपिशुनानिमान् दिवसान् मया विना कथमतिवाहयिष्यति, किमाचरिष्यति, किं मंस्यते, किं प्रतिपत्स्यते, कं देशमधिवत्स्यति, कस्य वा निकटे वदिष्यति निजावस्थां, केवलं यूथपरिभ्रष्टा पक्कणवाटीं प्रविष्टा बालकुरङ्गीव भयतरलतारकं दिशो दश विप्रेक्षमाणा कष्टां दशामनुभविष्यति । हा हन्त ! किमितोऽपि कष्टतरं यदेतां रतिकान्तसमरान्तनितान्तखिन्नकिन्नरीमिथुनमनोहरविचित्रवनराजिविराजितान्तःप्रतिबिंबिताम्बरमणिबिंबविडंबिसुगन्धिसौगन्धिकबन्धुरां वल्गुवचनमद्गुनिचयनमद्गुरुपङ्कजां पम्पां निरीक्ष्य कथं कथमपि मनो विनोदयतो विदेहराजनन्दिनीमनुशोचतो मम तदीयं सुन्दरं मुखं सुषुमारविन्दानि तच्चिकुरनिकरं मधुकरास्तदीक्षणलीलां नीलोत्पलानि तद्भ्रूभङ्गं भृङ्गाः, तत्कुचक्रमं चक्रवाकाः, तदीयतनुलतावर्णं आवृन्तविकसितकमलकर्णिकाः तन्मन्दकेलीं मरालीकुलानि सारयन्ति । तथापि किञ्चिदिव समुच्छ्वसितं हृदयेन । यतः—

पद्मकेसरसंसृष्टो वृक्षान्तरविनिस्सृतः ।
निःश्वास इव सीताया वाति वायुर्मनोहरः ॥

इत्थमनवहित्थमुखवर्णः पम्पातटाभ्यर्णगतकर्णिकारकदम्बमधूकशिरीषशिंशुपादितरुशिखरनिष्कुटनिलीनविष्किरनिनदाविष्कृतनिष्करुणमदनदुष्क्रियानिष्कासितधृतिः अपारचिन्तासनाथो रघुनाथः पुनरपि लक्ष्मणमिदमवोचत् । अहो अतित्रैलोक्यं जानक्याः शीलम् । तथाहि, या किल—

प्राप्य दुःखं वने श्यामा सा मां मन्मथकर्शितम् ।
नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत ॥

इत्युच्चावचवचनैरत्युच्चैः प्रलपन्तं रामं सुमित्रासूनुरित्थमाश्वासयामास—

संस्तम्भ राम भद्रं ते मा शुचः पुरुषोत्तम ।
नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनाम् ॥

स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने ।
अतिस्नेहपरिष्वङ्गाद्वर्तिरार्द्राऽपि दह्यते ॥

स्वास्थ्यं भद्रं भजस्वार्य त्यज्यतां कृपणा मतिः ।
अर्थो विनष्टकार्यार्थैर्नायत्नेनाधिगम्यते ॥

उत्साहो बलवानार्य नास्त्युत्साहात्परं बलम् ।

सोत्साहस्य हि लोकेषु न किञ्चिदपि दुर्लभम् ॥
उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु ।
उत्साहमात्रमाश्रित्य प्रतिलप्स्याम जानकीम् ॥
त्यज्यतां कामवृत्तत्वं शोकं सन्यस्य पृष्ठतः ।
महात्मानं कृतात्मानमात्मानं किन्न बुध्यसे ॥

इत्यादिभिरत्यादरेण सोदरेणानुनीयमानः संस्तम्भितशोकमोहो रामः पम्पासरोवरपरिसरोपगतम्—

निरीक्षमाणस्सहसा महात्मा सर्वं वनं निर्झरकन्दरं च ।
उद्विग्नचेताः सह लक्ष्मणेन विचार्य दुःखोपहतः प्रतस्थे ॥
तं मत्तमातङ्गविलासगामिनं गच्छन्तमव्यग्रमना महात्मा ।
स लक्ष्मणो राघवमप्रमत्तो ररक्ष धर्मेण बलेन बुद्ध्या ॥

ततस्तौ समस्तलोकरक्षणक्षमक्षितिपतिलक्षणलक्षितौ करकमलगृहीतकनकमयशरासनौ परिकुपितविषधरनिकरसदृशनिशितशरभरभरितशरधिविलसितविपुलभुजशिखरौ उद्वृत्तपृथुलमांसलमसृणायतभुजदण्डमण्डितौ स्वपरिग्रहेण जटावल्कयोरपि स्पृहणीयतासम्पादकौ गन्धसिन्धुरमन्थरगामिनौ अप्राकृतलावण्यावलङ्कृतारण्यौ अपाङ्गशोभितारण्यौ समुपस्थिततारुण्यौ सर्वसत्त्वशरण्यौ महावीराग्रगण्यौ सुकुमारौ राजकुमारौ निरीक्ष्य किञ्चिदिव सञ्चलितहृदयः सञ्चितैकमत्यैः सह चतुर्भिरमात्यैः विपुलबलावलिप्तवलीमुखचमूकमृश्यमूकमधिवसन् समग्रगुणनिधानं सुग्रीवो नाम वानरलोकाधिपो विलोकयामास ।

द्वितीये ॥

तौ तु दृष्ट्वा महात्मानौ भ्रातरौ रामलक्ष्मणौ ।
वरायुधधरौ वीरौ सुग्रीवः शङ्कितोऽभवत् ॥

अनेन राजभिस्सर्वतश्शङ्कितव्यमिति सूचितम् । तथा च **राजधर्मे**—

'अशङ्क्यमपि शङ्केत नित्यं शङ्केत शङ्कितान् ।
भयं ह्यशङ्किताज्जातं समूलमपि कृन्तति' ॥ इति । तथान्यत्र—

'राजन्राज्यं सपत्नेषु नित्योद्विग्नः समाचरेति'। तदनु किमेतौ नु विपुलतरभुजबलावलिप्तवालिप्रहिताविति भयात्परिम्लानवदनः सुग्रीवः—

चिन्तयित्वा स धर्मात्मा विमृश्य गुरुलाघवम् ।
ततस्स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः ॥
शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ ॥

अनेन स्वस्य प्रसक्त उपद्रवः सुहृद्भ्यो निवेदनीय इति सूचितम्। तथा—**चोद्योगे विदुरः—**

'प्रज्ञावृद्धं धर्मवृद्धं स्वबन्धुं विद्यावृद्धं वयसा चापि वृद्धम्।

कार्याकार्ये पूजयित्वा प्रसाद्य यस्सम्पृच्छेत् न स मुह्येत्कदाचित्॥' इति।

अत्रापि निवासमसहमानेन हेममालिना वालिना महाप्रभावौ कौचिन्नरवरौ मत्परिपीडनाय प्रेषितौ भवेतां ध्रुवं तावेतावित्यवदत्। तदनु तद्दर्शनसञ्जातपरिभ्रमेण सुग्रीवेण सहितास्सचिवाः अपहाय तं देशं तटात्तटान्तरमधिरुह्य स्थलान्तरमागताः—

ते क्षिप्रमधिगम्याथ यूथपा यूथपर्षभम्।
हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे॥

अनेन आपत्समये सुहृद्भिः राजा न परित्याज्य इति सूचितम्। तथा च **राजधर्मे—**

'अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्च परीवृताः।

न त्वां जितार्थिनो जह्युरक्षुद्रास्सत्यवादिनः'॥ इति। **कामन्दके—**

'निर्गुणं ह्यपि भर्तारं आपत्सु न परित्यजेत्।

ततः परो नास्ति यज्ञो य आपत्सूपतिष्ठते॥' इति।

ततश्शक्रसूनुविक्रमस्मरणमात्रेण परिकम्पितसर्वावयवं तपनतनयमवलोक्य वदतां प्रवरः प्रभञ्जनसुतः महामुनिना मतङ्गेन दूरीकृतवालितद्बलप्रवेशकथो मलयोऽयं गिरिवरः तदत्र सर्वथा तत्कृतभयं न पश्यामः। त्वं च पवनतपनसमानवेगप्रतापः अतिचपलया ह्यनया कापेय्या चेष्टया लघुतां नावलम्बस्व—

बुद्धिविज्ञानसम्पन्न इङ्गितैस्सर्वमाचर।
न ह्यबुद्धिं गतो राजा सर्वभूतानि शास्ति हि॥

इत्यवदत्। अनेन आपत्स्वपि परित्यक्तव्यामोहो बुद्ध्यादियुक्तः राजा श्रियः पात्रभूत इति सूचितम्। तथाच **कामन्दके—**

'धीमानुत्साहसम्पन्नः प्रभुशक्त्या समन्वितः।

श्रियस्स्यात्परमं पात्रं माया इव महोदधिः॥

नलिनीवाम्बुसम्पत्या बुद्ध्या श्रीः परिपाल्यते।' इति।

उद्योगे विदुरोऽपि—

'सन्नियच्छति यो वेगमुत्थितं क्रोधहर्षयोः।

स श्रियो भाजनं राजन् यश्चापत्सु न मुह्यति'॥ इति।

तदनु तपनतनयः समाकर्ण्य हनुमद्वचनं इत्थमकथयत् । चामीकरविभूषितदीर्घचापासिधारिणौ तावालोक्य कस्य वा मनो न विकम्पेत ।

राजानो बहुमित्राश्च विश्वासो नास्ति हि क्षमः ।

अनेन बहुमित्रेषु राजसु विश्वासो न कर्तव्य इति सूचितम् ॥ तथाच **राजधर्मे—**

'बहुमित्राश्च राजानो बहुमित्रास्तथैव च । तेभ्यस्सर्वेभ्य एवाहुर्भयं राजोपसेविनाम् ॥
विश्वासयेत्परांश्चैव विश्वसेन्ननु कस्यचित् । पुत्रेष्वपि हि राजेन्द्र विश्वासो न प्रशस्यते ॥
एतच्छास्त्रार्थतत्वं तु मया ख्यातं तवानघ । अविश्वासो नरेन्द्राणां गुह्यं परममुच्यते ॥' इति ।

'अकारणादेव हि कारणाद्वा य एव कश्चित्पुरुषोऽरिसेवी ।
निजश्च विश्लिष्ट उपेतशस्त्र आयाति यस्तस्य गतिं प्रपश्येत् ॥' इति ॥

अरयश्च मनुष्येषु विज्ञेयाश्छन्नचारिणा ।
विश्वस्तानामविश्वस्ताश्छिद्रेषु प्रहरन्ति हि ॥

कृत्येषु वाली मेधावी राजानो बहुदर्शिनः ।
भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरैः ॥
तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवङ्गम ।

अनेन परेषां स्वभावो वेषान्तरपरिग्रहादिभिः प्रच्छन्नेनैव विचारणीय इति सूचितम् । तथाच **राजधर्मे—**

'आदिमध्यावसानज्ञः प्रच्छन्नश्च विचारयेत्' । इति । **कामन्दके—**

'तपस्विलिङ्गिनो धूर्ताः यस्य शिल्पोपजीवकाः ।
चराश्चरेयुः परितः पिबन्तो जगतीमनः ॥' इति ।

अत एव, 'भिक्षुरूपं तदा भेजे शठबुद्धितया कपिः' इति गृहीतसन्यासवेषेण विचारितवानिति प्रतिपादितम् ।

इङ्गितानां प्रकारैश्च रूपव्याभाषणेन च ।
लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि ॥
विश्वासयन् प्रशंसाभिरिङ्गितैश्च पुनः पुनः ।
मामेवाभिमुखः स्थित्वा पृच्छ त्वं हरिपुङ्गव ॥
प्रयोजनं प्रवेशस्य वनस्यास्य धनुर्धरौ ।
शुद्धात्मानौ यदि त्वेनौ जानीहि त्वं प्लवङ्गम ॥
व्याभाषितैर्वा विज्ञेया स्याद्दुष्टादुष्टता तयोः ।

अत्र दुष्टादुष्टाभिप्रायः इङ्गिताकारचेष्टाव्याभाषणादिभिर्ज्ञातव्य इत्युक्तम् । तथाच मनुः—

संविद्यादस्य कृत्येषु निगूढेंगितचेष्टितैः । आकारमिङ्गितं चेष्टां कृत्येषु च चिकीर्षितम् ॥
यथा प्रयत्नमातिष्ठेद्यथा स्वार्थं न पीडयेत । बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ॥
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च । आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ॥
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥ इति ।

विशेषो राजधर्मे इन्द्रं प्रति बृहस्पतिः ।

परोक्षमगुणानाह सद्गुणानभ्यसूयते । परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः ॥
तूष्णींभावेऽपि विज्ञेयं न चेद्भवति कारणम् । निश्वासमोष्ठसन्दंशं शिरसश्च प्रकम्पनम् ॥
करोत्यभीक्ष्णं संसृष्टमसंसृष्टं च भाषते । अदृष्टितो विकुरुते दृष्टो नैवाभिभाषते ॥
पृथगेत्य समश्नाति नेदमद्य यथाविधि । आसने शयने याने भावा लक्ष्या विशेषतः ॥
आर्तिरार्ते प्रिये प्रीतिरेतावत्प्रियलक्षणम । विपरीतं तु बोद्धव्यमरिलक्षणमेव तत् ॥
इति दुष्टस्य विज्ञानमुक्तं ते सुरसत्तम ॥ इति ।

अनुरागमात्सर्यलिङ्गानि कामन्दकेऽपि—

रागापरागौ जानीयाद्भर्तुः कुशलकर्मकृत । इङ्गिताकारलिङ्गाभ्यामिङ्गिताकारतत्ववित् ॥
दृष्ट्वा प्रसन्नो भवति वाक्यं गृह्णाति चादरात् । दिशत्यासनमभ्याशे कुशलं परिपृच्छति ॥
विविक्तदर्शनस्थाने रहस्ये न च शङ्कते । तदर्थी तत्कृतां चोच्चैराकर्णयति सत्कथाम ॥
श्लाघते श्लाघनीयेषु श्लाघमानं च नन्दति । कथान्तरेषु स्मरति प्रहृष्टः कीर्तयेद्गुणान् ॥
सहते पथ्यमुक्तस्सन् न निन्दामनुमन्यते । करोति वाक्यं तद्भक्तं तद्भृच्च बहुमन्यते ॥
वृद्धौ प्रसन्नो भवति व्यसने परितप्यते । रक्तस्य हि गुणाः प्रोक्ताः भृत्येषु पृथिवीपतेः ॥
उपकारेषु माध्यस्थ्यं दर्शयत्यद्भुतेष्वपि । तत्कृतं कर्म चान्येन कृतमित्यभिभाषते ॥
विपक्षमुत्थापयति विनाशं चाप्युपेक्षते । कार्ये संवर्धयेताशां फले च कुरुतेन्यथा ॥
यद्वाक्यं मधुरं किञ्चित्तदप्यर्थेन निष्ठुरम् । आचरत्यात्मसंसत्सु परिवादं च केवलम् ॥
अकोपोऽपि सकोपाभः प्रसन्नश्चापि निष्फलः । हसत्यकस्मात्त्यजति रूक्षं च समुदीक्षते ॥
विज्ञाप्यमानो वृत्त्यर्थं सहसोत्थाय गच्छति । आघट्टयति मर्माणि गुणैर्न बहुमन्यते ॥
संभावयति दोषेण वृत्तिच्छेदं करोति च । साधूक्तमपि तद्वाक्यं समर्थयति चान्यथा ॥
अपर्वणि कथाभङ्गं करोति विरसीभवन् । उपास्यमानश्शयने सुप्तलक्ष्येण तिष्ठति ॥
यत्नेनाराध्यमानोऽपि सुप्तवच्च विचेष्टते । इत्यादि चानुरक्तस्य विरक्तस्य च लक्षणम् ॥
रक्ताद्वृत्तिं समीहेत विरक्तात्तां परित्यजेत् । इति ।

तृतीये ॥

ततः सुग्रीवप्रचोदितः,

कपिरूपं परित्यज्य हनूमान्मारुतात्मजः ।
भिक्षुरूपं तदा भेजे शठबुद्धितया कपिः ॥
ततः स हनुमान्वाचा श्लक्ष्णया सुमनोज्ञया ।
विनीतवदुपागम्य राघवौ प्रणिपत्य च ।
आबभाषे च तौ वीरौ यथावत्प्रशशंस च ॥

अनेन दूतेन स्तुतिपूर्वकमेव सन्देशो निवेदनीय इति सूचितम् । अत एव दूतो यस्य सन्देशं हरति यस्मै च निवेदयति तदुभयपक्षप्रशंसापूर्वकं मृदुतरं भाषेतेत्युक्तं कामन्दके—

'ब्रूयात्प्रसृतया वाचा सर्वं वेद भवानिति ।
कुलेन नाम्ना द्रव्येण कर्मणा च महीयसा । कुर्याच्चतुर्विधं स्तोत्रं पक्षयोरुभयोरपी'ति ॥

सर्वाभरणसमलङ्करणार्हावपि तद्रहितौ अश्विनाविव निरतिशयसौन्दर्यशालिनौ त्रिलोकनायकोपमानौ युवानौ युवामवलोक्य महाबलेन बालिना सञ्जातवैरः सुग्रीवः बहुशः शङ्कितहृदयः स्वसचिवं हनुमन्नामानं मां भवदीयवृत्तान्तविमर्शनाय प्रेषयामासेति ।

ततः पवनतनयवचनाकर्णनजनितहर्षप्रकर्षेण प्रसन्नाननो रामः पार्श्वस्थितं लक्ष्मणमित्यवदत् ।

सचिवोऽयं कपीन्द्रस्य सुग्रीवस्य महात्मनः ।
त्वमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ॥
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दम ।
नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ॥
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ।
नूनं व्याकरणं कृत्स्नं अनेन बहुधा श्रुतम् ॥
बहु व्याहरताऽनेन न किंचिदपशब्दितम् ।
न मुखे नेत्रयोर्वापि ललाटे च भ्रुवोस्तथा ॥
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ।
अविस्तरमसन्दिग्धमविलम्बितमव्ययम् ॥
उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ।

संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥
अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तं उद्यतासेररेरपि ॥
एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु ।
सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥
एवं गुणगणैर्युक्तो यस्य स्यात्कार्यसाधकः ।
तस्य सिध्यन्ति सर्वार्थाः दूतवाक्यप्रचोदिताः ॥

नन्वत्र "नानृग्वेदविनीतस्य नायजुर्वेदधारिणः । नासामवेदविदुषः शक्यमेवं प्रभाषितुम्" इत्यादिना ऋग्वेदादौ सम्यक् परिचयमन्तरेण एवमपशब्दादिदोषरहितं मुखनेत्रादिविकारदोषरहितं उचितस्थानोच्चारणेन विस्पष्टत्वादिगुणयुक्तं भाषितुं न शक्यमिति प्रतिपादितम् । नैतद्युक्तं, न हि वेदाध्ययनमात्रेण वक्तुरेते दोषाः परिहर्तुं शक्यन्त इति चेत्सत्यम् । न केवलवेदाध्ययनेन परिहर्तुं शक्याः तथापि शिक्षादीनामङ्गानां वेदोपयोगित्वात्तैः सह वेदाध्ययने सति तत्प्रतिपादितदोषपरिहारः सम्भवत्येव । शिक्षादिभिरङ्गैः सहैव वेदोऽध्येतव्य इत्यत्रागमः प्रमाणम् । ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । निष्कारणः दृष्टकारणनिरपेक्षः नित्य इति यावत् । कार्यतेऽनुष्ठाप्यतेऽनेनेति कारणं फलम् । ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यन्वयः । तथा च साङ्गवेदाध्ययनतदर्थज्ञानरूपो धर्मः नित्यस्सन्ध्योपासनादिवदित्यर्थः । श्रुतिरेषेति हरदत्तः स्मृतिरिति तु भट्टाचार्यः । अङ्गत्वं च शीक्षादीनामङ्गत्वेन संस्तवात् । उक्तं हि शीक्षायां---

'मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते । निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ॥
शीक्षा घ्राणं तु वेदस्य हस्तौ कल्पान्प्रचक्षते ॥' इति ।

उपकारकतयाप्यङ्गत्वं शीक्षादीनाम् । व्याकरणं हि अर्थविशेषमाश्रित्य स्वरविशेषान्विदधत् पदार्थविशेषनिर्णय उपयुज्यते । ज्योतिषमपि वेदाध्ययनोपयोगिनं वेदोदितकर्मानुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयति । निरुक्तं तु व्याकरणस्यैव परिशिष्टप्रायम् । बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र सङ्ग्रहात् । छन्दोविचितिरपि गायत्र्यादि लक्षणकथनद्वारा "गायत्र्या जपति" 'गायत्री पुरोनुवाक्या भवति, 'त्रिष्टुग्याज्येत्यादिविध्यर्थनिर्णये उपयुज्यते । शीक्षापि वर्णोच्चारणप्रकारं दर्शयति । कल्पसूत्राण्यपि प्रकरणान्तरपठितस्य न्यायलभ्यस्य शाखान्तराधीतस्य चाङ्गजातस्य उपसंहारेण प्रयोगं दर्शयति । अत्र यद्यपि वेदाध्ययने नोपयुज्यन्ते कल्पसूत्राणि, तथापि वेदकार्ये कर्मा-

नुष्ठाने उपकारकत्वेनाङ्गत्वं, आग्नेयादिसाध्यापूर्वोपयोगिप्रयाजादीनामिवेत्यदोषः। तस्मादेषामङ्गत्वेन संस्तवादुपकारकत्वाच्चाङ्गत्वम्। तेष्वपि प्रधानं व्याकरणं, पदार्थावगमस्य व्याकरणाधीनत्वात्, वाक्यार्थज्ञानस्य तन्मूलकत्वात्। अत एव तस्य शीक्षायां मुखत्वेन निरूपणं कृतम्। अङ्गानां चाध्ययनं वेदाध्ययनसमकालमेव। तथा च मनुः—

'श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तः छन्दांस्यधीयीत मासान्विप्रोऽर्धपञ्चमान्॥
ततः परं तु छन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि रहस्यं च कृष्णपक्षेषु संपठेत्॥' इति।

तथा च स्मृत्यन्तरेऽपि— इत ऊर्ध्वमनध्यायेष्वङ्गान्यधीयीतेति। एवं च वेदेन सहैवाधीतैरङ्गैर्वर्जनीयान्दोषानवगत्य तत्परिहारपूर्वकं वर्णानां सम्यगुच्चारणसामर्थ्यातिशयेन हनूमतो वेदाध्ययनानुमानात् लोकवेदयोः शब्दानन्यत्वं सूचितम्। अयं चार्थः पूर्वमीमांसायां व्यवस्थापितः।

तथाहि प्रथमेऽध्याये चिन्तितम्। "प्रयोगचोदनाभावादर्थैकत्वमविभागात्"। गौरित्येवमादयः शब्दाः किमाकृतेः प्रमाणमुत व्यक्तेरिति संशयः। उच्यते। इदं तावत्परीक्ष्यतां किं य एव लौकिकाः शब्दाः त एव वैदिकाः उतान्य इति। यदा त एव, तदा किं त एवैषामर्थाः उतान्य इति संशयः। तत्र लौकिकाश्शब्दा अन्ये वैदिका अन्ये, अन्ये चैषामर्था इति ब्रूमः। कुतः व्यपदेशभेदाद्रूपभेदाच्च। इमे लौकिकाश्शब्दा इमे वैदिका इति व्यपदेशभेदः। अग्निर्वृत्राणिजङ्घनदित्यन्यदिदं रूपं लौकिकादग्निशब्दाच्छब्दान्यत्वाच्च न त एवार्थाः। अपि चामनन्ति "उत्ताना वै देवगवा वहन्ती"ति। ये देवानां गावः ते उत्ताना वहन्तीत्युक्ते गम्यत एव य उत्ताना वहन्ति ते गोशब्देनोच्यन्त इति। तस्मादन्यो वैदिकस्य गोशब्दस्यार्थ इति। तथा "देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थ"मिति हिरण्यपर्णो देववनस्पतिशब्देनोच्यते। तथा "एतद्वै दैव्यं मधु यद्घृतमि"ति वेदे घृते मधुशब्दः। तस्मादमीषामन्येऽर्था इत्येवं प्राप्ते ब्रूमः। य एव लौकिकाश्शब्दास्त एव वैदिकाः त एव चैषामर्था इति। कुतः प्रयोगचोदनाभावात्। एवं च प्रयोगचोदना संभवति यदि त एव शब्दास्त एव चार्थाः। इतरथा शब्दान्यत्वे अर्थो न प्रतीयेत, तस्मादेकशब्दत्वमिति। ननु प्रयोजनमिदं, हेतुर्व्यपदिश्यतां इति, ततो हेतुरुच्यते अविभागादिति। न तेषामेतेषां च विभागमुपलभामहे। अत एकत्वम्। तांश्चार्थानवगच्छामः अतोऽनन्यत्वं वदामः। यच्चोक्तं य उत्ताना वहन्ति ते देवगवाः, यद्घृतं तन्मधु, हिरण्यपर्णश्च वनस्पतिरिति तन्नास्ति वचनं, यत् उत्तानानां वहतां गोत्वं ब्रूयात्, ये गावस्त उत्ताना वहन्तीत्येवं तद्यदि चानेन वचनेन गोत्वं विधीयते तत उत्ताना वहन्तीत्यनुवादः स्यात्। न चोत्ताना वहन्तः केचन प्रसिद्धास्ते नियोगतो विधातव्याः। तेषु विधीयमानेषु न शक्यं गोत्वं विधातुम्। भिद्येत हि तदा वाक्यम्।

यदि चान्ये वैदिकास्तत उत्तानादीनामर्थो न गम्येत तत्र न तरां शक्येताविज्ञातलक्षणं गोत्वं विधातुम्। नचोत्तानवहनवचनमप्यनर्थकम्। स्तुत्येनार्थवद्भविष्यतीति। एवं घृतस्य मधुत्वं हिरण्यपर्णता च वनस्पतेः। तस्मात् त एव शब्दा अर्थाश्च इति।

'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्। बहु व्याहरताऽनेन न किञ्चिदपशब्दितम्॥' इत्यनेन हनूमतो व्यवहारे अपशब्दाभावेन हेतुना व्याकरणाध्ययनानुमानात् व्याकरणस्य साधुशब्दानुशासकत्वं सूचितम्। व्याकरणस्य साधुशब्दानुशासकत्वं च भगवता पतञ्जलिना महाभाष्ये पस्पशायां साक्षात्प्रयोजनप्रतिपादकेन 'अथशब्दानुशासनमि'त्यनेन वाक्येन प्रतिपादितम्। विवृतं चैतद्वाक्यं तत्रैव। अथेत्ययं शब्दोऽधिकारार्थः प्रयुज्यते, शब्दानुशासनं शास्त्रमधिकृतं वेदितव्यमिति अत्र शब्दशब्दः साधुशब्दपरः। केषां शब्दानां लौकिकानां वैदिकानाञ्च। लौकिकास्तावत् गौरश्वः, पुरुषो, हस्ती, ब्राह्मणः, शकुनिरिति। वैदिकाश्च 'शन्नोदेवीरभिष्टये', 'इषेत्वोर्जे त्वा' 'अग्निमीले पुरोहितं' 'अग्न आयाहि वीतय' इति। उत्तरग्रन्थे साधु शब्दानामेवोदाहरणात्। अनुशास्यतेऽनेनेति व्युत्पत्त्यानुशासनं शास्त्रम्। करणाधिकरणयोश्चेति ल्युटि अनादेशः। शब्दानामनुशासनं शब्दानुशासनम्। शेषे षष्ठीति षष्ठीसमासः। साधुशब्दानुशासकं व्याकरणमधिकृतं प्रस्तुतं वेदितव्यमिति भाष्यार्थः। तदनेन भाष्येण साधुशब्दानुशासनपरत्वं व्याकरणस्योक्तम्। ननु किमिदं साधुशब्दानुशासकत्वम्। किं साधून् गवादिशब्दानेव प्रयुञ्जीत नासाधून् गाव्यादिशब्दानिति प्रयोगनियमविधायकत्वं उत गवादिशब्दा एव साधवः न गाव्यादय इति साधुस्वरूपव्युत्पादकत्वम्। आद्येपि अर्थावबोधाय प्रयोगनियमः उत धर्माय। नाद्यः असाधुभ्योऽप्यर्थस्यावगम्यमानत्वेन नियमविधानानर्थक्यात्। न द्वितीयः साधुशब्दप्रयोगनियमस्य धर्मार्थत्वबोधकप्रमाणाभावेन तस्य विधातुमशक्यत्वात्।

तथाहि न तावत्प्रत्यक्षादिप्रमाणं भवितुमर्हति, प्रत्यक्षादेर्धर्मागोचरत्वात्। नाप्यागमः अनुपलम्भात्। एकःशब्दस्सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवति इत्यस्य च स्वर्गसाधनताबोधकत्वेन साधुशब्दप्रयोगनियामकत्वाभावात्। न च वेदवाक्यानि प्रतिपदं कल्पयितुं शक्यन्ते। अनन्तवाक्यपाठासम्भवात्। अपठितानां च मूलत्वानुपपत्तिः। नित्यानुमेयत्वे अन्धपरम्परापातात्। न च साधूनेव प्रयुञ्जीतेत्येकेनोपलक्षणेन सर्वेषामुपसङ्ग्रहः। गवाद्यनुगतगाव्यादिव्यावृत्तसाधुत्वानिरुक्तेः। अत एव गवादय एव साधवः न गाव्यादय इति साधुशब्दस्वरूपव्युत्पादकत्वलक्षणं साधुशब्दानुशासकत्वमिति द्वितीयः पक्षोऽपि निरस्तः। तस्माद्व्याकरणस्य साधुशब्दानुशासकत्वमुक्तमनुपपन्नम्।

तथा अप्रमाणमपि व्याकरणम्। आगमविरोधात् परस्परविरोधात् पूर्वोत्तरविरोधान्निष्प्रयोजनत्वाच्च। तथाहि दृष्टं सामेत्यधिकृत्य 'वामदेवाड्ड्यड्ड्याविति' सूत्रेण वामदेवर्षिणा

दृष्टं सामेत्यस्मिन्नर्थे वामदेव्यशब्दो व्याकरणेन व्युत्पाद्यते। आगमेन च "आपो वा ऋत्वियमार्छँस्तासां वायुः पृष्ठे व्यवर्तत ततो वामं वसु समभवत् तन्मित्रावरुणावपश्यतां तावब्रूताम्। वामं वा इदं देवेष्वजनीति तस्माद्वामदेव्यमि"ति रजोधर्मं प्राप्ताभिरद्भिः वायोः सङ्गमे सति उत्तमं वसु धनं जातं तच्च देवता संबंधि जातं तेनेदं वामदेव्याख्यं सामेति वामदेव्यशब्दः अन्यथा व्युत्पाद्यते इति आगमविरोधः। एवं कलिना दृष्टं सामेत्यस्मिन्नर्थे कालेयशब्दः कलेर्ढगिति व्याकरणेन व्युत्पाद्यते। आगमेन च यदकालयत्तत्कालेयस्य कालेयत्वमित्यन्यथा व्युत्पाद्यत इत्यागमविरोधः। तथा वृद्धिरादैच् इत्यादि पाणिनीयसूत्रसन्दर्भमात्रस्य व्याकरणशब्दार्थत्वे प्रजापतिर्वै यत्किञ्चन मनसादीधेत् होत्राय वृतः कृपयन्नदीधेत् अदीधयुर्दाशराज्ञे वृताद्य इत्याद्यागमविरोधः। तत्र च अदीधेत् अदीधयुरिति गुणो दृश्यते। व्याकरणे च दीधीवेवीटां इति गुणः प्रतिषिध्यत इत्यस्ति विरोधः। ननु युक्तमदीधेरित्यागमविरोध इति। अदीधयुरित्येतद्विरोधस्तु नोपपद्यते। क्ङिति चेति प्रतिषेधविषयेप्यारभ्यमाणेन जसिचेति गुणेन अजुहवुरित्यादौ क्ङिति चेति निषेधमिव दीधीवेवीटामिति निषेधमपि बाधित्वा प्रवर्तमानेन अदीधयुरित्युपपत्तेरिति चेन्न। तस्य गुणस्य येन नाप्राप्तौ यो विधिरारभ्यते स तस्यापवाद इति न्यायेन क्ङिति चेति निषेधः प्राप्त एव आरभ्यमाणस्य तद्बाधकत्वेऽपि अजुहवुरित्याद्युक्तोदाहरणे दीधीवेवीटामिति एतस्मिन्निषेधे अप्राप्तेऽपि आरभ्यमाणस्यैतन्निषेधबाधकत्वानुपपत्तेः। तस्मादुक्तादीधयुरित्यागमेनापि विरोध एव।

तथा अङ्गिरस्वदङ्गिरः, गायत्रेण छन्दसादङ्गिरस्वत्। अग्ने मनुष्वदङ्गिरः, मनुष्वदग्निं मनुना समिद्धमित्याद्यागमविरोधः। तत्र हि अङ्गिरो मनुः शब्दयोर्वतौ परतः स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां ससजुषोरुरिति सकारस्य रुत्वे अङ्गिरः शब्दे च हशि चेति रोरुत्वे आद्गुण इति गुणे च अङ्गिरोवन्मनुष्वदिति व्याकरणरीत्या भवितव्यम्। अन्यथा चागमे वर्तत इत्यागमविरोधः। तथा अयमग्नेजरिति। एतेनाग्ने ब्रह्मणा वावृधस्वेत्यागमविरोधः। तथा हि अत्रायमिति शब्दः अन्तोदात्तः एतेनेति शब्दः मध्योदात्तः अग्ने इति शब्दश्च पदकाले सर्वानुदात्तः। संहितायां तु स्वरितादिः एकश्रुत्यन्त इत्यागमे स्वरस्थितिः। व्याकरणरीत्या च अयमेतेन शब्दयोः सुबामन्त्रिते पराङ्गवत्स्वरे इत्यनेन पराङ्गवद्भावान्न हि स्वाङ्गं स्वव्यवधायकमिति न्यायेन अयमेतेन शब्दयोः अव्यवधायकत्वेन अग्नेशब्दस्य पदादिस्थत्वेन पदस्य, पदात्, अनुदात्तंसर्वमपदादौ, इत्यधिकृत्य आमन्त्रितस्य चेति विहितस्य आष्टमिकसर्वानुदात्तत्वस्य अप्रसक्त्या आमन्त्रितस्य चेति षष्ठाद्युदात्तत्वं स्यादित्यागमविरोधः। अथ सूत्रभाष्यवार्तिकात्मकग्रन्थसन्दर्भ एव व्याकरणं तर्हि मुनित्रयवचसां परस्परविरोधेनाप्रामाण्यम्। तथाहि सूत्रकारो हि अवश्यवक्तव्यं

प्रयोजनमनभिदधानः निष्प्रयोजनं व्याकरणं मन्यते । तदेतत्परस्परविरुद्धम् । एवं सूत्रकारः तुल्यताल्वादिस्थानाभ्यन्तरप्रयत्नानामेव वर्णानां तुल्यास्यप्रयत्नं सवर्णमिति सवर्णसंज्ञां विदधाति । वार्तिककारस्तु अतादृशयोरपि ऋऌवर्णयोः । तथा अन्तरं बहिर्योगोपसंव्यानयोः इति पुर्यपुरीसाधारणबाह्यपदार्थमात्रप्रतिपादकान्तरशब्दस्य सर्वनामसंज्ञां कामयते । अपुरीति च वक्तव्यमिति वदन् वार्तिककारस्तु नैतदभ्युपगच्छतीति विरोधः । तथा साधुशब्दप्रयोगे धर्म इति वार्तिककारोभ्युपगच्छति । अथवा पुनरस्तु ज्ञाने धर्म इति वदन् भाष्यकारस्तु साधुशब्दज्ञाने धर्म इत्यभ्युपगच्छतीति विरोधः । तथा लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेष्विति वार्तिकेन लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः क्रियते । किमिदं धर्मनियम इति । धर्माय नियमो धर्मनियमः धर्मप्रयोजनो वा नियमो धर्मनियमः प्रियतद्धिता हि दाक्षिणात्याः । यथा लोकवेदयोरिति प्रयोक्तव्ये यथा लौकिकवैदिकेष्विति प्रयुञ्जते । अथवा युक्त एवात्र तद्धितार्थः यथा लौकिकेषु वैदिकेषु च कृतान्तेषु, लोके तावदभक्ष्यो ग्रामकुक्कुटः अभक्ष्यो ग्रामसूकर इत्युच्यते । भक्ष्यं च नाम क्षुदुपघातार्थमुपादीयते । शक्यं चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम् । तत्र च नियमः क्रियते इदं भक्ष्यमिदमभक्ष्यमिति । तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति । समानश्च खेदविगमः गम्यायामगम्यायां च तत्र नियमः क्रियते इयं गम्येयमगम्येति । वेदे खल्वपि पयोव्रतो ब्राह्मणः, यवागूव्रतो राजन्य, आमिक्षाव्रतो वैश्य इत्युच्यते । व्रतं च नाम अभ्यवहारार्थमुपादीयते । शक्यं चानेन शालिमादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते । तथा बैल्वोवा खादिरो वा यूप इत्युच्यते । यूपो नाम पशुबन्धार्थमुपादीयते । शक्यं चानेन यत्किञ्चित्काष्ठमुच्छित्य अनुच्छित्य वा पशुरनुबन्धुम् । तत्र नियमः क्रियते । तथाग्नौ कपालान्यधिश्रित्य अनुमन्त्रयते भृगूणामङ्गिरसां तपसा तप्यध्वमिति । अन्तरेणापि मन्त्रं अग्निर्दहनकर्मा कपालानि सन्तापयेत् । तत्र नियमः क्रियते । एवं क्रियमाण अभ्युदयाय भवतीति । एवमिहापि समानायामर्थगतौ शब्देन चापशब्देन च धर्मनियमः क्रियते । शब्देनैवार्थोऽभिधेयो नापशब्देनेति । एवं क्रियमाणं अभ्युदयकारि भवतीति । भाष्येण चार्थप्रतिपादनसमर्थाश्शब्दा एव अत्र व्याकरणे व्युत्पाद्यन्त इत्यवगम्यते । तादृशाश्च वाक्यरूपा एव न पदरूपाः । तदुक्तं हरिणा—

‘ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकंबले । देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः ॥’ इति ।

तथा च वाक्यान्येवास्मिन् शास्त्रे व्युत्पाद्यन्ते न पदानीत्येतद्भाष्यवार्तिकबलादवगम्यते । शास्त्रे च सर्वत्र पदान्येव व्युत्पाद्यन्ते न वाक्यानि । उक्तं च भगवता भाष्यकारेण । वृद्धिसूत्रे संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते । तेषां यथेष्टमभिसंबन्धो भवतीति

तद्यथा आहर पात्रं पात्रमाऽ३रेति । तस्मात्प्रतिज्ञातवाक्यव्याकरणाकरणात् पदव्याकरणाच्च परस्परविरोधः । तथा वृद्धिरादैजिति सूत्रे आदैजिति समाहारद्वन्द्वाभ्युपगमे द्वन्द्वाच्चुदषहान्तात्समाहार इति सूत्रविरोधः । तथा हि अनेन सूत्रेण चवर्गदकारषकारहकारान्तात्समाहारद्वन्द्वात् अच्प्रत्ययो वाक्त्वचमित्याद्युदाहरणसिध्यर्थं तथा विधीयते । आदैजिति चवर्गान्तः समाहारो निर्दिश्यत इति विरोधः । एतद्दोषपरिजिहीर्षया इतरेतरद्वन्द्वाभ्युपगमे च द्व्येकयोर्द्विवचनैकवचने इति सूत्रविरोधः । तथा हि द्व्येकयोर्द्विवचनैकवचने इति सूत्रेण प्रकृत्यर्थगतद्वित्वबहुत्वप्रतिपादकेन धवखदिरौ धवखदिरपलाशा इत्याद्यर्थं द्विवचनबहुवचने विधीयेते । आदैजित्यत्रापि प्रकृत्यर्थयोर्द्वित्वाद्द्विवचनेन भवितव्यं, तथा च न कृतमिति विरोधः । तथा पक्षद्वयेपि चोः कुः इति सूत्रविरोधः । तथाहि चोः कुरिति सूत्रेण झलि परे पदान्ते चवर्गस्य कवर्गो विधीयते वाक् त्वगित्यादिसिध्यर्थम् । आदैजिति च पदान्ते चवर्गो निर्दिश्यत इति विरोधः । तथा इको गुणवृद्धी इति सूत्रे गुणवृद्धी इत्यंशस्य द्वंद्वे घीतिसूत्रविरोधः । तथा हि अनेन सूत्रेण द्वन्द्वसमासे घिसंज्ञकस्य पूर्वनिपातो विधीयते । हरिहरावित्यादिसिध्यर्थम् । गुणवृद्धी इत्यत्र च वृद्धिशब्दो घिसंज्ञकः पश्चात्प्रयुज्यत इति विरोधः । तथा निष्प्रयोजनमपि व्याकरणम् । न च साधुशब्दानुशासनं वेदरक्षोहलध्वसन्देहाश्च प्रयोजनानि संभवन्तीति वाच्यम् । शब्दानुशासनस्य सुखदुःखाभावान्यतररूपत्वाभावेन अप्रयोजनत्वात्, रक्षादीनां च स्वर्गाद्युपयोगिवेदस्वरूपतदर्थानुष्ठानाद्युपयोगित्वेन परम्परया पुरुषार्थत्वेन प्रयोजनत्वसंभवेऽपि अन्यथासिद्धत्वात् ।

तथाहि वेदतदर्थाभिज्ञगुरुशिष्यपरम्परयैव पाठक्रमस्येव वेदस्यापि रक्षा सिध्यतीति वेदरक्षाया अन्यथासिद्धिः । तथा मीमांसायां सौर्यादियागे अग्नये जुष्टं निर्वपामीत्यादिमन्त्रेषु अग्नय इत्यस्य स्थाने सूर्यादिवाचकश्चतुर्थ्यन्तः शब्दः सूर्यादिप्रतिपादनाय प्रयोक्तव्य इति द्वारान्तरसम्बन्धनिमित्तकान्यथाभावलक्षण ऊहः प्रतिपादित इति मीमांसया ऊहोऽप्यन्यथासिद्धः । किंच कल्पसूत्रतद्व्याख्यानतदनुक्रमणिकादौ ऊहो विस्पष्टमवगम्यते । कल्पसूत्रे तावदापस्तम्बाचार्यैः प्रोक्षणीरासादयेति मन्त्रः आज्येन दध्नो देहीति संप्रैषान्तं नमतीति सूत्रे आज्येन दध्नो देहीत्यूहेन पठितः । तथा बोधायनाचार्यैः स्रुवं स्वधितिं स्रुचश्च संमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीं सन्नह्याज्येन च दध्ना चोदेहीति ऊहेन पठितः । एवं तत्तद्भाष्येषु तत्तदनुक्रमणिकासु च ऊहेन मन्त्रपाठो विस्पष्टमवगम्यते इति ततोऽन्यथासिद्धिः । तथा लाघवमपि न प्रयोजनम् । अष्टाध्यायीपरिमितपाणिनिसूत्रतद्वार्तिकतद्भाष्यादिरूपव्याकरणस्यातिविस्तृतत्वेन लाघवासिद्धेः । असन्देहोपि न प्रयोजनम् । स्थूलपृषतीमनड्वाहीमित्यादौ सत्यपि व्याकरणे पूर्वपदान्तोदात्तता वा समासान्तोदात्ततावेति

सन्देहानिवृत्तेः । अथोपाध्यायोच्चारणादेव पूर्वपदान्तोदात्तत्वादिनिश्चयसंभवान्नायं सन्देह इति चेत्तर्हि बहुव्रीहिरयं न कर्मधारय इत्युपाध्यायवचनादेवार्थविशेषनिश्चयसंभवेनासन्देहोऽप्यन्यथासिद्ध एवेति न प्रयोजनम् । तस्मात्साधुशब्दानुशासकत्वानिर्वचनादागमविरोधादिना अप्रमाणत्वाच्च साधुशब्दानुशासकं व्याकरणमित्युक्तमनुपपन्नमिति चेदुच्यते :—

सूत्रभाष्यवार्तिकग्रन्थसन्दर्भ एव व्याकरणम् । त्रिमुनि व्याकरणमिति वैयाकरणानां प्रसिद्धेः। तच्च प्रमाणं, महाजनपरिगृहीतस्मृतित्वात् मन्वादिस्मृतिवत् । तस्य च गवादय एव साधवो न गाव्यादयः, साधव एव प्रयोक्तव्या नासाधव इति नियमद्वयपरत्वं साधुशब्दानुशासकत्वम् । तत्राद्यो नियमो वाचनिकः । मृजेःप्रसङ्गे मार्ष्टिः साधुर्भवतीति भाष्यवचनात् । द्वितीयस्त्वार्थिक इति विवेकः । न चार्थावबोधायेत्यादिपूर्वोक्तविकल्पावकाशः । धर्माय नियम इति पक्षस्यांगीकारात् । नच मूलाभावः । मन्वादिवत्सकलवैदिकप्रत्ययिततरमुनित्रयप्रणीतत्वानुमितवेदमूलकत्वसंभवात् । नहि पाणिनिकात्यायनपतञ्जलिभ्योऽन्यः कश्चित्प्रत्ययिततरोऽस्ति । साधूनेव प्रयुञ्जीतेति विध्यनुमानान्नानन्तवाक्यप्रसक्तिः । सत्यानृतवदनवर्जनयोश्चाविगीतमेव शास्त्रीयत्वं । सत्यं वदेन्नानृतं वदेदिति श्रुतेः । सत्यं ब्रूयात्प्रियंब्रूयान्नब्रूयात्सत्यमप्रियं । प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः इति स्मृतेश्च । तच्च शब्दार्थभेदेन द्विविधं । तत्र यथैवार्थसत्यवचनं यथास्थितार्थकथनं धर्माय तथैव शब्दसत्यमपि यथावस्थितशब्दाविप्लुतशब्दोच्चारणमित्यर्थः । यथाचार्थानृतमन्यथावस्थितस्यान्यथावचनं प्रत्यवायाय तथा शब्दानृत मन्यरूपे वाचके सत्यन्यरूपोच्चारणमिति यावत् । नच सत्यानृतद्वैविध्येऽपि सत्यं वदेन्नानृतंवदेदितिविधिनिषेधगत सत्यानृतशब्दयोरेकैकार्थकत्वमेव नार्थद्वयपरत्वं, सकृच्छ्रुतस्योभयार्थत्वानुपपत्तेरिति वाच्यं । सत्यत्वं नामाबाधितार्थप्रतिपादकत्वं तदभावोनृतत्वं । प्रतिपादकत्वं चेह वृत्तिमुपजीव्य बोधकत्वं, तेन गाव्यादावर्थाबाधेऽपि तत्र वृत्तेरभावान्न सत्यत्वप्रसङ्गः । अर्थानृतस्थले वृत्या प्रतिपादकत्वसद्भावेऽपि अर्थस्याबाधितत्वाभावान्नातिप्रसङ्गः । एवंचानेन रूपेण शब्दार्थसत्यद्वयस्य क्रोडीकृतत्वेन उक्तदोषानवकाशात् । तदनेन वृत्या अबाधितार्थप्रतिपादकाः गवादिशब्दा एव प्रयोक्तव्याः नातादृशा गाव्यादिशब्दा इति प्रयोगनियमोऽवगम्यते ।

नच गाव्यादि व्यावृत्त गवाद्यनुगतसाधुत्वानिरुक्तिः, वाचकत्वं साधुत्वमिति तन्निर्वचनात् । ननु गाव्यादीनामपि अर्थप्रत्यय प्रयोगान्यथानुपपत्त्या वाचकत्वं वाच्यं । न च गौण्या लक्षणया वा तदुपपत्तिः तयोः शक्तिमूलकत्वादितिचेन्न । अन्यायश्चानेकशब्दत्वमिति न्यायेनैकस्यार्थस्यानेकशब्दवाच्यत्वानुपपत्तौ पाणिन्याद्यभियुक्ततरानादिप्रयोगानु-

सारेण गवादिशब्दानामेव वाचकत्वकल्पनेन गाव्यादीनां वाचकत्वभ्रमेण प्रयोगप्रत्यययोरुपपत्तेः। तथाहि केनचिद्गामानयेति प्रयोक्तव्ये करणापाटवादिना गावीमानयेति प्रयुक्ते श्रोतृपुरुषेण गोशब्दं प्रयोक्तुमुद्यतस्याशक्तिजोऽयं शब्द इति निश्चित्य सास्नादिमदर्थे आनीते व्युत्पित्सवस्तदुभयं व्यवहारं पश्यन्तो गावीशब्दस्यैव सास्नादिमदर्थे शक्तिं व्युत्पद्यन्त इति शक्तिभ्रमः। ननु अशक्तिजत्वं वा अन्यद्वा कोन्वत्र विशेषः? अशक्तिजत्वकल्पनस्यैवेष्टत्वेन लघीयस्त्वात्। उभयोरपि वाचकत्वे प्रयोगे विकल्पापत्तिः। सचाष्टदोषः। किंच गोशब्देन सास्नादिमानभिधीयत इति आप्तवाक्या द्वाचकत्वग्रहदशायामभिधानक्रियाद्वारा तत्कर्मकरणयोरैककर्म्यान्नियमः स्यादितिन्यायेन नियमरूपसंबन्धावगतिः। ततश्चगाव्यादेरपि सास्नादिमदर्थवाचकत्वस्वीकारे सास्नादिमत्कर्मकाभिधानक्रियायां गोशब्द एव करणमिति नियमस्य व्युत्पत्तिकालावगतस्य बाधः। करहस्तादिषु तु विशेषानवधारणादन्याय्याप्यनेकशब्दताङ्गीक्रियते। गाव्यादिषु तु अभियुक्ततरस्मरणतदभावाभ्यां विशेषावधारणमस्तीति न सर्वेषां वाचकत्वमिति। नचैवमपि टिधुभादि संज्ञास्वतिव्याप्तिः। तासां च साध्वसाधुबहिर्भूतत्वात्। तदुक्तं,

> यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिधुभादयः।
> अनपभ्रंशरूपत्वान्नास्त्यासामपशब्दता ॥
>
> हस्तचेष्टा यथा लोके तथा संकेतिता मताः।
> नासां प्रयोगेऽभ्युदयः प्रत्यवायोपि वा भवेत्। इति।

इति वाच्यम्। टिधुभादिसंज्ञानां हस्तचेष्टादिवत्संकेतितत्वेन तद्वत्प्रत्यायकत्वमात्र सद्भावेपि वाचकत्वे प्रमाणाभावात्।

नचैवं देवदत्तादिसंज्ञानामपि वाचकत्वं न स्यादिति वाच्यम्। तासां स्वरूपेण सादित्वेपि "द्वादशेहनि पिता नाम कुर्या"दिति शास्त्रविषयत्वेनानादित्वेन वाचकत्वस्य युक्तत्वात्। अत एव यास्त्वेता स्वेच्छया संज्ञा इति नामकरणादिशास्त्रमूलकानां स्वेच्छाकल्पितसंज्ञानामेवसाधुबहिर्भाव उक्तः न सर्वासां। वाचकत्वनियमेच स्मृतेः स्मृत्यन्तरं मूलं तस्याप्यन्यदित्यनादिरेषा स्मृतिपरम्परा। नचान्धपरस्परान्यायः। शब्दस्य शब्दान्तराद्विविक्तस्य तत्तत्कालीन सर्वपुरुषप्रत्यक्षत्वात्। तथाहि सर्वेऽपि स्वे स्वे काले गवादिशब्दान् प्रत्यक्षमेवोपलभन्ते। अतीतकाले च सतः पूर्वेभ्यो वृद्धेभ्यः श्रुत्वावधारयन्ति। सर्वकालमपि केचन वृद्धाः सम्भवन्तीति। नचैतावता सर्वस्मिन् काले शब्दस्वरूपप्रत्यक्षमात्रसिद्धावपि साधुत्वस्य प्रत्यक्षत्वासिद्धेः नान्धपरम्परापरिहार इति वाच्यम्। अभियुक्तस्मरणपरम्परया तत्तत्कालीनवृद्धप्रत्यक्षसध्रीचीनसास्नादिमदर्थेषु गवादिशब्दानां वाचकत्वरूपसाधुत्वस्य स्वध्यवसानत्वात्। गाव्यादिषु तु केवलप्रत्यक्षपरम्परासम्भवेऽपि अभियुक्त-

स्मरणाभावात् न साधुत्वनिश्चयः । अशक्तिजत्वस्यापि संभवादिति । तस्मान्नियमद्वय-परत्वलक्षणं साधुशब्दानुशासकत्वं व्याकरणस्य सिद्धं । यदुक्तं ततो वसु वामं समभवदित्या-द्यागमविरोधादप्रमाणमिति, तत्रोत्तरं तावता तावन्मात्रस्याप्रमाणत्वेऽपि तदितरांशप्रामाण्ये बाधकाभावात् । अन्यथा सर्ववेष्टनादिस्मृतीनां कासांचित् औदुम्बरीं स्पृष्ट्वोद्गायेदित्यागम-विरुद्धत्वेनाप्रमाणतया तदितरस्मृत्यंशाप्रामाण्यापत्तेः । यच्चोक्तं अङ्गिरस्वदंगिर इत्याद्यागम-विरोध इति, तन्न । तत्रांगिरोमनुःशब्दयोर्वतौ परतः स्वादिष्वसर्वनामस्थान इति पदसंज्ञाया नभोंगिरो मनुषां व त्युपसंख्यानमिति वार्तिकेन विशिष्य विहितया भसंज्ञया बाधात् तन्निमि-त्तक रुत्वोत्वयोरप्रसक्तेः । अयमग्नेजरिता एतेनाग्ने ब्रह्मणा इत्यत्रागमेनापि न विरोधः । तथाहि सुबामन्त्रिते परांगवत्स्वर इति सूत्रं हि षष्ठ्यामन्त्रितकारकवचनमिति वार्तिकेन एकवाक्यतामापन्नं सत् षष्ठ्यन्तमामन्त्रितार्थं प्रति यत्कारकं तद्वाचकं च यत्सुबन्तं तस्यैव पराङ्गवद्भावं विदधाति । उदाहृतमन्त्रयोश्चायं शब्दस्य एतच्छब्दस्य च षष्ठ्यन्तत्वाभावात् आमन्त्रितार्थकारकवाचकत्वाभावाच्च पराङ्गवद्भावाभावेन ताभ्यां व्यवहितस्याग्ने शब्दस्या-पादादिस्थत्वेनाष्टमिकनिघाते सति नागमविरोध इति ।

नापि प्रजापतिर्वै यत्किंचन मनसादीधेदित्याद्यागमविरोधः । दीधीवेव्योः छन्दो-विषयत्वाद्दृष्टानुविधित्वाच्छन्दसोदीधेददीधयुरिति गुणदर्शनादप्रतिषेध इति वार्तिकबलेन गुणनिषेधाभावोपपत्तेः । नचैवं सूत्रवार्तिकयोरेव परस्परविरोधः शङ्क्यः । सूत्रस्यादीध्यनमादी-ध्यकदित्यादि क्वाचित्काभिप्रायकत्वात् । तत्र च दीधीवेवीटामिति सूत्रे किमर्थमिदमित्याशंक्य आदीध्यनमादीध्यक आवेव्यनमावेव्यक इत्यादिभाष्ये प्रयोजनप्रतिपादनमेव प्रमाणं । एवं वार्तिकस्यापि तात्पर्यापर्यालोचनकृतसार्वत्रिकबुद्धिनिवृत्तिपरत्वात् । नापि परस्परविरोधो दोषः । न हि सूत्रकारेण प्रयोजनं नोक्तमित्येतावता निष्प्रयोजनत्वं व्याकरणस्य तदभिमतमिति वक्तुं शक्यते । तथा सति तदीयग्रन्थस्य उन्मत्तवचनवत्प्रेक्षावदनुपादेयतापत्तेः । किंतु स्प-ष्टत्वान्नोक्तं । भाष्यकारेण तु तदाविष्कृतमित्यविरोधः । साधुशब्दप्रयोगे धर्मः साधुशब्दज्ञाने धर्मः इति वदतोर्भाष्यकार वार्तिककारयोः परस्परविरोधादप्रामाण्यमित्यपि न । परस्परविरुद्धा-र्थकत्वेऽपि ग्रहणाग्रहणश्रुतिवदुदितानुदितश्रुतिवच्च विकल्पेन प्रामाण्योपपत्तेः । अथवा ज्ञाने धर्म इति वदतो भाष्यकारस्याप्येकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भव-तीति तदुदाहृतश्रुतिपर्यालोचनया ज्ञानपूर्वकप्रयोग एव धर्म इत्यभिप्रायोन्नयनान्न विरोधः । एवं अपुरीति वक्तव्यमिति वार्तिकस्य अन्तरं बहिर्योगोपसंव्यानयोरिति सूत्रस्थितान्तर-शब्दतात्पर्यग्राहकत्वान्नविरोधः । तथा वृद्धिरादैजिति सूत्रे आदैजित्यस्य समाहारद्वन्द्वपक्षे द्वन्द्वाच्चुदषहान्तात्समाहार इति सूत्रेणापि न विरोधः । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहावित्यत्र बहुव्रीहिग्रहणेन समासान्तविधेरनित्यताज्ञापनेन समासान्ताभावे आदैजिति निर्देशोपपत्तेः ।

इतरेतरयोगद्वन्द्वपक्षेऽपि द्व्येकयोरिति विहितस्य द्विवचनस्य सुपां सुलुक्पूर्वसवर्णाच्छेया-डाड्यायाजाल इति सूत्रेण लुकि आदैजितिनिर्देशोपपत्तेर्न द्व्येकयोरिति सूत्रविरोधः। एवं चोः कुरिति सूत्रविरोधोपि न। तद्विधौ पदस्येत्यनुवृत्तेः। आदैजित्येतस्य च अयस्मयादि-त्वेन अयस्मयादीनि छन्दसीति भत्वेन पदत्वाभावात्। नच भपदसंज्ञयोः समुच्चयः शङ्क्यः आकडारादेकासंज्ञेत्येकसंज्ञानियमात्। न च विनिगमनाविरहात्पदत्वं वा किं न स्यादिति वाच्यम्। परत्वेनानवकाशत्वेन च विनिगमनेन भसंज्ञया पदसंज्ञाया बाधनात्। नचायस्म-यादीनि छन्दसीति भसंज्ञा छन्दोमांत्रविषयिणी। नचेदं छन्दः अतः कथं भसंज्ञा स्यादिति वाच्यं। साङ्गवेदस्य छन्दस्त्वेन वेदाङ्गभूतव्याकरणस्यापि छन्दस्त्वात्। किंच छन्दोव-त्सूत्राणि भवन्तीति भाष्यकारवचनेनातिदेशतो भसंज्ञासंभवात्। नच भसंज्ञया पदसंज्ञायाबाधे वृद्धिरादैजदेङ्गुण इत्यत्र झलांजशोन्त इति जश्त्वमपि न स्यात्, तद्विधावपि पदस्येत्यनु-वृत्तेरिति वाच्यं। उभयसंज्ञान्यपि छन्दसि दृश्यन्त इति भाष्यकारवचनेन भपदसंज्ञयोस्सत्योः कुत्वाभावस्य जस्त्वस्यचोपपत्तेः। नचैवं पदत्वात्कुत्वं भत्वाज्जस्त्वाभाव इति वैपरीत्यं किं न-स्यादिति वाच्यं। छन्दसि दृष्टानुविधानाभ्युपगमेन जश्त्वकुत्वाभावयोरेव दर्शनेन वैपरीत्यस्य वक्तुमशक्यत्वात्। छन्दसि दृष्टानुविधानं च दीधीवेव्योः छन्दोविषयत्वात् दृष्टानुविधित्वा-च्छन्दस अदीधेददीधयुरिति गुणदर्शनादप्रतिषेध इति वार्तिकबलादवगम्यते इति वृद्धि-रादैजित्यस्य न चोः कुरिति सूत्रविरोधः। नापि द्वन्द्वे घीति सूत्रविरोधः। षष्ठीयुक्तः छन्दसि-वेत्यत्र वेति योगविभागेन सर्वेषां विधीनां छन्दसि वैकल्पिकत्वेन पूर्वनिपातनियमाभावपक्षे गुणवृद्धी इति निर्देशोपपत्तेः। पदद्वारा सर्वत्र वाक्यस्यैवानुशासनान्ना प्रतिज्ञात व्याकरणादि-दोषः। एवं निष्प्रयोजनत्वमप्यसिद्धं। साधुशब्दज्ञानस्य तत्पूर्वकप्रयोगस्य वा प्रयोजनत्वात्। नच तयोरपुरुषार्थत्वान्न प्रयोजनत्वमिति वाच्यं। पुरुषार्थस्वर्गसाधनत्वेन तयोः पुरुषार्थत्व-सम्भवात्। तयोश्च स्वर्गसाधनत्वे श्रुतिः एकश्शब्दः सम्यग्ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके काम-धुग्भवतीति। एतन्मूलकमेव कात्यायनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्यते—

यस्तु प्रयुङ्क्ते कुशलो विशेष शब्दान्यथावद्व्यवहारकाले।
सोनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः॥ इति।

अत्र अवैयाकरणः कर्ता सामर्थ्याद्बोध्यः। रक्षादीन्यपि प्रयोजनानि। तथा च महाभाष्यं:— कानिपुनरस्य प्रयोजनानि? रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति। अस्यार्थः प्रयुज्यते प्रव-र्त्यतेऽनेनेति करणल्युडन्तः प्रयोजयतीति कर्तृव्यत्ययाद्बाहुलकात् कर्तरिल्युडन्तो वा। उभ-यथापि प्रवर्तकविधिपरः। पुल्लिङ्गः प्रयोजनशब्द एकः। फलपरः क्लीबोऽपरः। उभयो-र्नपुंसकमनपुंसकेनेति नपुंसकैकशेषे एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनमुत्तरे एक-वचनं च बोध्यं। तत्रागमः प्रवर्तकःऊहलाघवासन्देहास्तु फलानीति विवेकः। तत्र प्रवर्तक

आगमो ब्राह्मणेन निष्कारणो धर्म इत्यादिर्व्याख्यातः। फलानि व्याख्यायन्ते। तत्र रक्षा वेदसंरक्षणम्। तथाहि भाषायामदृष्टा लोपागमविकाराः छन्दसि दृश्यन्ते, तेचानधीतव्याकरणैः केवलप्रयोगशरणैः प्रामादिकाः संभाव्येरन्। वैयाकरणस्तु लक्षणदर्शी लक्षणतो लोपागमविकारादीन् विज्ञाय छन्दसि यथादृष्टमेव रूपं स्थापयति। तत्र लोपोदाहरणं त्मना देवेषु विविदे मितद्रुः। त्मना आत्मनेत्यर्थः। मन्त्रेष्वाङ्‌या देरात्मनइत्याकारलोपः। आगमो यथा, देवासः ब्राह्मणासः आज्यसेरसुगिति असुगागमः। लोपागमौ यथा। देवा अदुहे, अदुहतेत्यर्थः। दुहेर्लङो झस्यादादेशे कृते लोपस्तआत्मनेपदेष्विति तलोपः। बहुलं छन्दसीति रुडागमः। एतेन नाशिरं दुद्रे, विश्वा इत्ते धेनवो दुद्रे इत्यादि लडन्तमपि व्याख्यातं। वर्णविकारो यथा। गृभ्णामि ते सौभगत्वाय। हृगृहोर्भः छन्दसि हस्येति वक्तव्यमिति भकारः। प्रत्ययोऽपि छान्दसोस्ति। यथा उद्ग्राभं च निग्राभं चेति। उदिग्रह इति सूत्रे उद्ग्राभ निग्राभौ छन्दसि स्रुगुद्यमन निपतनयोरिति वचनात् उन्निपूर्वाद्ग्रहेर्घञ्। तत्र उत्पूर्वात्सूत्रेण लोकेऽपि सिद्धो घञ्। निपूर्वात्तु वार्तिकोक्तः। छन्दस्येव सन्निवेशविशेषयुक्ताः पात्रविशेषाः स्रुचः। इह तु जुहूपभृतोरेव ग्रहणम्। उद्ग्राभं चेति जुहूमुद्यच्छति। निग्राभं चेति उपभृतं नियच्छतीति वचनाद्भकारादेशः। प्राग्वदूहोपि प्रयोजनं। तथाहि यत्राङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः यथा दर्शपूर्णमासौ। यत्र नोपदिष्टं सा विकृतिः यथा सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इति विहितो यागः। तत्रवैकृतस्य विधेः विषयीभूतायां भावनायां करणीभूते यागे उपकारकाकांक्षायां तन्मुखेन प्राकृतमङ्गजातं प्राप्यते वैदिके करणे तादृशानामेवाङ्गानामपेक्षितत्वात् तेषामेव प्रकृतौ क्लृप्तसामर्थ्यत्वात्तद्विशेषस्यचैकदेवतात्वादिना शक्यज्ञानत्वात्। तस्मात्प्रकृतिवद्विकृतिः कर्तव्येति पूर्वमीमांसायां स्थितं। तत्र यस्याङ्गस्य प्रकृतौ उपकारः क्लृप्तः तस्य विकृतावसंभवे निवृत्तिः। यथा प्रकृतावघातस्य वैतुष्यमुपकारतया क्लृप्तम्। तस्य कृष्णलेष्वसम्भवात् अवघातस्य निवृत्तिः। मन्त्रा अप्यङ्गं। तेषां चानुष्ठेयप्रकाशनं कार्यम्। तत्र प्रकृतौ यस्य मन्त्रस्य यदभिधेयं तच्चेद्विकृतौ साकल्येन नास्ति तदा कृत्स्नस्य मन्त्रस्य निवृत्तिः। यथा अवरक्षोदिवस्सपत्नं वध्यासमित्यवघातमन्त्रस्य कृष्णलेषु। यस्यत्वेकदेशस्याभिधेयं नास्ति तस्य तावन्मात्रं निवर्तते। यथा—अग्नये जुष्टं निर्वपामीति मन्त्रस्यावयवभूतं देवताभिधायि पदं; औषधद्रव्यकत्वेन एकदेवताकत्वेन च आग्नेयविकारभूते सौर्ये निवर्तते। अग्निशब्दे लुप्तद्वारकतया निवर्तमाने एकारोपि निवर्तते। अकारान्ते इतरप्रकृतिसन्निधानेनैव एकारस्य संप्रदानं वाच्यं। अकारान्तात्तु यशब्दस्य। ततश्चतुर्थ्यन्तं सूर्यायेत्याद्युदात्तं अग्नय इत्यस्य मध्योदात्तस्य स्थान ऊह्यं। सोऽयं प्रकृत्यूहः। लिङ्गस्य क्वचिदूहः। यथा देवीरापश्शुद्धास्थेत्यप्सु विनियुक्तो मन्त्र स्तस्याज्ये ऊहः देवाज्यशुद्धमसीति। प्रत्ययमात्रस्य क्वचिदूहः। यथा

माभेर्मासंविकृथा इतिपुरोडाशमन्त्रावदानमन्त्रः तस्य धानासूहः। माभैष्ट मासंविविजिध्वं इत्यादिरिति हरदत्तादयः। याज्ञिकास्तु संविग्ध्वमित्यूहमाहुः। युक्तं चैतत् प्रकृतावनिट्कतया विजिर्पृथग्भाव इत्यस्य प्रयोगः, नतु ओ विजी भयचलनयोरित्यस्येत्यवधारणात्।

लाघवमपि प्रयोजनं। तथाहि— अध्यापनं ब्राह्मणस्य वृत्तिः। तन्निर्वाहश्च वैदुष्याधीनः। वैदुष्यं च साध्वसाधुशब्दविवेकः। सच न प्रतिपदपाठादिना सम्भवति। शब्दानामानन्त्यात्। तदुक्तं महाभाष्य एव। किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः गौरश्वः पुरुषो हस्ती शकुनिर्मृगोब्राह्मण इत्येवमादयः शब्दाः पठितव्याः? नेत्याह। अनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते :—बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदविहितानां शब्दानां शब्दपारायणं प्रोवाच नचान्तं जगामेति। बृहस्पतिश्च वक्ता, इन्द्रश्चाध्येता, दिव्यं च वर्षसहस्रमध्ययनकालः नचान्तं जगाम। किं पुनरद्यत्वेऽल्पायुषि प्रजायां यश्चिरं जीवति स वर्षशतं जीवति। चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति। आगमकालेन स्वाध्यायकालेन प्रवचनकालेन संव्यवहारकालेनेति। तत्रागमकालेनैव कृत्स्नमायुः पर्युपयुक्तं स्यात्। तस्मादनभ्युपाय एव शब्दानां प्रतिपत्तौ प्रतिपदपाठ इति। तस्मादुत्सर्गापवादरूपलक्षणद्वारा तद्बोधने लाघवम्। अन्यथा तु गौरवम्। असन्देहोऽपि प्रयोजनं तथाहि स्थूलपृषतीमनड्वाहीमालभेत इति श्रूयते। तत्र सन्देहः कर्मधारयो बहुव्रीहिर्वेति। तत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्वती बिन्दुमती गौरेवाभिधीयते। स्थूलापि सैव, बिन्दूनां तु स्थौल्यं तानवं वा यथा तथास्तु। बहुव्रीहौ तु स्थौल्यं पृषत्वं च। गौस्तु स्थूला कृशावेत्यनादरः। तत्र लकारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनोति। ततश्च निश्चयेन प्रतिबन्धात्संशयानुत्पादः। स एवासन्देहः। अर्थाभावेऽव्ययीभावादसन्देहमितिस्यादिति चेन्न। पर्यायेणाव्ययीभावतत्पुरुषसंज्ञाद्वयमपि भवतीत्यव्ययं विभक्तीत्यादिसूत्रे भाष्यादावुक्तत्वात्। अत एवोभयथापि मुनिप्रयोगः। अद्रुतायामसंहितमिति, अथासंहिता इति च। एवमिन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामीत्यादावपि स्वरेणैव बहूव्रीहिनिर्णये इन्द्रपीताधिकरणमवैयाकरणान्प्रति सार्थकं। कृत्वाचिन्तान्यायेनवा नेयमिति। तदेवं रक्षोहलाघवासन्देहाख्यानि चत्वारि फलानि व्याख्यातानि।

आगमस्तु प्रवर्तक इत्युक्तं, प्रयोजनान्तराण्यपि सन्ति व्याकरणस्य। तथाहि तत्रतावद्वैयाकरणाध्येतुः सुशब्दापशब्दविवेचनद्वारापशब्दप्रयोगवर्जनेनापशब्दप्रयोगप्रयुक्तपराभवाभावः प्रयोजनम्। अपशब्दप्रयोगात्पराभवे श्रुतिः "तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुस्तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा एष यदपशब्द इति

ब्राह्मणम्। तत्र न म्लेच्छितवा इत्यस्य विवरणं नापभाषितवा इति। उभयत्रापि कृतार्थे तवै-केत्केन्यत्वन इति तवै प्रत्ययः। धातूनामनेकार्थतया निन्दावचनान्म्लेछधातोः कर्मणि घञ्। तेन म्लेछो ह वा एष यदपशब्द इत्यपशब्दसामानाधिकरण्यं न विरुध्यते। अत्र न म्लेच्छितव्यमिति निषेधस्य ते सुरा इत्यादिरर्थवादः। अत्र है है प्रयोगे हैहयोरिति प्लुते प्लुतत्वप्रयुक्तप्रकृतिभावे च कर्तव्ये तदकरणं म्लेच्छनमित्येके। वाक्ये द्विर्वचनं म्लेच्छनमित्यपरे। सर्वस्य द्वे इत्यत्र पदग्रहणस्य चोदितत्वादिति तेषां भावः।

ननु नेदं शास्त्रीयं द्विर्वचनं किंतु तात्पर्यद्योतनार्थं ऐच्छिकः पुनः प्रयोगः। अत एव शास्त्रसमाप्तिद्योतनाभिप्रायेण वाक्यस्यापि द्विरुक्तिः कृता शारीरकमीमांसायामाचार्यैः अनावृत्तिः शब्दादनावृत्तिः शब्दादितीति चेत्तर्ह्याम्रेडितस्वरानुपपत्तिः। यदि तु तत्र आम्रेडितस्वरनिर्मुक्त एव पाठस्तर्हि अरिशब्दे रेफस्य लत्वादपशब्द इति ध्येयम्। इदं च भाष्यादौ प्रसिद्धश्रुतिपाठमनुसृत्य व्याख्यातं। अयं च पाठः कस्यांचिच्छाखायामन्वेषणीयः माध्यन्दिनानां। शतपथब्राह्मणे तु हेलवो हेलव इति पठित्वा तस्माद्ब्राह्मणो न म्लेछेदिति पठ्यते। तत्र यकारस्य स्थाने वकारोपशब्द इति स्पष्टमेव। तथा स्वाभिमतार्थप्रतिपादनोपयुक्त स्वरविशेषादि विशिष्टशब्दस्वरूपज्ञापनेन तद्विरुद्धार्थ प्रतिपादनोपयुक्तस्वरान्तरादिविशेषविशिष्टशब्दप्रयोग वर्जनद्वारा अनिष्टनिवृत्तिरपि प्रयोजनम्। स्वरान्तरादिविशिष्टशब्दप्रयोगादर्थान्तरप्रतीत्या अनिष्टं भवतीत्यत्र शीक्षावचनम्। मन्त्रो हीनः स्वरतोवर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् इति।

स्वरेण, स्वरतः, आद्यादित्वात्तसिः। मिथ्याप्रयुक्तः यदर्थप्रतिपादनाय प्रयुक्तः ततोर्थान्तरं स्वरवर्णदोषात्प्रतिपादयन्। अत एव तमर्थं नाहेत्यर्थः। वागेव बज्रः हिंसकत्वाद्यजमानं हिनस्तीति। यथाध्वर्युकृताद्धोमाद्यजमाने धर्मोत्पत्तिरेवमध्वर्युकृतापशब्दप्रयोगाद्यजमाने प्रत्यवाय इत्यर्थः। यथेत्युदाहरणे। इन्द्रशत्रुः, इन्द्रशत्रुशब्दः। इह किल विश्वरूपाख्ये त्वष्टुः पुत्रे इन्द्रेण हते सति कुपितस्त्वष्टा इन्द्रस्य हन्तारं वृत्राख्यं पुत्रमुत्पिपादयिषुराभिचारिकं यागं कृतवान्। तत्र च इन्द्रस्य शातयिता शत्रुर्हिंसक इति यावत्। तथाभूतस्सन्वर्धस्वेति प्रतिपादयितुं इन्द्रशत्रुर्वर्धस्वेति प्रयुक्तं। ण्यन्ताच्छतेरौणादिकः त्रुण् प्रत्ययः। प्रज्ञादिगणे निपातनाद्ध्रस्वत्वं। इन्द्रस्य शत्रुत्वस्य विधेयत्वान्न संबोधनविभक्तिः। तस्या अनुवाद्यविषयत्वात्। अत एव राजन् युध्यस्वेति राजा भव युध्यस्वेत्यनयोर्व्यवस्थयैव प्रयोगः। राजत्वस्य सिद्धत्वे संबोधनविभक्तिर्न तु विधेयत्वेऽपीति। एवं स्थिते इन्द्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्ते अन्तोदात्ते वक्तव्ये प्रमादादाद्युदात्तः किलोक्तः। तथा च पूर्वपदप्रकृतिस्वरेण बहुव्रीह्यर्थो लब्धः। इन्देर्धातोरौणादिकेन "ऋज्रेन्द्राग्रवज्रविप्रकुब्रक्षुरखुरभद्रोग्रभेर-

मेलशुक्रशुक्लगौरवप्रेरामालाः" इत्यनेन सूत्रेण रन्प्रत्यये कृते इन्द्रशब्द आद्युदात्तो व्युत्पादितः। तेनेन्द्र एवास्य हिंसकः सम्पन्न इति स्मृतीतिहासपुराणादिषु प्रसिद्धम्। तदिहोदाहरणतयोक्तम्।

स्यादेतत्। यज्ञकर्मण्यजपन्यूंखसामस्वित्येकश्रुत्येह भवितव्यम्। सा च तत्पुरुषबहुव्रीह्योरविशिष्टेति। अत्राहुः नञिवयुक्तमन्यसदृशे तथाह्यर्थगतिरिति, वार्तिकबलेन अब्राह्मणो-ब्राह्मण इवेत्यादौ ब्राह्मणसदृशस्यैव क्षत्रियादेः प्रतीतिर्नतु लोष्टकुड्यादेरितिवदिहापि अजपन्यूंखसामस्विति जपादिपर्युदासेन तत्सदृशेषु मन्त्रेष्वेवैकश्रुतिर्विधीयते। पुत्रवधजनितकोपाविष्टेन त्वष्ट्रा इन्द्रवधोद्देशेन स्वेच्छया प्रयुज्यमानश्च स्वाहेन्द्रशत्रुरित्यादिर्मन्त्रो न भवति। तदुक्तं भेदलक्षणे जैमिनिना अनाम्नातेष्वमन्त्रत्वमिति। आपस्तम्बश्चाह अनाम्नातास्त्वमन्त्राः यथा प्रवरोहनामधेयग्रहणानीति। अत एव मन्त्रो हीन इति पाठस्य शीक्षायां प्रसिद्धत्वेऽपि ऊह्यमानस्यामन्त्रतया यथेन्द्रशत्रुरिति वाक्यशेषोसङ्गतः स्यात्। अतो मन्त्रशब्द इह शब्दमात्रपर इत्याशयेन भाष्येदुष्टश्शब्द इति पठितम्। ननु स्वाहेन्द्रशत्रुर्वर्धस्वेति वेदे पठ्यत इति चेत्सत्यम्। शब्दप्रयुक्तशब्दानुकरणस्य पाठेऽपि अनुकार्यस्य लौकिकत्वानपायात्। नन्विन्द्रशत्रुशब्दस्य त्वष्टृप्रयुक्तस्य लौकिकत्वे कथं स्वरप्रयुक्तयोर्गुणदोषयोः प्रसक्तिः स्वरस्य वेदमात्रविषयत्वादिति चेन्न। स्वरविधौ छन्दोधिकाराभावात्। एतावानेव हि भेदः यच्छन्दसि त्रैस्वर्यमेकश्रुतिश्च व्यवस्थयाश्रीयते। लोकेत्वैच्छिको विकल्पः। अत एवैकश्रुत्या सूत्रपाठः त्रैस्वर्येण वेति शाब्दिकानां प्रवादः।

तथाचाधीतस्य वेदस्यार्थानवबोधप्रयुक्त नैष्फल्याभावोऽपि प्रयोजनम्। वेदस्यार्थानवबोधे नैष्फल्यमित्यत्र श्रुतिः"

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥

निगदेन पाठमात्रेण। शुष्कैध इति सान्तेन क्लीबेनैधः शब्देन अकारान्तेन वा पुल्लिङ्गेन निर्वाह्यं। न ज्वलति न प्रकाशते, निष्फलं भवतीत्यर्थः।

निरुक्ते तु अथापि ज्ञानप्रशंसा भवति अज्ञाननिन्दाचेत्युपक्रम्य "स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मे"ति मन्त्रमुदाहृत्य यद्गृहीतमविज्ञातमित्यादि पठितं। तत्रापि गृहीतं शब्दतः अविज्ञातन्त्वर्थतः प्रकृति प्रत्यय दिविभागेनेत्यादि। शेषं प्राग्वत्। तथा प्रत्यभिवादनप्रकाराज्ञानप्रयुक्तस्त्रीतुल्यत्वाभावोऽपि प्रयोजनम्। प्रत्यभिवादनप्रकारानभिज्ञस्य स्त्रीतुल्यत्वे स्मृतिः।

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत् ॥

अयमहमित्यस्यानुकरणं चानितिपरमिति गतिसंज्ञा। ततो गतिसमासेपि अस्य-वामीयमित्यादाविव अनुकरणत्वादेव लुङ् न ।

तथा पौनराधेयिकेषु प्रयाजेषु सविभक्तिकत्वकरणोपयोगिविभक्तिज्ञानमपि प्रयोजनम्। प्रयाजेषु सविभक्तिकत्वकरणे च याज्ञिकाः—'प्रयाजाः सविभक्तिकाः कार्याः' इति। यद्यपि प्रकृतौ प्रयाजमन्त्राः सविभक्तिका एव पठ्यन्ते, तथापि यद्याधानानन्तरं यजमान उद्रव्यथावान् स्याद्यदिवा संवत्सरमध्ये तस्य महती विपत्स्यात्तदा नैमित्तिकीं पुनराधेयेष्टिं विधाय तत्रेदमाम्नातं 'सविभक्तिकाः' इति। तत्र केवलविभक्तेः प्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते। सा चाग्निशब्दरूपा नतु याकाचित्। निरुक्ते दैवताकाण्डे 'अथ किंदेवताः प्रयाजानूयाजाः' इति प्रश्नमवतार्य नव प्रयाजा अनूयाजाश्च केवला इत्यादिमन्त्रवर्णमुदाहृत्य आग्नेया इति तु स्थितिरित्युपसंहारात्। तस्मादादितः चतुर्षु प्रयाजेषु चतस्रो विभक्तयोऽग्निशब्दप्रकृतिकाः पठ्यन्त इत्यादि श्रौतग्रन्थेषु द्रष्टव्यम्। यद्यपि बोधायनसूत्रे 'अग्न आयाहि वीतये' इत्याहुतौ वैनमित्यादिब्राह्मणोक्तान् विभक्तिसंज्ञकान् पञ्च मन्त्राननुद्रुत्य प्रयाजमन्त्रैर्वषट्कारविधानान्न व्याकरणप्रसिद्धस्वादिविभक्तिज्ञानापेक्षा तथापि सूत्रान्तरेषु स्वादिविभक्तीनामेव विधानादस्ति तज्ज्ञानापेक्षा। उक्तं चापस्तम्बाचार्यैः—'अग्नाग्नेग्नावग्नेग्निनाग्नेग्निमग्न' इति चतुर्षु प्रयाजेषु चतस्रो विभक्तीर्दधाति नोत्तम इति। तथाऽऽश्वलायनाचार्यैरपि 'तस्य प्रयाजानूयाजान्विभक्तिभिर्यजेत्समिधो अग्नेग्न आज्यस्य व्यन्तु तनूनपादग्न आज्यस्य वेत्विलो अग्न आज्यस्य व्यंतु बर्हिरग्न आज्यस्य वेत्वि'त्यादि। तथान्यत्रापि —'यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधाति स आर्त्विजीनः' इति। पदं पदमिति संख्यैकवचनाच्च वीप्सायामिति शस्। स्वर उदात्तादिरक्षरो व्यञ्जनसहितोच्। ऋत्विजमर्हतीत्यार्त्विजीनो याजकः। "यज्ञर्त्विग्भ्यां घखञा"विति सूत्रेण 'यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानं' इति वार्तिकेन च खञ्। यजने याजने च विदुष एवाधिकारः। तच्च वैदुष्यं व्याकरणाधीनमिति भावः। उक्तानि प्रयोजनान्यन्यानि च महाभाष्ये दर्शितानि।

तथाहि— इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः,

दुष्टश्शब्दः, यदधीतं, यस्तु प्रयुङ्क्ते, अविद्वांसः, विभक्तीः कुर्वन्ति, यो वा इमां, चत्वारि, उत त्वः, सक्तुमिव, सारस्वतीं, दशम्यां पुत्रस्य, सुदेवो असि वरुण इति। तेऽसुराः हेलयो हेलय इति कुर्वन्तः पराबभूवुः। तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः म्लेच्छा माभूमेत्यध्येयं व्याकरणम्। तेऽसुराः।

'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्स्वरतोपराधात् ॥' इति।

दुष्टाञ्छब्दान्मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्। दुष्टश्शब्दः। यदधीतम्।

यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

तस्मादविज्ञातमर्थं माधिगीष्महीत्यध्येयं व्याकरणम्।

यस्तु प्रयुङ्क्ते कुशलो विशेषशब्दान्यथावद्व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः ॥

कः? वाग्योगविदेव। कुत एतत्? यो हि शब्दान् जानाति अपशब्दानप्यसौ जानाति। यथैवहि शब्दज्ञाने धर्मः एवमपशब्दज्ञाने अधर्मः। अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दाः अल्पीयांसः शब्दाः। एकैकस्य बहवोऽपभ्रंशाः। तद्यथा—गौरित्येतस्य शब्दस्य गावी गोणी गोता गोपोतलिकेत्येवमादयोऽपभ्रंशाः। अथ योऽवाग्योगविदज्ञानं तस्य शरणम्। विषम उपन्यासः। नात्यन्ताज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्नेव ब्राह्मणं हन्यात्सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्। एवं तर्हि सोनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। कः? अवाग्योगवित्। अथ यो वाग्योगवित् ज्ञानं तस्य शरणम्। क्व पुनरिदं पठितं? भ्राजा नाम श्लोकाः। किंच भोः श्लोका अपि प्रमाणं? किंचातः? यदि प्रमाणम् अयमपि प्रमाणं भवितुमर्हति।

'यदुदुम्बरवर्णानां घटीनां मण्डलं महत्।
पीतं न गमयेत्स्वर्गं किं तत् क्रतुगतं नयेत् ॥' इति।

प्रमत्तगीत एष तत्रभवतः। यस्त्वप्रमत्तगीतस्तत्प्रमाणं। यस्तु प्रयुङ्क्ते। अविद्वांसः।

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।
कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्॥

स्त्रीवन्माभूमेत्यध्येयं व्याकरणम्। अविद्वांसः। विभक्तीः कुर्वन्ति। याज्ञिकाः पठन्ति प्रयाजाः सविभक्तिकाः कार्या इति। नचान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। अतोऽध्येयं व्याकरणम्। विभक्तीः कुर्वन्ति। यो वा इमां पदशः स्वरशोक्षरशो वाचं विदधाति स आर्त्विजीनः। आर्त्विजीनास्स्यामेत्यध्येयं व्याकरणम्। यो वा इमाम्। चत्वारि।

'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ आविवेश॥' इति।

चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः। त्रयो अस्य पादाः, त्रयो अस्य कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे, द्वौ शब्दात्मानौ नित्यः कार्यश्च। सप्त हस्तासो अस्य, सप्त विभक्तयः। त्रिधा बद्धो वृषभो रोरवीति। त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसि च। वृषभो वर्षणात्। रोरवीति शब्दं करोति। कुत एतत्? रौतिः शब्दकर्मा। महो देवो मर्त्याँ२ आविवेश। महो देवः शब्दः। मर्त्याँ मरणधर्माणो मनुष्याः तानाविवेश। महता देवेन नः साम्यं स्यादित्यध्येयं व्याकरणम्। अपर आह—चत्वारि वाक्परिमिता पदानि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताः तानि विदुर्ब्राह्मणा ये मनीषिणः। मनस ईषिणो मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति। न निमिषन्ति न चेष्टन्ते। चत्वारि। उत त्वः।

'उत त्वः पश्यन्न ददर्श वाचं उत त्वः पश्यन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः॥'

उतत्वः अपि खल्वेकः पश्यन्नपि, न पश्यति। शृण्वन्नपि न शृणोत्येनाम्। अविद्वांसमाहार्धम्। उतो त्वस्मै तन्वं विसस्रे, तनुं विवृणुते। जायेव पत्य उशती सुवासाः। तद्यथा जाया पत्ये कामयमाना सुवासाः स्वात्मानं विवृणुते एवं वाक् वाग्विदे स्वात्मानं विवृणुते। वाङ्नो विवृणुयादित्यध्येयं व्याकरणम्।

सक्तुमिव ।

'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रासखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि' ॥

सक्तुस्सचतेर्दुर्धावो भवति । कसतेर्वा विपरीतात् । विकसितो भवति । तितउ परिपवनं भवति । ततवद्वा तुन्नवद्वा । यत्र धीराः ध्यानवन्तः मनसा ज्ञानेन वाचमक्रत वाचमकृषत अत्रासखायः सख्यानि जानते । अत्रासखायः सन्तः सख्यानि जानते, क्व? य एष दुर्गमो मार्गः एकगम्यो वाग्विषयः । के पुनस्ते? वैयाकरणाः । कुत एतत्? भद्रैषां लक्ष्मीर्निहिताधिवाचि । भद्रा ह्येषां लक्ष्मीर्निहिताधिवाचि । वाच्यधि लक्ष्मीः लक्षणाद्भासमानात्परिवृढा भवति । सक्तुमिव । सारस्वतीं । याज्ञिकाः पठन्ति । आहिताग्नि-रपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति । प्रायश्चित्तीया माभूमेत्यध्येयं व्याकरणम् । सारस्वतीं । दशम्यां पुत्रस्य । याज्ञिकाः पठन्ति – दशम्युत्तरकालं जातस्य पुत्रस्य नाम दध्यात् घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकं अनरिप्रतिष्ठितं तद्धि प्रतिष्ठितं भवति द्व्यक्षरं चतुरक्षरं वा कृतं कुर्यान्न तद्धितमिति । नचान्तेरण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुं । दशम्यां पुत्रस्य । सुदेवो असि वरुण यस्य ते सप्त सिन्धवः । अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव । सुदेवो असि वरुण सत्यदेवो असि यस्य ते सप्त सिन्धवः सप्त विभक्तयः अनुक्षरन्ति । काकुदं तालु । काकुर्जिह्वा सास्मिन्नुद्यत इति काकुदम् । सूर्म्यं सुषिरामिव । तद्यथा शोभनामूर्मिं सुषिरां अग्निरन्तः प्रविश्य दहति । एवं तव सप्त सिन्धवः सप्त विभक्तयः ताल्वनुक्षरन्ति तेनासि सत्यदेवः । सत्यदेवाः स्यामेत्यध्येयं व्याकरणं इति ।

एवं च प्रमाणभूतस्य साधुशब्दशासकत्वं युक्तमेव । तथा हनुमतो बहुव्यवहारेऽपि अपशब्दलेशाभावे कार्त्स्न्येन व्याकरणश्रवणस्य बहुधा श्रवणस्य च हेतुत्वमुक्तम्, तद्युक्तमेव । कथमन्यथा एकशेषात्मनेपदादिव्यवस्था समासकारक, सन्, कृदुणादि, स्त्रीप्रत्यय, तद्धितसन्धिस्वरालुक्, पुंवद्भाव, लोपागमविकारादिषूत्सर्गापवादजटिलस्य व्याकरणशास्त्रस्य सकृच्छ्रवणेन एकदेशश्रवणेन वा बहुव्यवहारे सुशब्दापशब्दपरिज्ञानं स्यात् । 'परिपठतः किंचिदपि प्रकृतिर्भवति प्रमाद' इति न्यायात् । अत एव 'कष्टोभिः कष्टं व्याकरणं' इति वदन् भाष्यकारः व्याकरणशास्त्रस्य सकृच्छ्रवणेन दुरवगाहत्वमाह ।

न मुखे नेत्रयोर्वापि ललाटे च भ्रुवोस्तथा।
अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित्॥

अनेन वर्णोच्चारणसमये मुखनेत्रादिविकारो वर्ज्य इति सूचितम्। तथा च नारदशीक्षायां—

'नच प्रकम्पयेद्विद्वान् गात्रस्यावयवान् क्वचित्।
कूर्मोंगानीव संहृत्य चेष्टामिष्टिं दिशन्मनः॥

स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद्बुधः।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते॥

गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः'॥ इति।

'शिरःकम्पं विहायैव स्वरन्यासो विधीयता'मिति च।

अविस्तरमसन्दिग्धमविलम्बितमव्ययम्॥

अविस्तरं शब्दप्रपञ्चेन अल्पार्थप्रतिपादनं विस्तरः, तद्रहितम्। सन्दिग्धत्वादयो वर्ज्या दोषाः। ते च पाणिनीयशीक्षायामभिहिताः।

'उपांशु दुष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रकीर्णम्।
निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यम्॥

शङ्कितं भीतमुद्धृष्टं अव्यक्तमनुनासिकम्।
काकस्वरं शीर्षगतं तथा स्थानविवर्जित'मिति॥

महाभाष्येऽपि 'संवृतः कलो ध्मात एणीकृतोंबुकृतोर्धकृतो ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विन्नो रोमश' इति। अपर आह—

'ग्रस्तं निरस्तं निहितावलम्बितांबूकृतं ध्मातमथो विकम्पितम्।
संहृष्टमेणीकृतमर्धकं द्रुतं संकीर्णमेताः स्वरदोषभावना'॥ इति।

व्याकृतं च कैयटेन-ऊकारादीनां सन्ध्यक्षराणां हि संवृतत्वं दोषः। कालः— स्थानान्तरनिष्पन्नः, काकलीत्वेन प्रसिद्धः। ध्मातः, श्वासभूयिष्ठतया ह्रस्वो दीर्घ इव

लक्ष्यते । एणीकृतो विद्दिष्टः अविशिष्टः किमयमोकारः अथौकार इति यत्र सन्देहः । अम्बूकृतो व्यक्तोप्यन्तर्मुखमिव श्रूयते । अर्धकृतो दीर्घोऽपि ह्रस्व इव । ग्रस्तः, जिह्वामूलेन गृहीतः अव्यक्त इत्यपरे । निरस्तः, निष्ठुरः । प्रगीतः, सामवदुच्चरितः । उपगीतः, समीपवर्णान्तरगीत्या अनुरक्तः । क्ष्विन्नः, कम्पमानः इव । रोमशो गम्भीरः । निहितो रूक्षः । अवलंबितो वर्णान्तरसंभिन्नः । सन्दिष्टो वर्धित इव । विकीर्णो, वर्णान्तरे प्रसृतः । एकोऽप्यनेकनिर्भासीत्यपरे । स्वरदोषभावना इति स्वरदोषगात्राणि अनन्ता हि दोषा अशक्तिप्रमादकृता इति । ग्रस्तं अविभक्तिकोच्चारणम् । निरस्तं विश्लेषितसंयोगम् । अंबूकृतं सनिष्ठीवमिति तन्त्रवार्तिकटीकायामिति । अविलम्बितमित्यनेन मध्यमा वृत्तिरुक्ता । तथा शीक्षान्तरे —

> 'अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ।
> शिष्याणामुपदेशार्थं कुर्याद्वृत्तिं विलंबिताम् ॥' इति ।

उरःस्थं कण्ठगं वाक्यम् इत्यनेन उरःकण्ठादिस्थानानि प्रतिपादितानि । तथाच नारदशीक्षायां 'उरःकण्ठः शिरश्चेति त्रीणि स्थानानि वाङ्मये ।' इति । शब्दोत्पत्तिप्रकारः स्थानं चोक्तं तैत्तिरीयप्रातिशाख्ये —— अथ शब्दोत्पत्तिः वायुशरीरसमीकरणात्कण्ठोरसोः सन्धाने तस्य प्रातिश्रुत्कानि भवन्ति । उरः कण्ठः शिरो मुखं नासिके इति । तच्च त्रिभाष्ये व्याख्यातम् । उक्तो वर्णसमाम्नायः तेषां वर्णानां कीदृशं करणं कथं वा तदुपलब्धिरित्याकाङ्क्षानन्तरं तन्निरूप्यत इत्यानन्तर्यार्थोऽथशब्दः । अथवा इतः उत्तरं यदुच्यते तच्छब्दोत्पत्तिरित्येतदधिकृतं वेदितव्यमित्यधिकारार्थः । शब्दो नाम ध्वनिः वर्णानामकारादीनां उपादानकारणम् । तदुत्पत्तिर्जन्म उपलब्धिर्वा । यथा खननादुदकस्य । सेयमारभ्यत इति सूत्रार्थः । मध्यदेशे च शब्दोत्पत्तिर्भवति । तथाच वाग्गेयकारः —

> आत्मा विवक्षमाणो हि मनः प्रेरयते मनः ।
> देहस्थवह्निमाहन्ति स प्रेरयति मारुतम् ॥
>
> ब्रह्मग्रन्थिस्थितः सोऽथ क्रमादूर्ध्वपदे चरन् ।
> नाभिहृत्कण्ठमूर्धास्येष्वाविशन्नध्वति ध्वनिम् ॥
>
> नादोतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।

इति पञ्चाभिधां धत्ते पञ्चस्थानस्थितः क्रमात् ॥

व्यवहारेऽप्यसौ त्रेधा हृदि मन्द्रोऽभिधीयते ।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥ इति ।

शीक्षायामपि —

'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥

मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् ।
प्रातःसवनयोगं तच्छन्दो गायत्रमाश्रितम् ॥

कण्ठे मध्यन्दिनयुतं मध्यमं त्रैष्टुभानुगम् ।
तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥

सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः ।
वर्णान् जनयते तेषां विभागः पञ्चधा स्मृतः ॥' इति ।

वायुशरीरसमीरणात्कण्ठोरसोस्सन्धाने। वायुश्च शरीरं च वायुशरीरे, तयोः समीरणं तस्मात्। अन्ये त्वाहुः— वायोश्शरीरे सतस्समीरणं तस्माच्छब्दोत्पत्तिरिति। तत्रेत्थं समासः— राजदन्तादित्वाच्छरीरशब्दस्य परनिपातः। शरीरे यो वायुस्तस्य तस्मात्। अस्मिन्मते वायोस्समीरणकर्तृत्वमेव नतु कर्मत्वम्। तस्य प्रातिश्रुत्कानि भवन्ति उरः कण्ठः शिरो मुखं नासिका इति। तस्य प्रकृतस्य शब्दस्य उरःप्रभृतीनि स्थानानि प्रातिश्रुत्कानि भवन्ति। प्रतिश्रुत् प्रतिध्वनिः तत्संबन्धीनि प्रातिश्रुत्कानि। न चात्रोक्तः शब्दोत्पत्तिक्रमः वर्णस्थानकरणनियमश्च वैदिकशब्दविषय एव शीक्षादीनां वेदाङ्गत्वादिति वाच्यं, लौकिकवर्णोच्चारणेऽपि तेषामपेक्षितत्वात्। अत एवोक्तक्रमेण शब्दोत्पत्तौ पुरुषस्यानवधानेनापराधे सति उच्चार्यमाणाश्शब्दाः अपशब्दा एव जायन्ते इत्युक्तं व्याकरणाधिकरणे शाबरभाष्ये।

तथाहि — 'शब्दप्रयत्ननिष्पत्तेरपराधस्य भागित्वम्। महता प्रयत्नेन शब्द उच्चारिते वायुर्नाभेरुत्थित उरसि विस्तीर्णः कण्ठे विपरिवृत्तः मूर्धानमाहत्य वक्त्रे विचरन् विविधान् शब्दानभिव्यनक्ति। तत्रापराध्येवोच्चारयिता। यथा शुष्के पतिष्यामीति

कर्दमे पतति, सकृदुपस्पृशामीति द्विरुपस्पृशति। ततोपराधात्प्रवृत्ता गाव्यादयो भवेयुर्न नियोगतो विच्छिन्नपारंपर्या एवेति।

मध्यमे वर्तते स्वर इत्यनेन षष्ठं वाचः स्थानमुक्तम्। स्थानभेदाश्चोक्ताः प्रातिशाख्ये — उपांशुध्वाननिमदोपशब्दिमन्मन्द्रमध्यताराणि। करणवदशब्दममनःप्रयोगमुपांशु। अक्षरव्यञ्जनानामनुपलब्धिर्ध्वानः। उपलब्धिर्निमदः। सशब्दमुपशब्दिमदुरसि मन्द्रं कण्ठे मध्यं शिरसि तारमिति। विवृतं चैतत्त्रिभाष्यरत्ने — उपांशुध्वाननिमदोपशब्दिमन्मन्द्रमध्यताराणि। उपांश्विति प्रथमं वाचः स्थानम्। ध्वानमिति द्वितीयम्। निमदमिति तृतीयम्। एवमितराण्यपि। नामतः सप्तैतानि स्थानानि जानीयात्। उपरितनसूत्रमारभ्य प्रत्येकमेतेषां लक्षणं वक्ष्यते। करणवदशब्दममनःप्रयोगमुपांशु। नास्ति शब्दो ध्वनिरित्यशब्दम्। मनसा प्रयोगो मनःप्रयोगः। नास्ति मनःप्रयोगोऽस्मिन्नित्यमनःप्रयोगम्। वाचः स्थानमीदृशमुपांश्वित्युपदिश्यते। तत्र करणवदिति तूष्णींभावनिवृत्त्यर्थम्। अशब्दमिति शब्दस्याल्पतार्थम्। अमनःप्रयोगमिति उदात्तादीनां सांकल्पिकप्रयोगप्रतिषेधार्थम्। अक्षरव्यञ्जनानामनुपलब्धिर्ध्वानः। अक्षराणि स्वराणि अक्षराणां व्यञ्जनानां च अनुपलब्धिर्ध्वानो नाम द्वितीयं वाचः स्थानम्। उपांशुलक्षणेत्यनुपलब्धौ सत्यां पुनर्वर्णनं अशब्दोपलब्धिविधानार्थम्। अक्षरव्यञ्जनानां भेदेन ग्रहणं आभीक्ष्ण्यार्थम्। अत्यन्तानुपलब्धिरित्यर्थः। उपलब्धिर्निमदः। अक्षरव्यञ्जनानां विसर्जनीयादीनां उपलब्धिर्निमदो नाम तृतीयं वाचः स्थानं भवति। सशब्दमुपशब्दिमत्करणवता शब्देन अक्षराणां व्यञ्जनानां यत्रोपलब्धिर्भवति तत्स्थानमुपशब्दिमदिति वेदितव्यम्।

उरसि मन्द्रम्। कण्ठे मध्यम्। शिरसि तारम्। यत्रोरसि स्थाने प्रयोग उपलभ्यते। तन्मन्द्रं पञ्चमं वाचः स्थानम्। यत्र कण्ठस्थाने प्रयोग उपलभ्यते तन्मध्यमं नाम षष्ठं वाचः स्थानम्। यत्र शिरस्स्थाने प्रयोग उपलभ्यते तत्तारं नाम सप्तमं वाचः स्थानम्। एतेष्वादितश्चतुर्णां 'ध्वानेनोपांशु वा पत्नीः संयाजयन्ती'त्यादिना यज्ञादिषु प्रयोगो द्रष्टव्यः। मन्द्रं प्रातस्सवन उरसि प्रयुज्यते। मध्यमं माध्यन्दिने सवने। तारं तृतीयसवने। शीक्षा चैवं भवति —

'प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन।

मध्यन्दिने कण्ठगतेन चैव क्रौञ्चाह्वसंक्रोशनसन्निभेन ॥
तारं तु विद्यात्सवने तृतीये शिरोगतं तच्च तदा प्रयोज्यम् ।
मयूरहंसान्यभृतस्वनानां तुल्येन नादेन शिरोगतेन' ॥ इति ।

आपस्तम्बोऽप्याह—मन्द्रेण प्रागाज्यभागाभ्यां प्रातःसवने च मध्यमेन प्राक् स्विष्टकृतो माध्यन्दिने च क्रुष्टेन शेषे तृतीयसवने च वाक्सन्द्रवश्च तद्वदिति । **आश्वलायनोऽपि**—'अतो मन्द्रेणोर्ध्वं च शंयुवाकात् मध्यमेन हवींष्यास्विष्टकृत उत्तमेन शेष' इति ।

संस्कारक्रमसम्पन्नामद्रुतामविलम्बिताम् ।
उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ॥

अत्र संस्कारशब्देन संस्क्रियन्ते प्रयोगार्हतया निरूप्यन्ते वर्णानि पदानि वा एभिरिति व्युत्पत्त्या सूत्राण्युच्यन्ते । तत्क्रमसम्पन्नत्वं वाचः शास्त्रसिद्धक्रमप्रवृत्त-सूत्रशिक्षितपदवर्णक्रमोपेतत्वम् । तथा च क्रमशास्त्रं **तैत्तिरीयप्रातिशाख्ये**—तत्तत्पूर्वं पूर्वं प्रथममिति । तस्य व्याख्यानम्—तत्र संहिताविधाने पूर्वं पूर्वं पदं सूत्रं च प्रथमं कर्तव्यं यथा 'भक्ष आ इहि' इत्यत्र दीर्घं समानाक्षरे सवर्णपर इति दीर्घः, भक्षा इहीति स्थिते इवर्णपर एकारमिति एकारे कृते भक्षेहीति भवति । अन्यथा एहीति कृत्वा भक्षशब्देन सन्धीयमाने भक्षैहीति स्यात् । तच्चानिष्टं । पूर्वपदकर्तव्यत्वे एतदुदाहरणम् । पूर्वसूत्रकर्तव्यत्वेऽपि वदामः । यथा 'षट्ग्रामनिष्पूर्वे इति नकारस्य णत्वे कृते उत्तमपर उत्तमं सवर्गीयमित्यनेन टकारस्य णत्वे सति **षण्णवत्या** इति भवति । अन्यथा उत्तमपर उत्तममिति सूत्रे प्रथमं प्रवृत्ते सति षन्नवत्या इति स्यात्त-च्चानिष्टम् । यथावा, वषट्स्वयमभिगूर्तायेत्यत्र टनकारपूर्वश्च वकारः प्रथम ऊष्मपरो द्वितीयमिति सूत्रद्वयं प्रसक्तम् । तत्र पूर्वत्वाट्टनकारपूर्व इत्येतदेव कर्तव्यं, अन्यथा वटस्वयमिति स्यात्तच्चानिष्टम् । अथवा इमं भविष्यामीत्यत्र उपसर्गनिष्पूर्वोनुदात्ते पदे स्वरपूर्वं व्यञ्जनमित्यादिसूत्रं च प्रसक्तम् । तत्र द्वित्वसूत्रप्राथम्ये विश्श्यामिति स्यात्त-न्माभूदिति षत्वमेव प्रथमं कर्तव्यम् । पूर्वं पूर्वमिति वीप्सा सर्वत्रैतमर्थं समर्थयते । एवं 'परनित्यान्तरङ्गापवादानामुत्तरमुत्तरं बलीयः' 'पूर्वत्रासिद्धं' 'विप्रतिषेधे परं कार्यं' इत्यादिव्याकरणशास्त्रबोधितक्रमप्रवृत्तसूत्रशिक्षितत्वमपि द्रष्टव्यम् ।

प्रातिशाख्येऽपि —

क्रमविक्रमसंपन्नामद्रुतामविलम्बिताम् ।
नीचोच्चस्वारसंपन्नां वदेद्धृतवतीं समाम् ॥ इति ।

अस्यार्थः — क्रमविक्रमाभ्यां संपन्नां, क्रमो द्वित्वं, विक्रमस्तु स्वरितयोर्मध्ये यत्र नीचं स्यादित्युक्तलक्षणः । अद्रुतामत्वरिताम् । अविलम्बिताममन्दाम् । नीचोच्चस्वारसंपन्नां, अनुदात्तोदात्तस्वरितसहिताम् । धृतवतीं, प्रचयवतीम् । समामुदात्तादिन्यूनातिरेकरहितां, वदेद्ब्रूयाद्वृत्तिमित्यर्थः ।

अनया चित्रया वाचा त्रिस्थानव्यञ्जनस्थया ।
कस्य नाराध्यते चित्तमुद्यतासेररेरपि ॥

अनेन पूर्वोदाहृतगुणसमष्टिविशिष्टशब्दोच्चारणेन श्रोतृचित्तवशीकरणमैहिकफलमुक्तम् । आमुष्मिकमपि सम्यगुच्चारणानुच्चारणयोः समीचीनतद्विपरीतलक्षणं फलमुक्तं शीक्षासु । सम्यगनुच्चारणे विपरीतफलं तावत् —

उदात्तो ब्रह्मजातिः स्यान्नीचो राजन्य उच्यते । स्वरितो वैश्यजातिः स्यात्प्रचयः शूद्र ईरितः ॥
वर्गाणां प्रथमा वर्णाः स्वराश्च ब्रह्मजातयः । द्वितीयाश्च तृतीयाश्च चतुर्थाः क्षत्रजातयः ॥
अन्तस्थाश्चोत्तमाश्चैव वैश्याः खलु समीरिताः । अनुस्वारो विसर्गश्च ह्यूष्माणश्शूद्रजातयः ॥
यज्जातिवर्णस्खलनं तज्जातिहननं भवेत् । गोकर्णाकृतिहस्ते तु निर्दिशेद्दक्षिणे स्वरम् ॥
अंगुलीषु च सर्वासु नयेदङ्गुष्ठमेव च । तर्जन्यादि कनिष्ठादि तथैवानामिकान्त्यकम् ॥
मध्यमांगुलिमध्यं स्यादुदात्तादिस्वरास्पदम् । उच्चारणे हि वर्णानां सामग्री या समीरिता ।
अन्यूनाधिकभीतस्सन्नुच्चरेद्ब्रह्म भक्तितः । व्याघ्री यथा हरेत्पुत्रं दंष्ट्राभ्यां न च पीडयेत् ॥
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् । नातिव्यक्तं नचाव्यक्तं एवं वर्णानुदीरयेत् ।
पयःपूर्णमिवामत्रं हरन्धीरो यथामति । उच्चरेत्परया भक्त्या सर्वकालमतन्द्रितः ॥
विश्रमः पदमध्ये च नेंग्यमध्ये विधीयते । वाक्यान्ते च पदान्ते च विश्रमस्तु विधीयते ॥
पदान्तस्य नकारस्य यवहेषु परेषु च । तयोर्नकारयाद्योश्च संयुतत्वं न विद्यते ॥
हस्ताद्भ्रष्टः स्वराद्भ्रष्टो वर्णात्कालात्तथार्थतः । प्रयोगाच्च परिभ्रष्टो न वेदफलमश्नुते ॥
हस्तहीनं तु योऽधीते स्वरवर्णार्थवर्जितः । ऋग्यजुस्सामभिर्दग्धो वियोनिमधिगच्छति ॥ इति ।

सम्यगुच्चारणे तु समीचीनं फलम् —

हस्तेन वेदं योधीते स्वरवर्णार्थसंयुतः। ऋग्यजुस्सामभिः पूतो ब्रह्मलोके महीयते ॥
स्वरवर्णान् स्फुटं मत्वा सम्यग्यश्च समुच्चरेत्। अत्युत्कृष्टफलं तस्य तल तत्र समीरितम् ॥
गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च। लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥
स्वरितोदात्तनीचत्वं श्वासो नादोङ्गमेव च। एतत्सर्वं तु विज्ञेयं छन्दोभाषामधीयता ॥
पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः। स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥ इति।

एवंविधो यस्य दूतो न भवेत्पार्थिवस्य तु।
सिध्यन्ति हि कथं तस्य कार्याणां गतयोऽनघ ॥

एवंगुणगणैर्युक्तो यस्य स्यात्कार्यसाधकः।
तस्य सिध्यन्ति सर्वार्था दूतवाक्यप्रचोदिताः ॥ इति।

अनेन गुणाढ्यो दूतः कार्यसाधक इत्युक्तम्। दूतश्च सन्देशहरः, 'स्यात्सन्देशहरो दूतः', **इत्यमरकोशात्। पुराणसारेऽपि** —

मेधावी वाक्पटुः प्राज्ञः परचित्तपरीक्षकः।
धीरो यथोक्तवादी च दूत इत्यभिधीयते ॥ इति।

सच त्रिविधः — उक्तार्थपरित्यागी यथोक्तकारी, सामर्थ्यवशेनोक्तस्यानुक्तस्यापि राजहितस्य साधक इति। तथा च **कामन्दके —**

विशिष्टार्थो विप्य तथा राजशासनवाहकः।
[निसृष्टार्थो मितार्थश्च तथा शासनवाहकः।]

सामर्थ्योत्पादिता [सामर्थ्यात्पादतो] हीनो दूतस्तु त्रिविधः स्मृतः ॥ इति।

एवंविधोऽपि पुनर्द्विविधः प्रच्छन्नप्रकाशभेदात्।

तथा च **कामन्दके —**

'प्रकाशश्चाप्रकाशश्च चारस्तु द्विविधः स्मृतः।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूत उच्यते ॥'

तद्गुणाश्चोद्योगे —

'अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम् ॥' इति ।

राजधर्मेऽपि —

'कुलीनः शीलसम्पन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी द्युतिमान् दूतः स्यात्सप्तभिर्गुणैः ॥' इति ।

पुनरपि प्रशस्ताप्रशस्तभेदेन द्विविधः । तत्र प्रशस्तो **मनुना** दर्शितः —

अनुरक्तश्शुचिर्दक्षः स्मृतिमान्देशकालवित् ।
वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते ॥ इति ।

अप्रशस्तः **पुराणसारे** —

यो धूल्यक्षरवीक्षणं न कृतवान् स्वप्नेऽपि नाधीतवान्
वेदे कंचन किंच शास्त्रपदवीगन्धं च न घ्रातवान् ।
विस्मृत्यापि च काव्यनाटकपदं न स्पृष्टवान् नष्टधी-
र्हा कष्टं त्रिविचेष्टितं क्षितिपतेः कोऽप्येष दूताधमः ॥ इति ।

अग्रे विनीतः परुषी परोक्षे क्रूराभिसन्धौ कुरुतेऽभिलाषम् ।
वस्तुष्वशेषेष्वपहर्तुकामो दूताधमः पापफलेन लभ्यः ॥

नृसिंहपुराणेऽपि —

दूतास्सत्यपराङ्मुखाः कपटिनस्सन्त्यक्तसन्ध्याजपाः
क्षुद्रापध्वनिनीतिपाठनिरता रन्ध्रानुसन्धायिकाः ।
उत्कोचप्रवणाः स्वभावपिशुनाः साधुप्रजाबाधकाः
स्वाम्यर्थापहराः प्रतारणपराः कुर्युर्नृपं कुत्सितम् ॥ इति ।

प्रशस्तश्च राज्ञा संपादनीयः, तथाच **मनुः** —

दूतं चैव प्रकुर्वीत सर्वशास्त्रविशारदम् । इङ्गिताकारचेष्टज्ञं शुचिं दक्षं कुलोद्गतम् ॥ इति

दूतस्य स्वरूपं, कर्तव्यं, ज्ञातव्यं च दर्शितं **कामन्दके** —

प्रगल्भः स्मृतिमान् वाग्मी शस्त्रे शास्त्रे च निष्ठितः । अभ्यस्तकर्मा नृपतेर्दूतो भवितुमर्हति ॥
संभक्तः शासनाद्गच्छेत् गन्तव्यं तूत्तरोत्तरम् । स्वराष्ट्रपरराष्ट्राणामिति चेति च चिन्तयन् ॥
अन्तपालांस्तु कुर्वीत मित्राण्याटविकांस्तथा । जलस्थानानि मार्गांश्च विद्यात्स्वबलसिद्धये ॥
नाविज्ञातः परं शत्रोः प्रविशेच्च न संसदि । कालमीक्षेत कार्यार्थमनुज्ञातश्च निष्पतेत् ॥
सारवत्तां च राष्ट्रस्य दुष्कृतिं तृप्तिमेव च । छिद्रं शत्रोर्विजानीयात् कोशमित्रबलानि च ॥
उद्यतेष्वपि शस्त्रेषु यथोक्तं शासनं वदेत् । रागापरागौ जानीयात्प्रकृतीनां च भर्तरि ॥
द्यूतपक्षोपजापं च कुर्यादनभिलक्षितः । पृच्छयमानोऽपि न ब्रूयात्स्वस्वामिप्रकृतिच्युतिम् ॥
विद्याशिल्पोपदेशेन संश्लाघ्योभयवेतने । अनूद्य पश्चाज्जानीयात्तद्भर्तुश्चैव चेष्टितम् ॥
तीर्थ आश्रमवासे च शास्त्रविज्ञानहेतुना । तपस्विव्यञ्जनोपेतः सुचरो सह संवसेत् ॥
संतानं कुलमैश्वर्यं त्यागकत्थानसौष्ठवम् । स्वपक्षाभ्युदयाकाङ्क्षी देशकालावुदीक्षते ॥
कार्यं कालव्यपेतं च व्यक्तं तान्वा विनिष्पतेत् । तिष्ठन्नत्र विशेषेण भर्तुः सर्वं निवेदयेत् ॥
शिरोः शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम् । दुर्गकोशबलज्ञानं दूतपक्षोपसंग्रहः ॥
राज्यस्य पालनार्थाय स्वात्मसत्कारणं तथा । युद्धे सारचमूज्ञानं दूतकर्मेति कथ्यते ॥
दूतेनैव नरेन्द्रस्तु कुर्वीतारिविकर्षणम् । स्वपक्षे च विजानीयात्परदूतविचेष्टितम् ॥
तर्केंगितज्ञः श्रुतिमान् दुर्लंघ्यानुपरिक्रमः । क्लेशायाससहो दक्षः चरः स्यात्प्रतिपत्तिमान् ॥
निर्गच्छेयुर्विशेयुश्च सर्ववार्ताविदो ह्यलम् ।' इति ।

मनुरपि —

'अमात्ये दण्ड आयत्तो दण्डो वैनयिकी क्रिया ।
नृपतौ कोशराष्ट्रे तु दूते सन्धिविपर्ययौ ॥

दूत एवाभिसन्धत्ते संभिनत्ति च संहतान् ।
दूतस्तु कुरुते कर्म येन भिद्येत मानवः' ॥ इति ।

एवं चोक्तसर्वगुणोपपन्नो हनूमान्सर्वकार्यसाधक इति युक्तमेव । अत एव च **सुन्दरकाण्डे** स्वामिहितमनुक्तमपि साधितवानिति प्रतिपादितम् —

भूताश्चार्था विपद्यन्ते देशकालविरोधिताः । विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥

अर्थानर्थान्तरे बुद्धिर्निश्चितापि न शोभते । यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ॥
घातयन्ति हि कार्याणि दूताः पण्डितमानिनः । कार्ये कर्मणि निर्दिष्टो यो बहून्यपि साधयेत् ॥
पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति । न ह्येकस्साधको हेतुः स्वल्पस्यापीह कर्मणः ॥
यो ह्यर्थं बहुधा वेद स समर्थोऽर्थसाधने ।

इहैव तावत्कृतनिश्चयो ह्यहं यदि व्रजेयं प्लवगेश्वरालयम् ।
परात्मसम्मर्दविशेषतत्त्ववित् ततः कृतं स्यान्मम भर्तृशासनम् ॥

कथं नु खल्वद्य भवेत्सुखागतं प्रसह्य युद्धं मम राक्षसैस्सह ।
तथैव खल्वात्मबलं च सारवत् संमानयेन्मां च रणे दशाननः ॥

ततः समासाद्य रणे दशाननं समन्त्रिवर्गं सबलं प्रयायिनम् ।
हृदि स्थितं तस्य मतं बलं च वै सुखेन मत्वाहमितः पुनर्व्रजे ॥ इति ।

युद्धकाण्डेऽपि रामः उत्तममध्यमाधमदूतलक्षणकथनपूर्वकं उत्तमदूतो हनुमानित्याह —

यो हि भृत्यो नियुक्तस्सन् भर्त्रा कर्मणि दुष्करे । कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥
नियुक्तो यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥
नियुक्तो नृपतेः कार्यं न कुर्याद्यः समाहितः । भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥
तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता । न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥
अहं च रघुवंशश्च लक्ष्मणश्च महाबलः । वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षितः ॥ इति ।

तमभ्यभाष सौमित्रे सुग्रीवसचिवं कपिम् ।
वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिन्दम ॥

ततः —

यथा ब्रवीषि हनुमन् सुग्रीववचनादिह ।
तत्तथा हि करिष्यावो वचनात्तव सत्तम ॥

इति सौमित्रिणाभिहितो हनुमान् —

मनस्समाधाय जयोपपत्तौ सख्यं तदा कर्तुमियेष ताभ्याम् ।

चतुर्थे—

भव्यो राज्यागमस्तस्य सुग्रीवस्य महात्मनः।
यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतम्॥

अनेन समीचीनसहायलाभः कार्यसाधक इति सूचितम्। तथा च **उद्योगे** विदुरः—

संगृह्णीयादनुरूपान् सहायान् सहायसाध्यानि हि दुष्कराणि।

सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः।
अन्योन्यबन्धनौ चोभौ विनान्योन्यं न सिध्यतः॥ इति।

इति मनसि निश्चित्यैव युवयोर्महाप्रभावयोः कण्टकपाषाणादिदन्तुरितपंपाकानने सञ्चारः किमर्थ इति पृच्छन्तं आञ्जनेयं रामसञ्चोदितः सौमित्रिर्निखिलमुदन्तमित्थमाचचक्षे—

निखिलजनानन्दकरस्य यजनदानजपहोमादिभिस्सन्तर्पितनिखिलदेवादिगणस्य दशरथस्य राज्ञस्तनयेषु चतुर्षु अग्रजो महानुभावो रामाभिधः भार्यया सह वैदेह्या पित्राज्ञापरिपालनाय गहनं वनं प्रविष्टश्चोरेण रक्षसापहृतां भार्यां विचिन्वन् सुग्रीवेण तव कार्यसिद्धिर्भवितेति दनुवचनेन निखिलजगतीसंरक्षणविचक्षणोऽपि—

गुरुर्मे राघवस्सोऽयं सुग्रीवं शरणं गतः।
यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः॥
स रामो वानरेन्द्रस्य प्रसादमभिकांक्षति।

अनेन महद्भिः कार्यसमये निकृष्टानामपि प्रियवचनं वक्तव्यमिति सूचितम्। तथा च **कामन्दके**—

कार्यस्य हि गरीयस्त्वान्नीचानामपि कालवित्।
सतोऽपि दोषान् प्रच्छाद्य गुणानप्यसतो वदेत्॥ इति।

द्रोणपर्वण्यपि सात्यकिं प्रति महाराजस्य युधिष्ठिरस्य वचनम्—

यथा च केशवो नित्यं पाण्डवानां परायणम्। तथा त्वमपि वार्ष्णेय कृष्णतुल्यपराक्रमः॥
सोहं भारं समाधास्ये त्वयि तं वोढुमर्हसि। स त्वं भ्रातुर्वयस्यस्य गुरोरपि च संयुगे॥
कुरु कृच्छ्रे सहायार्थमर्जुनस्य नरर्षभ। त्वं हि सत्यव्रतश्शूरो मित्राणामभयंकरः॥

लोके विख्यायसे वीर कर्मभिस्सत्यवादिभिः । यो हि सैनेय मित्रार्थे युध्यमानस्त्यजेत्तनुम् ॥
पृथिवीं च द्विजातिभ्यो यो दद्यात्संगमो भवेत् । एवं त्वमपि धर्मात्मन्प्रयाचेऽहं कृताञ्जलिः ॥
पृथिवीदानतुल्यं स्यादधिकं वा फलं विभो । इति ।

तत्रैव स्थलान्तरे घटोत्कचं प्रति कृष्णप्रार्थनम् —

प्राप्तो विक्रमकालोऽयं तव नान्यस्य कस्यचित् । स त्वं निमज्जतां युद्धे पाण्डवानां प्लवो भव ॥
निशीथे सूतपुत्रेण शरवर्षेण पीडिताः । एते द्रवन्ति पाञ्चालाः सिंहेनेवार्दिता मृगाः ॥
एतस्यैवं प्रवृत्तस्य सूतपुत्रस्य संयुगे । निषेद्धा विद्यते नान्यस्त्वामृते भीमविक्रम ॥
संग्रामे युध्यमानस्य समस्तत्र न विद्यते । पाण्डवानां प्रभग्नानां कर्णेन निशि सायकैः ॥
मज्जतां धार्तराष्ट्रेषु भव पारं परंतप । इति ।

ततस्सुग्रीवोऽपि सीतागवेषणे साहाय्यमाचरिष्यतीति हनुमताभिहितस्सन्तुष्टहृदयस्सौमित्रिरित्थमकथयत् —

> कपिः कथयते हृष्टो यथायं मारुतात्मजः ।
> कृत्यवान्सोऽपि सन्तत: कृतकृत्योऽसि राघव ॥
>
> प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते ।
> नानृतं वक्ष्यते वीरो हनुमान्मारुतात्मजः ॥

अत्र मुखप्रसादादिना अनृताभावप्रतिपादनेन असत्यवक्तुर्नैतानि चिह्नानि भवन्ति किन्तु विपरीतान्येव भवन्तीति सूचितम् । तथा च **याज्ञवल्क्यः** —
देशाद्देशान्तरं याति सृक्किणीः परिलेढि च । ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते । वाक्चक्षू कूजयति च तथोष्ठौ निर्मृजत्यपि ॥
स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः । अभियोगेऽथ साक्ष्ये वा दुष्टस्स परिकीर्तितः ॥
इति । ततश्च रामेण कृताभ्यनुज्ञो हनुमान् परित्यज्य भिक्षुवेषं परिगृहीतनिजवेषः सानुजं रामचन्द्रं स्वस्कन्धमारोप्य सुग्रीवसमीपमानिनाय ॥

पञ्चमप्रभृतिसप्तमपर्यन्तेषु—

ततो विविधमखसन्तर्पितहुतवहस्य दशरथस्यात्मजो रामभद्रोऽयं पितृवाक्यपरिपालनाय परित्यज्य राज्यश्रियं सीतालक्ष्मणाभ्यां प्रविष्टदण्डकारण्यः दुरात्मना रक्षसा

छद्मना हृतदारस्तत्प्राप्तये प्लवगराजं त्वां सहायमिच्छति। तत्सख्यलाभेन त्वमपि संप्राप्तमनोरथो भविष्यसीति हनुमद्वचनाकर्णनेन सन्तुष्टस्सुग्रीवो राममिदमाह —

रोचते यदि वा सख्यं बाहुरेष प्रसारितः।
गृह्यतां पाणिना पाणिः मर्यादा बध्यतां ध्रुवा॥

ततो रामोऽपि —

एतत्तु वचनं श्रुत्वा सुग्रीवेण सुभाषितम्।
संप्रहृष्टमना हस्तं पीडयामास पाणिना॥

हृद्यं सौहृदमालम्ब्य पर्यष्वजत पीडितम्।
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम्॥

सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ।

अनेन पाणिग्रहणालिङ्गनादिपूर्वकमग्निसाक्षिकं सख्यं कर्तव्यमिति सूचितम्। अत **एवोत्तररामायणे** बालिरावणयोः अग्निसाक्षिकमेव सख्यकरणं प्रतिपादितम् —
ततः प्रज्वालयित्वाग्निं तावुभौ हरिराक्षसौ। भ्रातृत्वमुपसंप्राप्तौ परिष्वज्य परस्परम्॥

अन्योन्यालम्बितकरौ ततस्तौ हरिराक्षसौ।
किष्किन्धां विशतो हृष्टौ सिंहौ गिरिगुहामिव॥ इति।

त्वं वयस्योऽसि मे हृद्यो ह्येकं दुःखं सुखं च नौ।
सुग्रीवं राघवो वाक्यमिदमाह प्रहृष्टवत्॥

अनेन समानसुखदुःखित्वरूपो मित्रगुण उक्तः। तथाच **कामन्दके** —

शुचिता त्यागिता शौर्यं समानसुखदुःखता।
अनुरागश्च दाक्ष्यं च सत्यता च सुहृद्गुणाः॥ इति।

ततः प्रहृष्टः सुग्रीवः श्लक्ष्णं मधुरया गिरा।
प्रत्युवाच तदा रामं बाष्पव्याकुललोचनः॥

अहं विनिकृतो राम चरामीह भयार्दितः।
हृतभार्यो वने त्रस्तो दुर्गमेतदुपाश्रितः॥

सोऽहं त्रस्तो वने भीतो वसाम्युद्भ्रान्तचेतनः।

वालिना निकृतो भ्रात्रा कृतवैरश्च राघव ॥

वालिनो मे महाभाग भयार्तस्याभयं कुरु ।
कर्तुमर्हसि काकुत्स्थ भयं मे न भवेद्यथा ॥

इत्यभयं प्रार्थयमानस्य सुग्रीवस्य वचनमाकर्ण्य धर्मज्ञो रामभद्रस्तद्भयनिरसनाय प्रतिज्ञामकरोत् —

उपकारफलं मित्रं विदितं ते महाकपे ।
वालिनं तं वधिष्यामि तव भार्यापहारिणम् ॥ इति ।

तथा अष्टमेऽपि प्रतिज्ञा दृश्यते —

उपकारफलं मित्रमपकारोऽरिलक्षणम् ।
शरैर्विनिहतं पश्य विकीर्णमिव पर्वतम् ॥ इति ।

अन्यत्रापि —

तमद्य वालिनं पश्य क्रूरैराशीविषोपमैः । शरैर्विनिहतं भूमौ विकीर्णमिव पर्वतम् ॥ इति ॥

सुग्रीवप्रतिज्ञापि —

रसातलं वा वर्तन्तीं वर्तन्तीं नभसस्थले । अहमानाययिष्यामि तव भार्यामरिन्दम ॥ इति ।

रामशपथोऽपि —

मया च यदिदं वाक्यमभिमानात्समीरितम् ।
तत्त्वया हरिशार्दूल सत्यमित्यवधार्यताम् ॥
एतत्ते प्रतिजानामि सत्येनैव शपामि ते ॥ इति ।

अत्र च उपकारेणैव मित्रत्वम्, मित्रं प्रति च स्वदुःखं निवेदनीयं, येन तल्लघु भवति, तत्र च शक्तेन तद्दुःखनिरसनं करोमीति प्रतिज्ञा कर्तव्या, तत्र च प्रत्ययोत्पादनाय शपथोऽपि कर्तव्य इत्युक्तम् । उपकारेणैव मित्रत्वमित्येतत् **वामनपुराणे**—

परोऽपि हितकृद्बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥

अन्यत्रापि —

हस्ताविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अनिवेद्य हितं कुर्यात्तन्मित्रं मित्रमुच्यते ॥ इति ।

कामन्दकेऽपि —

स्वबन्धुर्योऽनुबध्नाति हेतिष्वत्यादरात्सदा ।
अनुरक्तं विरक्तं वा तन्मित्रमुपकारि यत् ॥ इति ।

सुहृदे दुःखनिवेदनं कर्तव्यमित्यत्र **वनपर्वणि** द्रौपदी —

सा तेऽहं दुःखमाख्यास्ये प्रणयान्मधुसूदन ॥ इति ।

निवेदिते लघु भवतीत्येतत्पाद्मे —

मित्रे निवेदिते दुःखे दुःखं तज्जायते लघु ।
भारो भारवहस्येव स्कन्धयोः परिवर्तने ॥ इति ।

सुहृद्दुःखापनोदनाय प्रतिज्ञाप्यर्जुनेन कृतेत्यवगतं **कर्णपर्वणि —**

एवमुक्तः प्रत्युवाच विजयो भरतर्षभ । सत्येन ते शपे राजन् त्वत्पादेन तथैव च ॥
भीमेन च नरव्याघ्र यमाभ्यां च महीपते । यथाद्य समरे कर्णं हनिष्यामि हतोऽपि वा ॥
महीतले पतिष्यामि सत्येनैव तु ते शपे । इति ।

अनुमानात्तु जानामि मैथिली सा न संशयः ।
ह्रियमाणा मया दृष्टा रक्षसा क्रूरकर्मणा ॥

इदं च तया प्रक्षिप्तमाभरणजातमिति सुग्रीवनिवेदितं तत्परिगृह्यावस्थाप्य च हृदये नयनयोर्बाष्पसन्दूषितलोचनः कथञ्चिद्धैर्यमालम्ब्य क्व वा तद्रक्षो निवसति; येन मत्प्राणतोऽपि प्रियतमा ह्यपहृता सीतेत्यपृच्छत् । सुग्रीवोऽपि नाहं तस्य दुरात्मनो रक्षसो निलयं जानामि । अथापि कथंचित्ससहायोऽहं भवत्समीहितं निर्वर्तयिष्यामि । परिहर वैक्लब्यं, महतः शोकस्यापि वशं मागाः —

ये शोकमनुवर्तन्ते न तेषां विद्यते सुखम् ।
तेजश्च क्षीयते तेषां न त्वं शोचितुमर्हसि ॥

शोकेनाभिप्रपन्नस्य जीविते चापि संशयः ।
स शोकं त्यज राजेन्द्र धैर्यमाश्रय केवलम् ॥

अनेन परित्यक्तशोकानां धीराणामेव कार्यसिद्धिरिति सूचितम् । तथा च **द्रोणपर्वणि —**

शोचतो हि महाराज ह्यघमेवाभिवर्धते । तस्माच्छोकं परित्यज्य श्रेयसे प्रयतेद्बुधः ॥
एवं ज्ञात्वा स्थिरो भूत्वा जह्यरीन्धैर्यमाप्नुहि ॥ इति ।

मोक्षधर्मे युधिष्ठिरं प्रति भीष्मः —

पुत्रदारैस्सुखैश्चैव वियुक्तस्य धनेन वा । मग्नस्य व्यसने कृच्छ्रे धृतिः श्रेयस्करी नृप ॥
धैर्येण युक्तं सततं शरीरं न विशीर्यते । विशोकता सुखं धत्ते सुखं चारोग्यमव्ययम् ॥
आरोग्याच्च शरीरस्य स पुनर्विन्दते प्रियम् ॥ इति ।

ततः परिष्वज्य सुग्रीवं परिमृज्य च बाष्पमित्थमकथयत् —

एष च प्रकृतिस्थोऽहमनुनीतस्त्वया सखे ।
दुर्लभो हीदृशो बन्धुरस्मिन् काले विशेषतः ॥

अनेन आपदि सहायकृन्मित्रं सर्वबन्ध्वपेक्षया अतिशयितमिति सूचितम् । तथा च **कामन्दकः —**

न तत्र तिष्ठति भ्राता न पिताऽन्योऽपि वा जनः ।
पुंसामापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति ॥ इति ।

उद्योगपर्वणि —

तिष्ठते हि सुहृत्तत्र न बन्धुस्तत्र तिष्ठति ॥ इति ।

अष्टमे — ततो रामवचनेन समुदितानन्दः सुग्रीव एवमवोचत् —

शक्यं खलु भवेद्राम सहायेन त्वयाऽनघ ।
सुरराज्यमपि प्राप्तुं स्वराज्यं किं पुनः प्रभो ॥

सोऽहं सभाज्यो बन्धूनां सुहृदां चैव राघव ।
यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजम् ॥

अनेन महापुरुषेण लब्धसख्यस्य अलभ्यमपि लभ्यते, स्वबन्धुषु पूज्यत्वं भवतीति सूचितम् । अत एव पाण्डवानां कृष्णद्रुपदादिमहापुरुषसहायप्रयुक्ततया राज्यं बन्धुपूज्यत्वं च विदुरेण धृतराष्ट्रं प्रति उक्तमिति प्रतिपादित**मादिपर्वणि** —

को हि द्रुपदमासाद्य मित्रं क्षत्रं सबान्धवम् । न बुभूषेद्भवेनार्थो गतश्रीरपि पार्थिव ॥
येषां पक्षधरो रामो येषां मन्त्री जनार्दनः । किन्नु तैरजितं संघे येषां पक्षे तु सात्यकिः ॥
द्रुपदः श्वशुरो येषां येषां स्यालाश्च पार्षताः । धृष्टद्युम्नमुखा वीराः पार्षताः द्रुपदात्मजाः ॥
अशक्यतां च विज्ञाय तेषामग्रेण भारत । दायाद्यतां च धर्मेण सम्यक्तेषु समाचर ॥ इति ।

कामन्दकेऽपि —

अनेकयुद्धविजयी सन्धानं यस्य गच्छति ।
तत्प्रतापेन तस्याशु वशं गच्छन्ति शत्रवः ॥ इति ।

रजतं वा सुवर्णं वा वस्त्राण्याभरणानि वा ।
अविभक्तानि साधूनामवगच्छन्ति साधवः ॥

अनेन साधूनां द्रव्यं साधारणमित्युक्तम् । तथा च **प्राचीनाः** — ‘सतां धनं साधुभिरेव भुज्यते’ इति ।

धनत्यागस्सुखत्यागः देहत्यागोऽपि वा पुनः ।
वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ॥

अनेन प्राणादिपरित्यागेनापि मित्रं संरक्षणीयमिति सूचितम् । तथा च **कामन्दकः**—

आत्मवन्मित्रवर्गे तु प्राणानपि परित्यजेत् ॥ इति ।

नवमदशमयोः — ततो भ्रातृवैरनिमित्तं किमिति रामभद्रेण पृष्टस्सुग्रीवः तां कथामित्थमकथयत् । पुरा खलु मायाविनाम्ना दुन्दुभिसुतेन महासुरेण युद्धाय समाहूतो भ्राता, तदाह्वानसमुत्थितरोषावेशदुराधर्षो, मया बन्धुभिरन्तःपुरैश्च बहुधा निवार्य-

माणोऽपि, अविगणय्य चास्मान्, अग्रतस्त्वरया प्रधावन्तं भूविवरं प्रविष्टमसुरमनुधावन् यावन्मदागमनं इह बिलद्वारि तिष्ठेति मामनुशास्य स्वयमपि प्रविश्य भूविवरं, युद्धेन संवत्सरान्ते कथञ्चित्तमाजघान। अहमपि यथानिदेशं तदागमनमेव प्रतीक्षमाणः बिलमुखनिस्सृतफेनिलशोणितप्रवाहेण भ्रातरमेव निहतं मन्वानः, पुनरसुरनिर्गमनाशङ्कया, महत्या शिलया तद्बूरन्ध्रमाच्छाद्य क्लेशेन स्वभवनमागतः निर्वर्त्य तदौर्ध्वदैहिकं, बन्धुभिरमात्यैश्च निर्बन्धेनाभिषिक्तो वानरराज्यमकरवम्।

ततश्चिराय समागतो वाली, मदज्ञानविलसितमिदमिति बहुधा मुहुर्मुयाहुर्म प्रार्थ्यमानोऽपि, परिभूय च मां, एकवस्त्रमात्रेण राज्यादुत्सारयामास॥

एकादशे– वालिनः पौरुषं यत्तद्यच्च वीर्यं धृतिश्च या।
मतमेकमनाः श्रुत्वा विधत्स्व तदनन्तरम्॥

अनेन परबलाबलं विचिन्त्यैव तदुत्सादनाय यत्नकरणे कार्यसिद्धिः अन्यथा कार्यहानिर्भवतीति सूचितम्। तथाच **कामन्दके**—

शक्याशक्यपरिज्ञानं कुर्याद्बुद्ध्या विचक्षणः।
केवलं दन्तभङ्गाय दन्तिनः शैलताडनम्॥

अशक्यारम्भवृत्तीनां नहि क्लेशादृते फलम्।
भवन्ति परितापिन्यो व्यक्तं कर्मविपत्तयः॥

बुद्ध्या बोद्ध्यानुगतया परया सम्पदः पदम्।
सुविशुद्धपदन्यासं पर्वताग्रमिवोदितम्॥ इति।

पुरा खलु दुन्दुभिनाम्ना महासुरेण दर्पवशाद्युद्धाय समाहूतः समुद्रराजः 'न मे युद्धशक्तिः, समर्थं हिमवन्तं गच्छे'त्यवोचत्। हिमवतापि तथैव वालिनं गच्छेत्यभिहितो दुन्दुभिस्समागत्य किष्किन्धां निरुध्य च नगरद्वारं नर्दन्नवस्थितो बहिर्निर्गतेन वालिना च 'निवर्तनमेव ते क्षमं; यदि प्राणेष्वाशा भवे'दित्यभिहितो विषयोपभोगापकृतमदिरापानादिना उन्मत्तं घूर्णनयनं वालिनमेवमवोचत्— 'प्रमत्ते त्वयि युद्धमस्माकमनुचितम्।

यो हि मत्तं प्रमत्तं वा सुप्तं वा रहितं भृशम्।
हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितम्॥ इति।

अनेन मत्तादिहननेन भ्रूणहन्तृत्वमुक्तम्। तथाच **द्रोणपर्वणि** भूरिश्रवसो वाक्यम्—

न प्रमत्ताय भीताय विरथाय प्रयाचते। व्यसने वर्तमानाय प्रहरन्ति मनस्विनः॥
इदं तु नीचाचरितमसत्पुरुषसेवितम्। कथमाचरितं पार्थ पापं कर्म सुदुष्करम्॥ इति।

ततस्तद्वचनमसहमानो वाली कञ्चित्कालं प्रकटितविक्रमं महासुरं संयुगे निहत्य तच्छरीरं योजनमात्रदूरे मतङ्गाश्रमप्रदेशे चिक्षेप। ततस्तत्कायपतनसञ्जातं तपोवनभङ्गं निखिलसत्त्वकदनं च वालिकृतमिति तपःप्रभावेन निश्चित्य कुपितो मतङ्गमुनिः 'अद्य-प्रभृति यदि वाली मदाश्रमस्याभितो योजनमात्रे प्रवेक्ष्यति, स विनशिष्यति। तदीयाश्च यद्यत्र निवसेयुः ते च शिलाभूता भवेयु'रिति शशाप। तच्छापभीतस्य वालिनो दुष्प्रवेश-मिममाश्रमं मत्वा निर्भयमहं वसामि। तदधुना एकैकशो निष्पतितसप्तमहासालस्य उषःकाल एव समाक्रान्तचतुस्समुद्रस्य अतिबलशालिनो वालिनो वधः कथं भवितेति बहुधा शंकते मे हृदयमिति। ततः स्ववीर्यजिज्ञासोः सुग्रीवस्य प्रभावदर्शनाय—

राघवो दुन्दुभेः कायं पादांगुष्ठेन लीलया।
तोलयित्वा महाबाहुश्चिक्षेप दशयोजनम्॥

ततः शुष्कास्थिनिरसनं नाश्वासहेतुः। सालेषु सप्तसु विक्रमो दर्शनीय इति सुग्रीवेण भूयः संप्रार्थितो रामः सकृत्प्रयुक्तैकेषुणा निर्भिन्नसप्तसालगिरिमहीनिदर्शनेन सञ्जातविश्वासं अग्रतः प्रणतं सुग्रीवमुत्थाप्य त्वरया वयं किष्किन्धां गच्छामः। त्वमग्रतो गत्वा वालिनमाहूय नियुद्धं प्रवर्तयेत्यभिधाय स्वयमपि गहनवनप्रदेशे वृक्षैरात्मानमावृत्यातिष्ठत्। ततस्सुग्रीवगर्जनाकर्णनेन जनितामर्षो वाली—

निष्पपात सुसंरब्धो भास्करोऽस्ततटादिव।

ततश्च वज्रकल्पैर्मुष्टितलप्रहारैः नियुध्यमानयोः वालिसुग्रीवयोर्गतिविप्रेक्षणभाषणादिभिरतिसादृश्यादयं वालीति निर्णयमलभमानो रामः अन्तकरं शरं न मुमोच। ततः क्रमेण प्रवृद्धतरवालिकरतलप्रहारेण जीवनसंशयमापन्नः सहायभूतं रामं चापश्यन् यथा-पुरं मतङ्गाश्रममेवाजगाम। ततस्तत्समीपमागतः सलक्ष्मणो रामभद्रः वालिसन्ताडनदुःख-वेगपरिम्लानमुखेन सुग्रीवेण मद्वैरिनिधनयत्नो मन्निधनायैव सञ्जात इति सकरुणमभि-हितः तमेवमवादीत्—

नोत्सृजामि महावेगं शरं शत्रुनिबर्हणम् ।
जीवितान्तकरं घोरं सादृश्यात्तु विशङ्कितः ॥

त्वयि वीरे विपन्ने हि अज्ञानाल्लाघवान्मया ।
मौर्ख्यं च मम बाल्यं च स्थापितं स्यात्कपीश्वर ॥

दत्ताभयवधो नाम पातकं महदुच्यते ॥

अनेन दत्ताभयवधो महापातकमित्युक्तम् । तथा च **द्रोणपर्वणि** अर्जुनः —

ये लोका मातृहन्तॄणां ये चापि पितृघातिनाम् । साधूनसूयतां ये च ये चापि परिवादिनाम् ॥
ये च निक्षेपहन्तॄणां ये च विश्वासघातिनाम् । तानह्नैवाधिगच्छेयं नचेद्धन्यां जयद्रथम् ॥

इति तं समाश्वास्य गिरितटाधिरूढया गजपुष्पीलतया अभिज्ञानाय समलङ्कृतं ससचिवं सुग्रीवं पुरस्कृत्यैव किष्किन्धाभिमुखं प्रस्थितो मध्येमार्गं कुसुमभरविनत-तरुवरविविधविहगगणनिबिडितः विमलसलिलः समलङ्कृतः मनोनयनविनोदनः कस्याय-माश्रमप्रदेश इत्यपृच्छत् ।

त्रयोदशे -सुग्रीवोऽपि सलिलस्यैवान्तरधःशीर्षतया सप्तरात्रकृताहारा महानुभावाः सत्यजना नामर्षयः सप्तवर्षशतपर्यन्तं स्वकृततपःप्रभावेन सकलेबरं दिवं याताः । तत्तपःप्रभावनिर्मितो हेमप्राकारमण्डितो दुरवापोऽन्यजनैरयमाश्रमप्रदेशः ।

चतुर्दशे— कुरु प्रणामं धर्मात्मन् तांस्त्वमुद्दिश्य राघव ।
लक्ष्मणेन सह भ्रात्रा प्रयतस्संयताञ्जलिः ॥

प्रणमन्ति हि ये तेषां ऋषीणां भावितात्मनाम् ।
न तेषामशुभं किञ्चिच्छरीरे राम दृश्यते ॥

इत्यभिधाय कृतप्रणामेन रामेण सह किष्किन्धोपकण्ठमाजगाम ।

ततो रामः अग्निसाक्षिकतया कृतां प्रतिज्ञामविस्मृत्यैव रिपुवशगं मां पुनरेव नोपेक्षितुमर्हति भवानिति वदन्तं हरिराजमित्थमाचचक्षे । दत्ताभयवधदोषभीत्या स्थितं मां नैवं वक्तुमर्हसि । तदधुना रिपुनगरगोपुरद्वारमुपरुध्य व्युत्थाय बहिरागच्छेति समुद्घोषय । तदसहमानो वाली युद्धसन्नद्धो बहिर्निर्गच्छेदेव —

रिपूणां धर्षणं शूरा मर्षयन्ति न संयुगे।
जानन्तस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः॥

अनेन शूरा रिपुकृतधर्षणं न सहन्त इत्युक्तम्। तथा च **गदापर्वणि**—

उत्तिष्ठोत्तिष्ठ गान्धारे मां योधय सुयोधन। एकयैकेन संगम्य संयुगे गदया बली॥
पुरुषो भव गान्धारे युध्यस्व सुसमाहितः। अद्य ते जीवितं नास्ति यदीन्द्रोपि तवाश्रयः॥

संजयः—

एतत्समरशार्दूलो नामृष्यत तवात्मजः। तथासौ वाक्प्रतोदेन तुद्यमानः पुनःपुनः॥
वाचं न ममृषे धीमान् उत्तमाश्वः कशामिव। इति।

ततो रामवचनाकर्णनेन सञ्जातविश्वासः सुग्रीवः स्वाट्टहासेन कम्पिता-माशामकरोत्—

तस्य शब्देन वित्रस्ता गावो यान्ति हतप्रभाः।
राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः॥

अनेन राजपरामृष्टाः स्त्रियः क्लिश्नन्तीति।

पञ्चदशे—ततस्सर्वभूतप्रकम्पनं आतुराक्रन्दनमाकर्ण्य रोषावेशवशेन अनल्पकल्पा-नलकल्पं मेदिनीं चरणन्यासैर्दारयन्तमिव युद्धाय पुनः प्रस्थितं वालिनं परिष्वज्य दर्शित-सौहृदा तारा एवमकथयत्। प्रबलतरावष्टंभमन्तरेण नैवंविधो युद्धसंरंभः सुग्रीवस्येति वितर्क-यामि। अवगतश्चायं अङ्गदमुखात्तद्वृत्तान्तः। इक्ष्वाकुकुलसम्भूतौ रामलक्ष्मणाख्यौ राजकुमारौ सुग्रीवसाहाय्याचरणाय सम्प्राप्तौ। तयोश्च—

रामः परबलामर्दी युगान्ताग्निरिवोत्थितः।
निवासवृक्षस्साधूनामापन्नानां परा गतिः॥

आर्तानां संश्रयश्चैव यशसश्चैकभाजनम्।
ज्ञानविज्ञानसम्पन्नो निदेशे निरतः पितुः॥

धातूनामिव शैलेन्द्रो गुणानामाकरो महान्॥ इति।

तदधुना समुत्सृज्य वैरं सबन्धुं सुग्रीवमानीयाभिषिच्य यौवराज्ये—

दानमानादिसत्कारैः कुरुष्व प्रत्यनन्तरम्।

नहि तेन समं बन्धुं भुवि पश्यामि कञ्चन ॥

अनेन भ्राता दानमानादिभिर्नित्यं लालनीयः, न हिंस्य इति सूचितम् ॥

तथा च दक्षः —

पितुश्शतगुणं दानं सहस्रं मातुरुच्यते । भगिन्यां शतसाहस्रं सोदरे दत्तमक्षयम् ॥

दाने फलविशेषस्स्याद्धिंसायामेवमेव हि । इति ।

विशेषस्तु ज्ञातिविषये 'विशेषेण तु सुग्रीवो हनुमत्यर्थमुक्तवान्' इत्यत्र प्रपञ्चयिष्यते ।

प्रसीद पथ्यं शृणु जल्पितं हि मे न रोषमेवानुविधातुमर्हसि ।
क्षमो हि ते कोसलराजसूनुना न विग्रहः शक्रसमानतेजसा ॥

अनेन बलवद्विरोधो न कर्तव्य इति सूचितम् । तथा च **विष्णुपुराणे —**

विरोधं नोत्तमैर्गच्छेत् अधमैश्च तथा बुध इति ।

इति हितकरतारासमुदीरितवचनमाकर्णयतोऽपि —

न रोचते तद्वचनं हि तस्य कालाभिपन्नस्य विनाशकाले ।

अनेन मुमूर्षोर्हिता बुद्धिर्न भवतीत्येतत्प्राक् प्रपञ्चितम् ।

षोडशे — ततश्शक्रसमानविक्रमश्शक्रकुमारः हितोपदेशतत्परामपि तारां निर्भर्त्स्येद-माचचक्षे । हीनग्रीवस्य सुग्रीवस्य युद्धसंरंभगर्जनमिदं न मर्षयामि —

अधर्षितानां शूराणां समरेष्वनिवर्तिनाम् ।
धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥

राघवोऽपि धर्मज्ञोऽनपराधिनि मयि पापं न कुर्यादेव । अहमपि वृक्षपाषाणमुष्टि-प्रहारैः —

दर्पं चास्यापनेष्यामि न च प्राणैर्विमोक्ष्यते ॥

तवाप्यनुचितमतिदूरगमनं निवर्तस्व निर्विचारमिति ।

ततः स्वस्त्ययनपूर्वकं प्रदक्षिणीकृत्य भर्तारं अन्तःपुरं प्रविष्टायां तारायां वाली निर्गत्य नगरात्पुरःस्थितं युद्धसन्नद्धं भ्रातरमवलोक्य रोषारुणितलोचनः सालविटपिन-मुत्पाट्य तेन सुग्रीवं ताडयामास । ततः परस्परं वृक्षगिरिशिखरनखमुष्टिजानुपाद-पाणिप्रहरणैः परस्परं युध्यमानयोस्तयोः हीयमानं स्वाभिमुखतया मुहुर्मुहुरवलोकयन्तं

तपनतनयमभिवीक्ष्य रामभद्रो नातः परमुपेक्षणमस्माकमुचितमिति विचिन्त्य प्रदीप्ताशनिसन्निभं शरवरं शरासने सन्धाय वालिवक्षो विक्षोभयितुं चिक्षेप।

सप्तदशे—ततश्शरेणाभिहतो रामेण रणकर्कशः।
पपात सहसा वाली निकृत्त इव पादपः॥

स भूमौ व्यस्तसर्वांगस्तप्तकाञ्चनभूषणः।
अपतद्देवराजस्य मुक्तरश्मिरिव ध्वजः॥

तस्मिन्निपतिते भूमौ वानराणां गणेश्वरे।
नष्टचन्द्रमिव व्योम न व्यराजत भूतलम्॥

भूमौ निपतितस्यापि तस्य देहं महात्मनः।
न श्रीर्जहाति न प्राणा न तेजो न पराक्रमः॥

शक्रदत्ता वरा माला काञ्चनी शतपुष्करा।
दधार हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा॥

स तया मालया वीरो हैमया हरियूथपः।
सन्ध्यानुगतपर्यन्तः पयोधर इवाभवत्॥

तस्य माला च देहश्च मर्मघाती च यश्शरः।
त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते॥

तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रधावनम्।
रामबाणासनक्षिप्तमावहत्परमां गतिम्॥

तं तथा पतितं संख्ये गतार्चिषमिवानलम्।
बहुमान्यं च तं वीरं वीक्षमाणं शनैरिव॥

ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम्।
आदित्यमिव कालेन युगान्ते भुवि पातितम्॥

महेन्द्रपुत्रं पतितं वालिनं हेममालिनम्।
सिंहोरस्कं महाबाहुं दीप्तास्यं हरिलोचनम्॥

लक्ष्मणानुचरो रामो ददर्शोपससर्प च।
स दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलम्।
अब्रवीत्प्रश्रितं वाक्यं परुषं धर्मसंहितम्॥

पराङ्मुखवधं कृत्वा को नु प्राप्तस्त्वया गुणः।

यदहं युद्धसंरब्धः शरेणोरसि ताडितः ॥

त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः ।
कुलीनस्सत्वसम्पन्नः तेजस्वी चरितव्रतः ॥

रामः करुणवेदी च प्रजानां च हिते रतः ।
सानुक्रोशो जितक्रोधस्समयज्ञो दृढव्रतः ॥

इति ते सर्वभूतानि कथयन्ति यशो भुवि ।
दमश्शमः क्षमा धर्मो धृतिस्सत्यपराक्रमः ॥

पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु ।
तान् गुणान्संप्रधार्याहं अग्र्यं चाभिजनं तव ॥

तारया प्रतिषिद्धोऽपि सुग्रीवेण समागतः ।
न मामन्येन संरब्धं प्रमत्तं योद्धुमर्हसि ॥

इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव ।
न त्वां विनिहतात्मानं धर्मध्वजमधार्मिकम् ।
जाने पापसमाचारं तृणैः कूपमिवावृतम् ॥

सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ।
नाहं त्वामभिजानामि धर्मछद्माभिसंवृतम् ॥

विषये वा पुरे वापि यदा नापकरोम्यहम् ।
न च त्वां प्रतियोत्स्यामि कस्मात्त्वं हंस्यकिल्बिषम् ॥

फलमूलाशनं नित्यं वानरं वनगोचरम् ।
मामिहाप्रतियुध्यन्तमन्येन च समागतम् ॥

त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः ।
लिंगमप्यस्ति ते राजन् दृश्यते धर्मसंहितम् ।
कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः ॥

धर्मलिंगप्रतिच्छन्नः क्रूरकर्म समाचरेत् ।
राम राजकुले जातो धर्मवानिति विश्रुतः ।
अभव्यो भव्यरूपेण किमर्थं परिधावसि ॥

साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ ।
पार्थिवानां गुणा राजन् दण्डश्चाप्यपकारिषु ॥

वयं वनचरा राम मृगा मूलफलाशनाः ।

एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वरः॥

भूमिर्हिरण्यं रूप्यं च विग्रहे कारणानि च।
अत्र कस्ते वने लाभो मदीयेषु वनेषु वा॥

नयश्च विनयश्चोभौ निग्रहानुग्रहावपि।
राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः॥

त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः।
राजवृत्तैश्च संकीर्णः शरासनपरायणः॥

न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता।
इन्द्रियैः कामवृत्तः सन् कृष्यसे मनुजेश्वर॥

हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम्।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम्॥

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः।
नास्तिकः परिवेत्ता च सर्वे निरयगामिनः॥

सूचकश्च कदर्यश्च मित्रघ्नो गुरुतल्पगः।
लोकं पापात्मनामेते गच्छन्ते नात्र संशयः॥

अधार्यं चर्म मे सद्भिः रोमाण्यस्थि च वर्जितम्।
अभक्ष्याणि च मांसानि त्वद्विधैर्धर्मचारिभिः॥

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेण राघव।
शल्यकः श्वाविडो गोधा शशः कूर्मश्च पञ्चमः॥

चर्म चास्थि च मे राजन् न स्पृशन्ति मनीषिणः।
अभक्ष्याणि च मांसानि सोहं पञ्चनखो हतः॥

तारया वाक्यमुक्तोऽहं सत्यं सर्वज्ञया हितम्।
तदतिक्रम्य मोहेन कालस्य वशमागतः॥

त्वया नाथेन काकुत्स्थ न सनाथा वसुन्धरा।
प्रमदा शीलसम्पन्ना धूर्तेन पतिना यथा॥

शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमानसः।
कथं दशरथेन त्वं जातः पापो महात्मना॥

छिन्नचारित्र्यकक्ष्येण सतां धर्मातिवर्तिना।
त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना॥

अशुभं चाप्ययुक्तं च सतां चैव विगर्हितम् ।
वक्ष्यसे चेदृशं कृत्वा सद्भिस्सह समागतः ॥

उदासीनेषु योऽस्मासु विक्रमस्ते प्रकाशितः ।
अपकारिषु तें राजन् नहि पश्यामि विक्रमम् ॥

दृश्यमानस्तु युध्येथा मया यदि नृपात्मज ।
अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥

त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः ।
प्रसुप्तः पन्नगेनेव नरः पानवशं गतः ॥

मामेव यदि पूर्वं त्वमेतमर्थमचोदयः ।
मैथिलीमहमेकाह्ना तव चानीतवान्भवे ॥

राक्षसं च दुरात्मानं तव भार्यापहारिणम् ।
सुग्रीवप्रियकामेन यदहं निहतस्त्वया ॥

कण्ठे बध्वा प्रदद्यां ते निहतं रावणं रणे ।
न्यस्तां सागरतोये वा पाताले वापि मैथिलीम् ॥

आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव ।
युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ॥

अयुक्तं यदधर्मेण त्वयाहं निहतो रणे ।
काममेवंविधो लोकः कालेन विनियुज्यते ।
क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥

इत्येवमुक्त्वा परिशुष्कवक्त्रः शराभिघाताद्व्यथितो महात्मा ।
समीक्ष्य रामं रविसंनिकाशं तूष्णीं बभूवामरराजसूनुः ॥

अष्टादशस्सर्गः ॥

इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम् ।
परुषं वालिना रामो निहतेन विचेतसा ॥

तं निष्प्रभमिवादित्यं मुक्ततोयमिवांबुदम् ।
उक्तवाक्यं हरिश्रेष्ठमुपशान्तमिवानलम् ॥

धर्मार्थगुणसंपन्नं हरीश्वरमनुत्तमम् ।
अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥

धर्ममर्थं च कामं च समयं चापि लौकिकम् ।
अवज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥

अस्पृष्ट्वा बुद्धिसंपन्नान्वृद्धानाचार्यसंमतान् ।
सौम्य वानर चापल्यात्किं मां वक्तुमिहेच्छसि ॥

इक्ष्वाकूणामियं भूमिः सशैलवनकानना ।
मृगपक्षिमनुष्याणां निग्रहप्रग्रहावपि ॥

तां पालयति धर्मात्मा भरतस्सत्यवागृजुः ।
धर्मकामार्थतत्वज्ञो निग्रहानुग्रहे रतः ॥

नयश्च विनयश्चोभौ यस्मिन्सत्यं च सुस्थितम् ।
विक्रमश्च यथा दृष्टः स राजा देशकालवित् ॥

तस्य धर्मकृतादेशाः वयमन्ये च पार्थिवाः ।
चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः ॥

तस्मिन्नृपतिशार्दूले भरते धर्मवत्सले ।
पालयत्यखिलां भूमिं कश्चरेद्धर्मनिग्रहम् ॥

ते वयं धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः ।
भरताज्ञां पुरस्कृत्य निगृह्णीम यथाविधि ॥

त्वं तु संक्लिष्टधर्मात्मा कर्मणा च विगर्हितः ।
कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि ॥

ज्येष्ठो भ्राता पिता चैव यश्च विद्यां प्रयच्छति ।
त्रयस्ते पितरो ज्ञेयाः धर्म्ये पथि हि वर्ततः ॥

यवीयान्सोदरः पुत्रः शिष्यश्चापि गुणोदितः ।
पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चेत्तत्र कारणम् ॥

सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम ।
हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभे ॥

चपलश्चपलैस्साधं वानरैरकृतात्मभिः ।
जात्यन्ध इव जात्यन्धैर्मन्त्रयन्द्रक्ष्यसे नु किम् ॥

अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ते ।
न हि मां केवलं रोषात्त्वं विगर्हितुमर्हसि ॥

तदेतत्कारणं पश्य यदर्थं त्वं मया हतः ।
भ्रातुर्वर्तसि भार्यायां त्यक्त्वा धर्मं सनातनम् ॥

अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः ।
रुमायां वर्तसे कामात्स्नुषायां पापकर्मकृत् ॥

तद्व्यतीतस्य ते धर्मात्कामवृत्तस्य वानर ।
भ्रातुर्भार्याविमर्शेऽस्मिन् दण्डोऽयं प्रतिपादितः ॥

नहि धर्मविरुद्धस्य लोकवृत्तादपेयुषः ।
दण्डादन्यत्र पश्यामि निग्रहं हरियूथप ।
न च ते मर्षये पापं क्षत्रियोऽहं कुलोद्भवः ॥

औरसीं भगिनीं चापि भार्यां चाप्यनुजस्य यः ।
प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः ॥

भरतस्तु महीपालो वयं चादेशवर्तिनः ।
त्वं तु धर्मादतिक्रान्तः कथं शक्य उपेक्षितुम् ॥

गुरुधर्मव्यतिक्रान्तं प्राज्ञो धर्मेण पालयन् ।
भरतः कामवृत्तानां निग्रहे पर्यवस्थितः ॥

वयं तु भरतादेशं विधिं कृत्वा हरीश्वर ।
त्वद्विधान्भिन्नमर्यादान्नियन्तुं पर्यवस्थिताः ॥

सुग्रीवेण च मे सख्यं लक्ष्मणेन यथा तथा ।
दारराज्यनिमित्तं च निःश्रेयसि रतस्स मे ॥

प्रतिज्ञा च मया दत्ता तदा वानरसन्निधौ ।
प्रतिज्ञानं कथं शक्यं मद्विधेनानपेक्षितुम् ॥

तदेभिः कारणैस्सर्वैर्महद्भिर्धर्मसंहितैः ।
शासनं तव यद्युक्तं तद्भवाननुमन्यताम् ॥

सर्वथा धर्म इत्येव द्रष्टव्यस्तव निग्रहः ।
वयस्यस्यापि कर्तव्यं धर्ममेवानुपश्यतः ॥

शक्यं त्वयापि तत्कार्यं धर्ममेवानुपश्यता ।
श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ॥

गृहीतौ धर्मकुशलौ तत्तथाचरितं भुवि ।

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ॥

निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।
शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ॥

राजा त्वशासन्न्यायस्य तदेवाप्नोति किल्बिषम् ।
आर्येण मम मान्धात्रा व्यसनं घोरमीप्सितम् ॥

श्रमणेन कृते पापे यथा पापं त्वया कृतम् ।
अन्यैरपि कृतं पापं प्रमत्तैर्वसुधाधिपैः ॥

प्रायश्चित्तं प्रकुर्वन्ति तेन तच्छाम्यते रजः ।
तदलं परितापेन धर्मतः परिकल्पितः ।
वधो वानरशार्दूल न वयं स्ववशे स्थिताः ॥

शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव ।
यच्छ्रुत्वा हेतुमद्वीर न मन्युं कर्तुमर्हसि ॥

न मे तत्र मनस्तापो न मन्युर्हरियूथप ।
वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः ॥

प्रतिच्छन्नाश्च दृश्याश्च गृह्णन्ति सुबहून्मृगान् ।
प्रधावितान्वा वित्रस्तान् विस्रब्धांश्चातिनिष्ठितान् ॥

प्रमत्तानप्रमत्तान्वा नरा मांसार्थिनो भृशम् ।
विध्यन्ति विमुखांश्चापि न च दोषोऽत्र विद्यते ॥

यान्ति राजर्षयश्चात्र मृगयां धर्मकोविदाः ।
तस्मात्त्वं निहतो युद्धे मया बाणेन वानर ॥

अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो ह्यसि ।
दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ॥

राजानो वानरश्रेष्ठ प्रदातारो न संशयः ।
तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् ॥

देवा मानुषरूपेण चरन्त्येते महीतले ।
त्वं तु धर्ममविज्ञाय केवलं रोषमास्थितः ॥
प्रदूषयसि मां धर्मे पितृपैतामहे स्थितम् ॥ इति ॥

नन्वत्र पूर्वसर्गे — 'पराङ्मुखवधं कृत्वा को नु प्राप्तस्त्वया गुणः', 'दण्ड्यश्चाप्यपकारिषु' 'न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि', 'विषये वा पुरे वापि यदा नापकरोम्यहं', 'कस्मात्त्वं हंस्यकिल्बिषं' 'फलमूलाशिनं नित्यं' 'भूमिर्हिरण्यं रूप्यं च विग्रहे कारणानि च', 'त्वं तु कामप्रधानश्च', 'हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम्, किं वक्ष्यसि सतां मध्ये' 'चोरः प्राणिवधे रतः। नास्तिकः परिवेत्ता च सर्वे निरयगामिनः', अधार्यं चर्म मे सद्भिः रोमाण्यस्थि च वर्जितम्। अभक्ष्याणि च मांसानि', 'पञ्च पञ्चनखा भक्ष्याः' 'मैथिलीमहमेकाह्ना तव चानीतवान्भवे' इत्यादिवाक्यैर्वालिनेत्थमाक्षिप्तम्।

अहेतुकप्राणिवधस्तावदयुक्तः, 'न हिंस्यात्सर्वा भूतानि' इति श्रुतेः॥ 'न त्वेव तु वृथा हन्तुं पशुमिच्छेत्कदाचन' इति मनुवचनाच्च। हेतुरपि अत्र विचार्यमाणे न दृश्यते। स किं रिपुत्वं वा? कण्टकत्वं वा? एनस्वत्वं वा! उपयुक्तमांसचर्मविषाणादिमत्वं वा! हनने प्रत्यवायाभावो वा? सीतागवेषणरूपकार्यं वा! नाद्यः वालिकृतापराधाभावेन रिपुत्वासिद्धेः। न द्वितीयः 'रोमाञ्चे क्षुद्रशत्रौ च तरोरंगे च कण्टकः' इति निघण्टुपर्यालोचनया क्षुद्रशत्रोः कण्टकत्वेन अशत्रोः वालिनः क्षुद्रशत्रुत्वस्य दूरापेतत्वात्। नापि तृतीयः पापमात्रस्य वधनिमित्तत्वासिद्धेः। वधनिमित्तभूतसुवर्णस्तेयादिपापानां च वालिनोऽदर्शनात्। नापि चतुर्थः 'श्वाविडं शल्यकं गोधा खङ्गकूर्मशशांस्तथा। भक्ष्यान्पञ्चनखेष्वाहुः' इति मनुवचनेन पञ्चनखेषु श्वाविडादीनामेव भक्ष्यत्वावगमेन वानरमांसस्याभक्ष्यत्वात्। अतो न मांसस्योपयोगः। वानररोमादीनामपि लौकिके उपयोगो वैदिके वा। न तावदाद्यः अव्युष्ट्रवृकरोम्णां उत्कृष्टवस्त्रोपयोगवत् गजदन्तशार्दूलनखादीनां आन्दोलिकाबालालंकरणाद्युपयोगवत् गोमहिष्यादिचर्मणां पादत्राणाद्युपयोगवच्च वानररोमास्थिनखादीनां क्वचिदपि लौकिके उपयोगादर्शनात्। नापि वैदिके कर्मण्युपयोगः संभवति, कृष्णाजिनकृष्णविषाण अनडुद्वराहादिचर्म ऊर्णास्तुकाशलल्यादीनां यज्ञोपवीतकण्डूयन आसन उपानत्पिण्डपितृयज्ञचातुर्मास्यादिषु 'अजिनं वासो वा दक्षिणत उपवीय' 'कृष्णविषाणया कण्डूयते' 'पश्चादग्नेर्लोहितं चर्म आनडुहं उत्तरलोम प्राग्ग्रीवमास्तीर्य वाराहीभ्यां इत उपानद्भ्यां व्रजेत्।' 'उर्णास्तुका वा पूर्वे वयसि उत्तर आयुषि स्वलोम' 'त्रिश्वेतया च शलल्या' इत्यादिशास्त्रैर्विनियोगवत्,

तस्य खङ्गस्य यत्पात्रं तद्दौहित्रमुदाहृतम्।
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः॥

इति शास्त्रेण खड्गपात्रादीनां पितृकार्ये विधानवच्च वानरचर्मरोमादीनां क्वचिदपि वैदिके कर्मणि विनियोगादर्शनात् । नापि पञ्चमः; कपिवधे प्रायश्चित्तविधानेन प्रत्यवायावश्यंभावात् । तथाच **मनुः** —

हत्वा हंसं बलाकं च बकं बर्हिणमेव च । वानरं श्येनभासौ च स्पर्शयेद्ब्राह्मणाय गाम् ॥

स्पर्शनं दानमिति ।

नापि षष्ठः वधं निर्वैव वालिप्रार्थनया सीतायाः प्राप्तुं शक्यत्वेन तदर्थतया वधकरणासंभवादिति । अस्य च वालिकृताक्षेपस्य प्रत्युत्तरमुत्तरसर्गेऽभिहितं श्रीरामेण —

धर्ममर्थं च कामं च समयं चापि लौकिकम् । अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥
यवीयान् सोदरः पुत्रः शिष्यश्चापि गुणोदितः । पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चेत्तत्र कारणम् ॥
रुमायां वर्तसे कामात्स्नुषायां पापकर्मकृत् । भ्रातृभार्याविमर्शेऽस्मिन् दण्डोऽयं विनिपातितः ॥
सुग्रीवेण च मे सख्यं लक्ष्मणेन यथा तथा । दारराज्यनिमित्तं च निश्रेयसि रतस्स मे ॥
प्रतिज्ञा च मया दत्ता तदा वानरसन्निधौ । प्रतिज्ञातं कथं शक्यं मद्विधेनानवेक्षितुम् ॥

'वागुराभिश्च पाशैश्च' 'अयुध्यन्प्रतियुध्यन्वा' 'विध्यन्ति विमुखाश्चापि न च दोषोत्र विद्यते' इति श्लोकैः । भ्रातृभार्यापरिग्रहरूपाद्धर्मातिक्रमात् प्रतिज्ञातार्थस्य निर्वहणीयत्वात् मृगयायां मृगवधस्य राज्ञां धर्मत्वाच्च युक्त एव वध इति परिहार उक्तः । स चानुपपन्नः । भ्रातृभार्याग्रहणस्य सुग्रीवसाधारणत्वेन तमुपेक्ष्य वालिनो वधकरणे हेत्वभावात् । प्रतिज्ञातार्थनिर्वहणवत् अहिंसाया अपि धर्मत्वेन हिंसां परित्यज्य प्रतिज्ञाया एवोपेक्षणसंभवात् । मृगयाधर्मेण रामस्य प्रवृत्त्यभावेन मृगयायां वध इत्येतस्य अयुक्तत्वाच्च । अतो रामसमुदीरितः परिहारोऽनुपपन्न एवेति चेत् उच्यते — तत्राद्यपरिहारस्यायमेवाभिप्रायः — वाली तावत्स्वराज्ये स्थित्वा धर्मातिक्रमं कृतवान् । धर्मदूषकश्च राज्ञाऽवश्यं दण्डनीयः । तथाच **राजधर्मे** —

पापमाचरतो यत्र कर्मणा व्याहृतेन च । प्रियस्यापि न मृष्येत स राज्ञो धर्म उच्यते ॥ इति ।

मानवेऽपि —

अधार्मिकांस्त्रिभिर्न्यायैर्निगृह्णीयात्प्रयत्नतः । निरोधनेन दण्डेन विविधेन वधेन च ॥ इति ।

अदण्डने बाधकमपि तत्रैव —

साहसे वर्तमानं तु यो मर्षयति पार्थिवः । स विनाशं व्रजत्याशु विद्वेषं वा नियच्छति ॥

दण्ड्यानां दण्डनाद्राज्ञः दण्ड्यस्य च विशुद्धिः अन्यथा उभयोरपि प्रत्यवायः।
तथाच **राजधर्मे शंखलिखितोपाख्याने** —

शङ्खश्च लिखितश्चास्तां भ्रातरौ शंसितव्रतौ। तयोरावसथौ चास्तां रमणीयौ पृथक् पृथक्॥

अथ कदाचिदाश्रमाद्विनिष्क्रान्ते ज्येष्ठभ्रातरि लिखितस्तमाश्रमं प्रविश्य तत्रत्यानि परिणतफलान्यादायाभक्षयत्। तस्मिंश्च भक्षयत्येव शङ्खोऽप्याश्रममागमत्।

तमब्रवीत्तदा शङ्खस्तीव्ररोषसमन्वितः। स्तेयं त्वया कृतमिदं फलान्याददता स्वयम्॥

गच्छ राजानमासाद्य स्वकर्म कथयस्व वै॥ इति।

एवं भ्रातुर्वचनात्सुद्युम्नं राजानमभिगम्येत्थमाह —

अनिसृष्टानि गुरुणा फलानि मनुजर्षभ। भक्षितानि मया राजन् तत्र मां शाधि मा चिरम्॥इति
ततस्स पृथिवीपालो लिखितस्य महात्मनः। करौ प्रच्छेदयामास कृतदण्डो जगाम सः॥
स गत्वा भ्रातरं शंखं आर्तरूपोऽब्रवीदिदम्। कृतदण्डस्य दुर्बुद्धेर्भगवन्क्षन्तुमर्हसि॥

शंख उवाच —

न कुप्ये तव धर्मज्ञ न संदूषयसे मम। धर्मस्तु ते व्यतिक्रान्तस्ततस्ते निष्कृतिः कृता॥

स त्वमिदानीं बाहुदां नदीमवगाह्य पितॄन्सन्तर्पयेत्याज्ञप्तो लिखितः —

अवगाह्यापगां पुण्यामुदकार्थं प्रचक्रमे। प्रादुरास्तां ततस्तस्य करौ जलजसन्निभौ॥

ततोऽतिविस्मितो लिखितो भ्रातरमभ्येत्य करद्वयमदर्शयत्। सोऽपि मयेदं तपसा कृतमित्यवदत्।

ततो लिखितः —

किन्नु नाहं त्वया पूतः पूर्वमेव महाद्युते। यस्य ते तपसो वीर्यमीदृशं द्विजसत्तम॥

शंख उवाच —

एवमेतन्मया कार्यं नाहं दण्डधरस्तव। स च पूतो नरपतिः त्वं चापि पितृभिस्सह॥

व्यास उवाच —

स राजा पाण्डवश्रेष्ठ श्रेयान्वै तेन कर्मणा। प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा॥ इति

अयं च वाली भ्रातृभार्यागमनरूपाधर्माचरणात् 'अबुद्धिपूर्वमलंकृतो युवा परदार-मनुप्रविशन् कुमारीं वा वाचा बाध्यः, बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः । सन्निपाते वृत्ते शिश्नछेदनं सवृषणस्येति **आपस्तंबसूत्रेण** —

माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखि शिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिता चार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गच्छन् गुरुतल्पग उच्यते । शिश्नस्योत्कृन्तनात्तत्र नान्यो दण्डो विधीयते ॥

इति **नारद**वचनेन च राजकृतसवृषणशिश्नछेदनरूपदण्डार्हः । स च वाली —

दृश्यमानस्तु युध्येथा मया यदि नृपात्मज । अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥

इति वचनेन दृसत्वावगमात् स्वकृतं तादृशं दण्डं नांगीकरिष्यति । अत एतस्य विशुद्ध्यर्थं—

महाराज मनुष्येषु निन्द्यं यः सर्वमाचरेत् । स वध्यस्सर्वलोकस्य निन्दितानि समाचरन् ॥

इति **भारत**वचनानुसारेण वध एव कृत इति प्रथमपरिहाराभिप्रायः । अत एवात्रैव रामवाक्यम् —

श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ । गृहीतौ धर्मकुशलौ तत्तथाचरितं भुवि ॥
राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलास्स्वर्गमायान्ति सन्तः सुकृतिनो यथा ॥

शासनाद्वा विमोक्षाद्वा स्तेनः स्तेयाद्विमुच्यते ।
राजा त्वशासन्नयायस्य तदेवाप्नोति किल्बिषम् ॥ इति ॥

न चेदं भ्रातृभार्यागमनरूपधर्मातिक्रमणं सुग्रीवसाधारणमित्युक्तमिति वाच्यं,

नष्टे मृते प्रव्रजिते क्लीबे च पतिते तथा । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥

इति धर्मशास्त्रपर्यालोचनया वालिमरणानन्तरं ताराग्रहणस्य अदोषत्वेन तत्साधारण्यासंभवात् । एतच्चाग्रे विस्तरेण प्रतिपादयिष्यामः । यदपि, अहिंसाया अपि धर्मत्वेन तदनुसरणाय प्रतिज्ञापरिपालनस्य परित्याग एव किं न स्यादिति तदपि न । राज्ञां सर्वधर्मापेक्षया प्रतिज्ञापरिपालनप्राबल्यस्यायोध्याकाण्डे 'क्षात्रं धर्ममहं वक्ष्ये' इत्येतद्व्याख्यानावसरे बहुधा प्रपञ्चितत्वेन तदनुसारेण अहिंसापरित्यागस्यैव न्याय्यत्वात् । एवं च,

प्रतिप्रदानं शरणागतस्य स्त्रिया वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र भक्तत्यागश्चैव समं मतो मे ॥

इति महाप्रस्थानिके शक्रं प्रतिधर्मपुत्रवचनपर्यालोचनया भक्तपरित्यागस्यात्यन्तं पापाधायकत्वावगमेऽपि क्षत्रियाणामितरधर्मापेक्षया प्रतिज्ञातपरिपालनमेव परमो धर्म इति जानता भगवता श्रीरामेण स्वकृतप्रतिज्ञानिर्वहणाय यावज्जीवमाज्ञापरिपालनपूर्वकं सेवां कुर्वतः अत्यन्तभक्तस्यापि भ्रातुर्लक्ष्मणस्यापि परित्यागः कृत इति प्रतिपादितमुत्तरकाण्डे —

शृणु राम महाबाहो यदर्थमहमागतः। पितामहेन देवेन प्रेषितोऽस्मि महाबल ॥
द्वन्द्वमेतत्प्रयोक्तव्यं नच चक्षुर्गतं वचः। यः शृणोति निरीक्षेद्वा स वध्यः खलु राघव ॥
भवेद्वै मुनिमुख्यस्य वचनं यद्यवेक्षसे। तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत् ॥
द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय। स मे वध्यः खलु भवेत्कथां द्वन्द्वसमीरिताम् ॥
ऋषेर्मम च सौमित्रे पश्येद्वा शृणुयाच्च यः। ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारि संग्रहे॥
तमुवाच मुनिं वाक्यं कथयस्वेति राघवः। शृणु राम महाबाहो यदर्थमहमागतः ॥
पितामहश्च भगवानाह लोकपतिः प्रभुः। समयस्तु महाबाहो स्वान्लोकान्परिरक्षितुम् ॥
श्रुत्वा पितामहेनोक्तं वाक्यं कालसमीरितम्। राघवः प्रहसन्वाक्यमुवाच परमाद्भुतम् ॥
त्रयाणां चैव लोकानां कार्यार्थं मम संभवः। भद्रं तेऽस्तु गमिष्यामि यत एवाहमागतः ॥
तयोरेवं कथयतोर्दुर्वासा भगवानृषिः। रामस्य दर्शनाकांक्षी राजद्वारमुपागमत् ॥
सोऽभिगम्य तु सौमित्रिमुवाच ऋषिसत्तमः। रामं दर्शय मे शीघ्रं पुरा मेऽर्थोऽतिवर्तते ॥
मुनेस्तु वचनं श्रुत्वा लक्ष्मणः परवीरहा। अभिवाद्य महात्मानं वाक्यमेतदुवाच ह ॥

किं कार्यं भगवन् ब्रह्मन् कोवार्थः किं करोम्यहम्।
व्यग्रो हि राघवो ब्रह्मन् मुहूर्तं वा प्रतीक्ष्यताम् ॥

तच्छ्रुत्वा ऋषिशार्दूलः क्रोधेन कलुषीकृतः। उवाच लक्ष्मणं वाक्यं निर्दहन्निव चक्षुषा ॥
अस्मिन् क्षणे मां सौमित्रे रामाय प्रतिवेदय। विषयं च पुरं चैव शपिष्ये राघवं तथा ॥
भरतं चैव सौमित्रे युष्माकं या च संततिः। नहि शक्ष्याम्यहं भूयो मन्युं धारयितुं ततः ॥

तच्छ्रुत्वा घोरसंकाशं वाक्यं तस्य महात्मनः।
चिन्तयामास मनसा तस्य वाक्यस्य निश्चयम् ॥

एकस्य मरणं मेऽस्तु मा भूत्सर्वविनाशनम्। इति बुध्या विनिश्चित्य राघवाय न्यवेदयत् ॥

ततः अवाङ्मुखमुखं दीनं दृष्ट्वा सोममिव प्लुतम्।

राघवं लक्ष्मणो वाक्यं हृष्टो मधुरमब्रवीत् ॥
नतु तापं महाबाहो मदर्थं कर्तुमर्हसि। पूर्वं निर्माणबद्धा हि कालस्य गतिरीदृशी ॥
जहि मां सौम्य विस्रब्धः प्रतिज्ञां परिपालय।
हीनप्रतिज्ञाः काकुत्स्थ प्रयान्ति नरकं नराः ॥
यदि प्रीतिर्महाबाहो यद्यनुग्राह्यता मयि। जहि मां निर्विशङ्कस्त्वं धर्मं वर्धय राघव ॥
लक्ष्मणेन तथोक्तस्तु रामः प्रचलितेन्द्रियः। मन्त्रिणस्समुपानीय तथैव च पुरोधसः ॥
अब्रवीच्च यथावृत्तं तेषां मध्ये स राघवः। दुर्वासाभिगमं चैव प्रतिज्ञां तापसस्य च ॥
तच्छ्रुत्वा मन्त्रिणस्सर्वे सोपाध्यायास्सहानुगाः।
वसिष्ठस्तु महातेजा वाक्यमेतदुवाच ह।
त्यजैनं बलवान्कालो मा प्रतिज्ञां वृथा कृथाः ॥
विनष्टायां प्रतिज्ञायां धर्मोऽपि विलयं व्रजेत्।
ततो धर्मे विनष्टे तु त्रैलोक्यं सचराचरम् ॥
सदेवर्षिगणं सर्वं विनश्येत न संशयः। स त्वं पुरुषशार्दूल त्रैलोक्यस्यापि पालनात् ॥
लक्ष्मणस्य वधेनाद्य जगत्स्वस्थं कुरुष्व ह। तेषां तत्समवेतानां वाक्यं धर्माभिसंहितम् ॥
श्रुत्वा परिषदो मध्ये रामो लक्ष्मणमब्रवीत्। विसर्जये त्वां सौमित्रे माभूद्धर्मविपर्ययः ॥
त्यागो वधो वा विहितस्साधूनामुभयं मतम् ॥ इति।

मृगयायां वधे दोषो नास्तीति तृतीयपरिहारोऽपि क्षत्रियाणां मृगवधे दोषो नास्तीत्यभिप्रायकः। मृगवधे दोषो नास्तीति पाण्डुवचनं ऋषिरप्यंगीकृतवानिति प्रतिपादितमादिपर्वणि :—

शत्रूणां या वधे वृत्तिः सा मृगाणां वधे स्मृता। राज्ञां मृग न मां मोहात्त्वं विगर्हितुमर्हसि ॥
अच्छद्मना मायया वा मृगाणां वध इष्यते। स एव धर्मो राज्ञां तु तद्धित्वं किन्नु गर्हसे ॥
अगस्त्यस्सत्रमासीनः चकार मृगयामृषिः। आरण्यान्सर्वदैवत्यान्मृगान्प्रेक्ष्य महावने ॥
प्रमाणमिष्टधर्मेण कथमस्मान्विगर्हसे। अगस्त्यस्याभिचारेण युष्माकं चैव पाण्डुना ॥
प्रमत्तमप्रमत्तं वा विवृतं घ्नन्ति चौजसा। उपायैर्विविधैस्तीक्ष्णैः कस्मान्मृग विगर्हसे ॥
ऋषिः — नाहं घ्नन्तं मृगान्राजन् विगर्हे चात्मकारणात्।
मैथुनं तु प्रतीक्ष्यं मे त्वयेहाद्यानृशंस्यतः ॥ इति।

तस्माद्धर्मातिक्रमणकर्तुः शिक्षणीयत्वात्, प्रतिज्ञायाश्चावश्यपरिपालनीयत्वात् मृगवधे दोषाभावाच्च वधो युक्त एवेति ।

किञ्च स्वमित्रसुग्रीवशत्रुत्वात् स्वशत्रुरावणमित्रत्वाच्च वाली हन्तव्यः । तथाच **गदापर्वणि** भगवद्वचनम् —

आत्मवृद्धिर्मित्रवृद्धिर्मित्रमित्रोदयस्तथा । विपरीतं द्विषत्स्वेतत् षड्विधा वृद्धिरात्मनः ॥

आत्मन्यपि च मित्रेषु विपरीतं यदा भवेत् ।
तदा विद्यान्मनोग्लानिं तासु शान्तिकरो भवेत् ॥ इति ।

अत एव द्रोणपर्वणि अर्जुनशत्रुहननेन अर्जुनसुहृदं मां जानन्तु इत्याह कृष्णः —

अहं विजित्य तान्सर्वान्सहसा सहयद्विपान् । अर्जुनार्थे हनिष्यामि सकर्णान् ससुयोधनान् ॥
श्वो निरीक्षन्तु मे वीर्यं त्रयो लोका महाहवे । धनञ्जयार्थं समरे पराक्रान्तस्य दारुक ॥
श्वस्तां चक्रप्रमथितां द्रक्ष्यसे नृपवाहिनीम् । मया क्रुद्धेन समरे पाण्डवार्थे निपातिताम् ॥

श्वस्सदेवास्सगन्धर्वाः पिशाचोरगराक्षसाः ।
ज्ञास्यन्ति लोकास्सर्वे मां सुहृदं सव्यसाचिनः ॥ इति ॥

किंच स्वशत्रुत्वादपि हन्तव्यः । स्वशत्रुत्वं च मित्रशत्रुत्वात् । अत एव मित्रद्वेषिणमेव स्वद्वेषिणमाह उद्योगे भगवान् —

एकात्मतां गतं विद्धि पाण्डवैर्धर्मचारिभिः ।
यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु ॥ इति ॥

तस्मान्मित्रशत्रोः स्वशत्रुत्वादपि तद्धननं युक्तमेव । किंच स्वकीयस्यापन्नस्य रक्षणाय अन्यायेनापि तच्छत्रोर्वधो न दोषाय । अत एवार्जुनेन अत्यन्तापन्नं स्वशिष्यं सात्यकिं हन्तुं प्रवृत्तस्य भूरिश्रवसः सखड्गे बाहौ छिन्ने तेन चान्यसंगतस्य मम बाहुछेदनं तव पापावायकमिति भूरिश्रवसा दूषितः स्वकीयस्यापत्समये रक्षणाय, अन्यायेनापि शत्रुवधोऽवश्यं कर्तव्यः अन्यथा पापं भवतीति भूरिश्रवसं प्रत्युक्तवानिति प्रतिपादित **द्रोणपर्वणि** —

संग्रामाणां हि धर्मज्ञः सर्वशास्त्रार्थपारगः । न चाधर्ममहं कुर्यां जानंश्चैव हि मन्यसे ॥
नचात्मा रक्षितव्यो वै राजत्रणगतेन हि । यो यस्य युज्यतेऽर्थेषु स वै रक्ष्यो नराधिप ॥
संरक्ष्यमाणैः स नृपो रक्षितव्यो महामृधे । यद्यहं सात्यकिं पश्ये वध्यमानं महारणे ॥

ततस्तस्य वियोगेन पापं मेनर्थतो भवेत् । रक्षितस्य मया यस्मात्तस्मात्क्रुध्यसि किं मयि ॥

यदीच्छसि शिरश्चास्य असिना हन्तुमाहवे ।
तथा कृच्छ्रगतं चैव सात्यकिं कः क्षमिष्यति ॥ इति ॥

तस्माद्वालिना हन्यमानस्य स्वकीयस्य सुग्रीवस्य संरक्षणार्थं छद्मना कृतो वालिवधो न दोषाय इति ॥

ननूक्तैर्हेतुभिर्वालिनो वध्यत्वे सुग्रीवपुरस्कारो व्यर्थः । स्वयमेव युद्धं कृत्वा वधकरणसंभवात् इति चेन्न, भ्रात्रोः परस्परं कलहप्रसक्तौ सहायार्थमानीतैस्तद्ग्लानिसमये तत्प्रार्थितैरेव सहायस्य कर्तव्यत्वात् । अयमर्थो **भीष्मपर्वणि** धृतराष्ट्रं प्रति जनमेजयेनोक्तः—

महान्त्यनीकानि महासमुच्छ्रये समागमे पाण्डवधार्तराष्ट्रयोः ।
चकम्पिरे शंखमृदङ्गनिस्वनैः प्रकंपितानीव वनानि वायुना ॥

भीमसेनो महाबाहुः प्रणदन्गोवृषो यथा । शंखदुन्दुभिनिर्घोषान्वारणानां च बृंहितम् ॥
सिंहनादं च सैन्यानां भीमसेनरवोऽभ्यभूत् । तमायान्तं महेष्वासं सोदर्याः पर्यवारयन् ॥
छादयन्तः शरव्रातैः मेघा इव दिवाकरम् । दुर्योधनश्च पुत्रस्ते दुर्मुखो दुस्सहस्सहः ॥
दुश्शासनश्चातिरथस्तथा दुर्मर्षणो नृप । विविंशतिश्चित्रसेनो विकर्णश्च महारथः ॥
पुरुमित्रो महाभोजः सौमदत्तिश्च वीर्यवान् । महाचापानि धुन्वन्तो जलदा इव विद्युतः ॥
आददानाश्च नाराचान्निर्मुक्ताशीविषोपमान् । विनिश्चेरुश्शरादीप्ता ज्योतींषि च नभस्थलात् ॥
सर्वे त्वन्ये महीपालाः प्रेक्षका इव भारत । ददृशुर्दर्शनीयं तं भीमा ज्ञातिसमागमम् ॥
कुरुपाण्डवसेने ते हस्त्यश्वरथसंकुले । शुशुभाते रणेतीव पटे चित्रगते इव ॥
ततस्ते पार्थिवास्सर्वे प्रगृहीतशरासनाः । सहसैन्यास्समापेतुः पुत्रस्य तव शासनात् ॥
युधिष्ठिरेण चादिष्टाः पार्थिवास्ते सहस्रशः । विनदन्तः समापेतुः पुत्रस्य तव वाहिनीम् ॥
इति । अत एव — वालिना भग्नदर्पस्स सुग्रीवो मन्दविक्रमः ।
वालिनं प्रति सामर्षो दर्शयामास राघवम् । ततो रामो महातेजा आर्तं दृष्ट्वा हरीश्वरम् ॥
स शरं वीक्षते वीरो वालिनो वधकारणात्, इति वचनेन सुग्रीवग्लानिसमये तदा तदभिप्रायेणैव वालिवधे यत्नः कृत इत्युक्तम् । तस्माद्वालिवधे सुग्रीवपुरस्कारो युक्तः ।

नन्वेवं धर्मातिक्रमादिहेतुभिः वध्यत्वमास्तां वालिनः, तथापि धार्मिकस्य रामस्य छद्मना वधकरणमयुक्तं, तस्य निषिद्धत्वात्। तथा च **मनुः** —

न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्। न भीतं न परावृत्तं न परेण समागतम्॥इति

गौतमोऽपि — "न दोषो हिंसायामाहवेऽन्यत्र व्यश्वसारथ्यायुधकृताञ्जलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः" इति। तथा **द्रोणपर्वणि** सात्यकिना सह युद्धवेलायां छद्मना स्वबाहुच्छेदिनमर्जुनं प्रति भूरिश्रवसो वाक्यम् —

ननु नामास्त्रधर्मज्ञः त्वं लोकेभ्यधिकः परैः। सोऽयुध्यमानस्य कथं रणे प्रहृतवानसि॥
न प्रमत्ताय भीताय विरथाय प्रयाचते। व्यसने वर्तमानाय प्रहरन्ति मनस्विनः॥
को हि नाम प्रमत्ताय परेण सह युध्यते। ईदृशं व्यसनं दद्याद्यो न कृष्णसखो भवेत्॥इति

न च नायं वालिवधः छद्मना कृतः किंतु —

जीवपुत्रे निवर्तस्व पुत्रं रक्षस्व चाङ्गदम्। अन्तको रामरूपेण हत्वा नयति वालिनम्॥
क्षिप्तान्वृक्षान्समाविध्य विपुलाश्च शिलास्तथा। वाली वज्रसमैर्बाणैः वज्रेणेव निपातितः॥

इति वचनेन वालिप्रहितवृक्षपाषाणनिरसनपूर्वकं रामेण वाली हत इति प्रतिपादनेन सम्मुखवध एवेति वाच्यं, "दृश्यमानस्तु युध्येथाः, पराङ्मुखवधं कृत्वेत्यादिबहुवचनैः प्रच्छन्नवधस्यैवावगमात्। क्षिप्तान् वृक्षानिति वचनं तु सुग्रीवं प्रति वालिना प्रहितवृक्षपाषाणवृष्टिं समाहृत्य वाली हत इत्येतदभिप्रायकम्। अतः अन्यसंगतवालिवधः रामेण कथं कृत इति चेन्न, आपदि छद्मना वधस्य अदोषत्वात्। तथाचापद्धर्मे —

सुविदीर्णं सुविक्रान्तं सुयुद्धं सुपलायिनम्। आपद्यापदि काले च कुर्वीत न विचारयेत्॥
अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत्। कुर्यात्तृणमयं चापं शयीत मृगशायिकाम्॥
सामादिभिरुपायैश्च हन्याच्छत्रून्वशे स्थितान्। दया तस्मिन्न कर्तव्या शरणागत इत्युत॥
निरुद्विग्नो हि भवति न हताज्जायते भयम्। हन्यादमित्रं दानेन तथा पूर्वापकारिणम्॥
अग्न्याधानेन यज्ञेन काषायेन जटाजिनैः। लोकान्विश्वासयित्वा च ततो लुम्पेद्यथा वृकः॥
आनम्य फलिनीं शाखां यथा पक्वं प्रशातयेत्। फलार्थोऽयं समारंभो लोके पुंसां विपश्चिताम्॥
वहेदमित्रं स्कन्धेन यावत्कालस्य पर्ययः। ततः पर्यागते काले भिन्द्याद्घटमिवाश्मनि॥
अमित्रो न विमोक्तव्यः कृपणं बह्वपि ब्रुवन्। कृपा तस्मिन्न कर्तव्या हन्यादेवापकारिणम्॥

हन्यादमित्रं सान्त्वेन तथा दानेन वा पुनः। तथैव भेददण्डाभ्यां सर्वोपायैः प्रसाधयेत् ॥इति

एवं च रामस्यापि दारराज्यापहरणेन सहायालाभेन शत्रुप्राबल्येन च प्राणापायत्वेन आपद्धर्ममनुसृत्य रामकृतः पराङ्मुखवालिवधो न दोषायेति वक्तुं शक्यम्।

वस्तुतस्तु मुख्यधर्मानुसारेणैव वालिहननम्। तथाहि — रामस्तावदग्निसाक्षिकं सुग्रीवेण सख्यं कृतवान्। सुग्रीवेण च —

अहं विनिकृतो भ्रात्रा चराम्येष भयार्दितः। ऋष्यमूकं गिरिवरं हृतभार्यः सुदुःखितः॥
सोऽहं त्रस्तो भये मग्नो वसाम्युद्भ्रान्तचेतनः। वालिना निकृतो भ्रात्रा कृतवैरश्च राघव॥
वालिनो मे भयार्तस्य सर्वलोकभयंकर। ममापि त्वमनाथस्य प्रसादं कर्तुमर्हसि॥

इत्यादिवचनैर्दैन्यं प्रकटितम्। दीनस्य सुग्रीवस्य रक्षणं रामस्य धर्मः। राज्ञां दीनजनरक्षणस्य परमधर्मत्वात्। तथा च **कामन्दकः** —

वाक् सूनृता दया दानं दीनोपगतरक्षणम्। इति संगः सतां साधुहितं तत्पुरुषव्रतम्॥
आविष्ट इव दुःखेन तद्गतेन गरीयसा। समन्वितः करुणया परया दीनमुद्धरेत्॥
न तेभ्योऽभ्यधिकास्सन्ति सतस्सत्पुरुषव्रतम्। दुःखपंकार्णवे मग्नं दीनमभ्युद्धरन्ति ये॥
दयामास्थाय परमां धर्मादविचलन्नृपः। पीडितानामनाथानां कुर्यादश्रुप्रमार्जनम्॥
आनृशंस्यं परो धर्मः सर्वप्राणिभृतां व्रतम्। तस्माद्राजानृशंस्येन पालयेत्कृपणं जनम्॥ इति।

कर्णपर्वण्यपि —

आपद्गतं कंचन यो विमोक्षेत् स बान्धवस्नेहयुतः सुहृच्च।
एवं पुराणे ऋषयो वदन्ति धर्मस्सदा सद्भिरनुष्ठितश्च॥ इति॥

सति सामर्थ्ये आर्तसंरक्षणाकरणे प्रत्यवायमाह गौतमः — "ब्राह्मणाभिशंसने दोषस्तावान्" "द्विरनेनसि" "दुर्बलहिंसायां चाविमोचने शक्तश्चेत्" इति।

आदिपर्वण्यौर्वेऽपि —

जानन्नपि च यः पापं शक्तिमान्न नियच्छति। ईशस्सन् सोऽपि तेनैव कर्मणा सम्प्रयुज्यते॥ इति

हरिवंशे ब्रह्मदत्तपूजनीयसंवादे—

ननु नूनं श्रुता तेभूदियमांगीरसी श्रुतिः। शरणागतः क्षुधार्तश्च शत्रुभिश्चाप्युपद्रुतः॥
चिरोषितश्च स्वगृहे पातव्यः सर्वतो भयात्। अपालयन्नरो याति कुंभीपाकमसंशयम्॥

कथमस्य हविर्देवा गृह्णन्ति पितरः स्वधाम्, इति। अतस्तद्दैन्यापनोदनाय —

अद्यैव तं हनिष्यामि तव भार्यापहारिणम्। भ्रातृसंज्ञममित्रं ते वालिनं कृतकिल्बिषम् ॥
शरैर्विनिहतं पश्य विशीर्णमिव पर्वतम्। यावत्तं नहि पश्यामि तव भार्यापहारिणम् ॥
तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः। आत्मानुमानात्पश्यामि मग्नं त्वां शोकसागरे ॥
त्वामहं तारयिष्यामि कामं प्राप्स्यसि पुष्कलम्,

इति प्रतिज्ञामकरोत्। प्रतिज्ञातार्थपरिपालनं च राजधर्मः। तथा च **गदापर्वणि** — प्रतिज्ञापालनं धर्मः क्षत्रियस्येति वेत्थ ह, इति। **आरण्यकाण्डे**ऽपि सीतां प्रति रामः—

अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्। नतु प्रतिज्ञां संश्रुत्य ब्राह्मणेषु विशेषतः ॥

इति। **किष्किन्धाकाण्डे**ऽपि —

शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम्। सत्येन परिगृह्णाति स वीरः पुरुषोत्तम ॥ इति

युद्धकाण्डेऽपि —

लक्षणं हि महत्वस्य प्रतिज्ञापरिपालनम्, इति।

यस्य च यदवश्यकर्तव्यत्वेन विहितं तदर्थतया प्रसक्तमपि प्रतिषिद्धाचरणं प्रत्यवायकरं न भवति। तथाच **सुरेश्वरवार्तिके** —

समाप्तिं न समायाति प्रधानं यदसम्भवे। निषिद्धमपि तत्कार्यं तत्समाप्तिप्रयुक्तितः ॥ इति।

एवं च इतरधर्मविरोधेऽपि तदेव परिपालनीयम्। अत एव **गदापर्वणि** भीमेन गदया ऊर्वोः प्रहृतं दुर्योधनमवलोक्य —

नैतद्दृष्टं गदायुद्धं कृतवान्यद्वृकोदरः। अधो नाभेर्न हन्तव्यमिति शास्त्रविनिश्चयः ॥

इति प्रतिषेधात् अयुक्तमिदमिति कुपितं बलरामं प्रति प्रतिज्ञातार्थपरिपालनाय किञ्चिन्निषिद्धाचरणमपि दोषाधायकं न भवति, अपि तु धर्माधायकमेवेति प्रतिपादितं भगवता कृष्णेन

प्रतिज्ञापालनं धर्मः क्षत्रियस्येति वेत्थ ह। सुयोधनस्य गदया भङ्क्तास्म्यूरू महाहवे ॥
इति पूर्वं प्रतिज्ञातं भीमेन हि सभातले। आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः ॥
अतो दोषं न पश्यामि मा क्रुधस्त्वं प्रलम्बहन्। इति।

अत एव गाण्डीवमन्यस्मै प्रयच्छेति वक्तुः शिरश्छेदं करिष्यामीति कृतप्रतिज्ञस्त्वद्धस्तात्कर्णवधो न भविष्यति गाण्डीवं कृष्णाय देहीति कर्णेनोक्तः पूर्वप्रतिज्ञातार्थनिर्वहणाय धर्मिष्ठस्य राज्ञः अयुध्यमानस्य गुरोर्वधार्थमुद्युक्तवानिति प्रतिपादनं **कर्णपर्वणि** —

स गाण्डीवं केशवाय प्रदाय यन्ता भवेस्त्वं यदि केशवस्य।
ततस्तरेत्केशवः कर्णमुग्रं मरुत्सखो वृत्रमिवात्तवज्रः ॥

इति धर्मपुत्रेणोक्ते अर्जुनः –

अन्यस्मै देहि गाण्डीवमिति मां यः प्रचोदयेत्। छिन्द्यामहं शिरस्तस्य इत्युपांशु व्रतं मम ॥
यदुक्तोहमदीनार्थं राज्ञानेन यशस्विना। समक्षमिह गोविन्द तन्न क्षन्तुमिहोत्सहे ॥
तस्मादेनं वधिष्यामि राजानं धर्मचारिणम्। प्रतिज्ञां पालयिष्यामि हत्वैतन्नरसत्तमम् ॥
एतदर्थं मया खड्गो गृहीतो यदुनन्दन। सोहं युधिष्ठिरं हत्वा सत्यस्यानृण्यतां गतः ॥
विशोको विज्वरश्चैव भविष्यामि जनार्दन इति ॥

एवं च अद्यैव तं हनिष्यामीति प्रतिज्ञापरिपालनं तदा भवेत् यदा प्रच्छन्नतया हननमिति। प्रकाशतया युद्धायाहूतस्तु भयान्नागच्छेत्, रुमां गृहीत्वा देशान्तरं वा गच्छेत्, रावणं वा समाश्रयेत्, शरणं वा समागच्छेत्, ससहायं सुग्रीवमवलोक्य सकलवानरसेनया युद्धार्थं समागच्छेद्वा। तत्राद्यपक्षत्रये तद्धननस्य चिरकालसाध्यत्वेन अद्यैव तं हनिष्यामि रुमां राज्यं च तव दास्यामीति पूर्वप्रतिज्ञातकालातिपातः स्यात्। प्रतिज्ञाकालातिपाते च दोषः श्रूयते **महाप्रस्थानिके** —
एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोब्रवीत्। नचैतत्कृतवानेषु शूरमानी ततोऽपतत् ॥ इति ॥

शरणागमनपक्षे च शरणागतो वाली हन्येत वा नवा, नाद्यः, शरणागतहननस्य निषिद्धत्वात्। तथाच तैत्तिरीयश्रुतौ– तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति इति **अनुशासनिकेऽपि** --

भवेत्स गुरुतल्पी च भ्रूणहा च स वै भवेत्। सुरापानं स कुर्याच्च यो हन्याच्छरणागतम्, इति।
विभीषणो वा सुग्रीव यदि वा रावणः स्वयम्। आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया ॥
सकृदेव प्रपन्नाय तवास्मीति च याचते। अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम ॥ इति
कृतप्रतिज्ञावतः अन्तःपुरद्रोहिणं जयन्तं शरणागत इति विसृष्टवतः रामभद्रस्य शरणागत-

वालिवधे प्रवृत्त्यनुपपत्तिश्च। यदि न हन्यते तदा अद्यैव तं हनिष्यामीत्यादिप्रतिज्ञा-विरोध इति।

सुसन्नद्धः कवचिना योद्धव्यः क्षत्रियो रणे। स चेत्ससैन्य आयाति ससैन्यस्तं तथाह्वयेत् ॥

इति राजधर्मवचनपर्यालोचनया ससहायेन शत्रुणा सह युद्धस्य सहायसहितेनैव कर्तव्यत्वात्, रामेण ससहायं सुग्रीवं प्रति सकलवानरसेनया सह युद्धायागच्छेदिति पक्षे "वन्यानामहमपि राजराण्मृगाणामित्यनेन मृगराजत्वेन भरतं प्रति कृतप्रतिज्ञस्य रामभद्रस्य स्वप्रजा एव वानरा हन्तव्या भवेयुः। तच्चाधर्म्यं राज्ञां स्वशरीररक्षणापेक्षया प्रजासंरक्षणस्यावश्यकर्तव्यत्वात्। तथाच **कामन्दके**—

लोके वेदे च कुशलः कुशलैः परिवारितः। आहृतश्चिन्तयेद्राज्यं सबाह्याभ्यन्तरं नृपः ॥
आभ्यन्तरं शरीरं स्वं बाह्यं राष्ट्रमुदाहृतम्। अन्योन्याधारसंबन्धादेकमेवेदमुच्यते ॥
राज्यांगानां तु सर्वेषां राष्ट्राद्भवति संभवः। तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं समुन्नयेत् ॥
लोकानुग्रहमन्विच्छन् शरीरमनुपालयेत्। राज्ञः संरक्षणं धर्मः शरीरं धर्मसाधनम् ॥ इति ॥

प्रजापालने फलमाह मनुः—नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः, इति। प्रजापीडनं च राज्ञां नरकप्रदम्। तथा च राजधर्मे—

दण्डनीतिं समुत्सृज्य यदा कात्स्र्न्येन भूमिपः। प्रजाः क्लिश्नात्ययोगेन प्रवर्तेत तदा कलिः ॥
कलेः प्रवर्तनाद्राजा पापमत्यन्तमश्नुते। ततो वसति दुष्कर्मा निरये शाश्वतीः समा इति ॥

एवमवश्यरक्षणीयानां प्रजानां येनोपद्रवः शंकितो निर्णीतो वा तादृशस्य छद्मना वधोऽपि धर्म्य एव। तदुक्तं **कामन्दके**--

धर्म्यामारेभिरे हिंसामृषिकल्पा महीभुजः। तस्मादसाधून् धर्माय निघ्नन्दोषैर्न लिप्यते ॥
धर्मसंरक्षणपरो धर्मायार्थं विवर्धयेत्। ये ये प्रजाः प्रबाधेरन् तांस्तान्हन्यान्महीपतिः ॥
यमार्याः क्रियमाणं हि शंसन्त्यागमवेदिनः। स धर्मो यं विगर्हन्ति तमधर्मं प्रचक्षते ॥
धर्माधर्मौ विजानन्हि शासने निरतस्सताम्। प्रजा रक्षेन्नृपस्साधु हन्याच्च परिपन्थिनम् ॥
धर्माभिचारा ये पापाः चोराः लोकस्य कण्डकाः। समागच्छन्ति तान्बुध्वा नियच्छेच्छमयीत वा ॥
प्रकाशश्चाप्रकाशश्च दण्डो द्विविध इष्यते। प्रकाशदण्डान्कुर्वीत लोकद्विष्टांस्तथा रिपून् ॥

विषेणोपनिषद्योगैः शस्त्रेणोद्वर्तनेन वा। तथोपांशु नयेद्दण्डं यथान्यो न विभावयेत् ॥
राज्योपघातं कुर्वीरन् ये पापाः राजवल्लभाः। एकैकशस्संहतान्वा दूष्यांस्तान्परिचक्षते ॥
दूष्यानुपांशुदण्डेन हन्याद्राजाविलंबितम्। प्रदूष्य वा प्रकाशं हि लोकविद्वेषमागतान् ॥
राजा रहसि दूष्यं हि दर्शनायोपमन्त्रयेत्। गूढशस्त्रा विशेयुस्तं पश्चादासंजिता नराः ॥
विश्वस्तान्हि विचिन्वीयुः द्वाःस्थाः कक्षांतरं गतान्। तेशस्त्रग्राहिणो ब्रूयुः प्रयुक्ताः स्म इति स्फुटम्
इत्यादिदूष्यान्सन्दूष्य प्रजानामभिवृद्धये। निनीषुः श्रियमुत्कर्षं राजा शल्यं समुद्धरेत् ॥ इति

भारतेऽपि —

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम्। अर्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते ॥ इति

अत्र हि तुल्यसामर्थ्यादियुक्तस्य अर्धराज्यं हरिष्यतीति शंकया तद्धननं प्रतिपादितम्। **रामश्च** यत्र प्रजोपरोधस्तत्र न प्रवर्तते। अत एव प्रजोपरोधकत्वादुत्कृष्टधर्ममपि राजसूयं परिहृतवानित्यवगत**मुत्तररामायणे —**

अक्षयश्चाव्ययश्चैव धर्मसेतुर्मतो मम। धर्मप्रसवनं त्वेतत्सर्वपापप्रणाशनम् ॥
युवाभ्यामात्मभूताभ्यां राजसूयमनुत्तमम्। सहितो यष्टुमिच्छामि यत्र धर्मो हि शाश्वतः ॥

इति रामवाक्यं निशम्य भरतः —

त्वयि धर्मः परस्साधो त्वयि सर्वा वसुन्धरा। प्रतिष्ठिता महाबाहो वयं चामितविक्रम ॥
महीपालाश्च सर्वे त्वां प्रजापतिमिवामराः। निरीक्षन्ते महात्मानो लोकनाथ यथा वयम् ॥
प्रजाश्च पितृवद्राजन् पश्यन्ति त्वां महाबल। पृथिव्यां गतिभूतोऽसि प्राणिनामपि राघव ॥
स त्वमेवंविधं यज्ञमाहर्तासि कथं नृप। पृथिव्यां राजवंश्यानां विनाशो यत्र दृश्यते ॥
पृथिव्यां ये च पुरुषाः राजन्पौरुषमागताः। सर्वेषां भविता तत्र क्षयः सर्वान्तको यतः ॥
स त्वं पुरुषशार्दूल गुणैरमितविक्रमः। पृथिवीं नार्हसे हन्तुं वशे हि तव वर्तते ॥

ततो रामः —

प्रीतोऽस्मि परितुष्टोस्मि तवाद्य वचनेन हि। इदं वचनमक्लीबं त्वया धर्मसमाहितम् ॥
व्याहृतं पुरुषव्याघ्र पृथिव्याः परिपालनम्। एष तस्मादभिप्रायाद्राजसूयात्क्रतूत्तमात् ॥
निवर्तामि महाबाहो तव सुव्याहृतेन वै, इति।

अन्तर्हितेन्द्रजिद्वधार्थतया सकलराक्षसहननाय प्रवृत्तं लक्ष्मणं प्रति—

नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि, इति वदतो रामभद्रस्य वालिवध-निमित्तं सकलवानरहनने प्रवृत्तिश्चासंभावितैव। एवंच प्रकाशेन युद्धारंभे उक्तरीत्या अद्यैव तं हनिष्यामीति रुमां राज्यं च तव दास्यामीति च प्रतिज्ञापालनं न भवेत् बहुप्रजोपरोधो वा भवेत्, इति मनसि विचिन्त्य धर्म्यमित्येव प्रच्छन्नवधं कृतवानिति युक्तमेव। यः कश्चिद्धर्मसमयात्प्रच्युतो धर्मसाधनः। दम्भेनैव स हन्तव्यस्तं पन्थानं समाश्रितः, इति भारतवचनपर्यालोचनया धर्मच्युतश्छद्मनापि हन्तव्यः, नच हन्यात्स्थलारूढमिति निषेधवचनं च प्रतिज्ञापरिपालनाद्यविरुद्धहननविषयमित्यखिलमपि समञ्जसम् ॥

ननूक्तरीत्या छद्मना वालिवधस्य धर्म्यत्वेऽपि रामः वालिवधमधर्मेण कृतवानिति लोकापवादेन — चिरं स्थास्यति चाकीर्तिस्त्रैलोक्ये सचराचरे। रामे वालिवधाद्यद्वदेवं द्रोणे निपातिते, इति **द्रोणपर्वणि** धर्मपुत्रं प्रति अर्जुनवचनेन चापकीर्त्यवगमात् —
अकीर्तिर्यस्य जायेत लोके भूतस्य कस्यचित्। पतत्येवाधमान् लोकान्यावच्छब्दस्तु कीर्त्यते ॥
इत्युत्तरकाण्डे रामवचनेन च—

अकीर्तिः कीर्त्यते लोके यस्य भूतस्य कस्यचित्। स पतत्यधमाँल्लोकान् यावच्छब्दः प्रकीर्त्यते ॥

इति वनपर्ववचनेन च पुरुषस्य यावदपयशस्तिष्ठति तावदस्वर्ग्यत्वावगमात् अयशः-प्रयुक्तप्रत्यवायः अपरिहार्य एवेति चेन्न। प्रतिज्ञातार्थनिर्वहणे क्रियमाणे प्रसक्ता-पकीर्तेः प्रत्यवायकरत्वाभावेन तद्व्यतिरिक्तस्थल एव तस्याः प्रत्यवायकरत्वात्। तथाहि, अकीर्तिस्तावद्विविधा कामक्रोधलोभादिमूलकप्रतिषिद्धाचरणप्रयुक्ता एका, धर्मसंरक्षणार्थतया शास्त्रान्तरप्रतिषिद्धाचरणप्रयुक्ता अपरा। तत्राद्यैव प्रत्यवायहेतुः। तद्विषयाण्येव 'अकीर्तिः कीर्त्यते, इत्यादि निन्दावचनानि। अत एव राज्यलोभाद्धर्मपुत्रस्य अश्वत्थामा हत इत्यनृतवचनप्रयुक्तापकीर्तिवशात्प्रत्यवायः इह लोके उपरि चरतो रथस्य सद्य एवाधः पतनं, परत्र च नरकदर्शनमुक्तं भारते। तत्र प्रत्यवायो **द्रोणपर्वणि**—

उपचीर्णो गुरुर्मिथ्या भवता राज्यकारणात्। धर्मज्ञेन सता नाम सोधर्मः सुमहान्कृतः ॥ इति ॥
रथपतनमपि तत्रैव —

तमतथ्यभये मग्ने जये सक्तो युधिष्ठिरः। अव्यक्तमब्रवीद्वाक्यं हतः कुञ्जर इत्युत ॥

तस्य पूर्वं रथः पृथ्व्यां चतुरंगुलमुन्नतः । बभूव चैव तेनोक्ते तस्य वाहास्पृशन्महीम् ॥ इति

नरकदर्शनं च **स्वर्गारोहणिके**—

व्याजेन हि त्वया द्रोणः उपचीर्णः सुतं प्रति । व्याजेनैव ततो राजन् दर्शितो नरकस्तव ॥ इति

द्वितीया तु प्रत्यवायाय न भवति–अत एव "सुयोधनस्य गदया भङ्क्तास्म्यूरू महाहवे" इति प्रतिज्ञातार्थनिर्वहणाय निषिद्धोऽपि सुयोधनोरुभङ्गः भीमस्य प्रत्यवायाधायको न भवतीत्युक्तं **गदापर्वणि**—

आनृण्यं यातु वैरस्य प्रतिज्ञायाश्च पाण्डवः । अतो दोषं न पश्यामि मा क्रुधस्त्वं प्रलंबहन्, इति । प्रतिज्ञातार्थपरिपालनं च धर्मान्तरोपमर्देनापि कर्तव्यमित्येतच्च प्राक् प्रपञ्चितम् । एवं प्रतिज्ञातरक्षणस्य प्रबलधर्मत्वेन—

यथाप्रतिज्ञं त्वं पार्थ तीर्त्वा कीर्तिमवाप्स्यसि, इति भगवद्वचनेन तज्जन्यत्वेनावगतायाः कीर्तेरपि प्रबलत्वात् तदपेक्षया प्रच्छन्नवधजनिता दुर्बलापकीर्तिरकिञ्चित्करी । यदि चैवं दुर्बलाप्यपकीर्तिः प्रत्यवायाय भवेत्तदा—

यदि प्रव्राजितो रामो लोभकारणकारितम् । वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतम् ॥
असमीक्ष्य समारब्धं विरुद्धं बुद्धिलाघवात् । नयिष्यत्यतिसंक्रोशं राघवस्य विवासनम् ॥

इति लक्ष्मणवचनावगता दशरथस्यापकीर्तिः प्रत्यवायाय भवेत्, नचैवं दृश्यते, प्रत्युत—

सदानृणमिमं रामं वयमिच्छामहे पितुः । अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः ॥

इत्ययोध्याकाण्डे ऋषिवचने—

एष राजा विमानस्थः पिता दशरथस्तव । इन्द्रलोकं गतः श्रीमान् त्वया पुत्रेण तारितः ॥

इति **युद्धकाण्डे** रामं प्रति महेश्वरवचनेन "इन्द्रलोकं विमानेन पिता दशरथो ज्वलन्" इति वचनेन च प्रबलतरया प्रतिज्ञापरिपालनजन्यकीर्त्या दशरथस्य स्वर्ग एवावगम्यते । अतः युधिष्ठिरस्य राज्यलोभप्रयुक्तानृतवचनजनितापकीर्तेः प्रत्यवायकरत्वेऽपि रामस्य प्रतिज्ञापरिपालनार्थतया क्रियमाणवालिवधजनितापकीर्तेर्न प्रत्यवायकरत्वम् । एवं रामस्य प्रतिज्ञातार्थनिर्वहणे प्रसक्तो वालिवधो न दोषाय ॥

ननु रामकृतवालिवधोऽपि प्रत्यवायकर एव सीताप्राप्तिलोभेन हनूमदुपदिष्टप्रकारेण सुग्रीवेण सख्यं विधाय कृतत्वात् इति चेन्न। सुग्रीवसख्याचरणे तस्य हेतुत्वेऽपि वालिवधे लोभस्यानिमित्तत्वात्। तथाहि – सीतापहरणेन सन्तप्तहृदयस्तल्लाभोपायमलभमानो रामस्सुग्रीवसहायेन सीताप्राप्तिं दनुजवचनादवगत्य तदानीं प्रत्युपकारमप्रार्थितवता सुग्रीवेण स्वयमेव शरणं गत्वा सख्यं कृतवान्। ततश्च मित्रेण सुग्रीवेण दैन्यपूर्वकं स्वदुःखे निवेदिते दीनोद्धरणस्य मित्रसंरक्षणस्य च धर्मत्वात्तदर्थं सशपथं अद्यैव तं हनिष्यामीति प्रतिज्ञातम्। तन्निर्वाहाय प्रवृत्तो वालिवधः। न चात्र सीताप्राप्तिलोभो मूलम्। यदि च वालिवधे लोभ एव मूलं स्यात् तदा सख्यकरणवेलायां अहं वालिनं हनिष्यामि त्वया सीतान्विष्य देयेति समयबन्धः स्यात्। न च तथा दृश्यते। प्रत्युत मैत्रीकरणदशायां स्वकृतोपकारनिरपेक्षोऽयं सुग्रीवः मैत्रीं करिष्यति नवेति सन्देहेन "सुग्रीवं वानरेन्द्रं तु रामश्शरणमागतः" इत्यादिश्लोकैः शरणागमनपूर्वकं सख्यं कृतवानित्यवगम्यते। प्रत्युपकारसापेक्षत्वे सुग्रीवं प्रति शरणगमनवैयर्थ्यात्। तस्मात्सख्यकरण एव लोभो निमित्तं न वालिवधे। वस्तुतस्तु सुग्रीवसख्यकरणे वालिरावणवधे च न सीताप्राप्तिलोभो निमित्तं, किंतु स्वस्य कुलस्य च न्यङ्गतापरिहार एव निमित्तम्। तथा च युद्धकाण्डे वचनम् —

अब्रवीत्परुषं सीतां मध्ये वानररक्षसाम्। यत्कर्तव्यं मनुष्येण धर्षणं परिमार्जता ॥
तत्कृतं सकलं सीते शत्रुहस्तादमर्षिणा। निर्जिता जीवलोकस्य तपसा भावितात्मना ॥
अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक्। विदितश्चास्तु भद्रं ते योयं रणपरिश्रमः ॥
तीर्णः स सुहृदां वीर्यान्न त्वदर्थं मया कृतः। रक्षता तु मया वृत्तमपवादं च सर्वशः ॥
प्रख्यातस्यात्मवंशस्य न्यङ्गत्वं परिरक्षता। निर्जितासि मया सीते शत्रुं जित्वा महारणे ॥
प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता। दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढम् ॥
तद्गच्छ ह्यभ्यनुज्ञाता यथेष्टं जनकात्मजे। एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥
कः पुमान्हि कुले जातः स्त्रियं परगृहोषिताम्। तेजस्वी पुनरादद्यात् सुहृल्लेखेन चेतसा ॥
रावणाङ्कपरिभ्रष्टां दृष्टां दुष्टेन चक्षुषा। कथं त्वां पुनरादद्यां कुलं व्यपदिशन् महत् ॥
तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया। नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामिति ॥

अत एव रावणवधादिप्रयासेन प्राप्तां अग्न्यादिभिर्देवैः स्वात्मना च शुद्धत्वेन

निश्चितामपि सीतां लोकापवादभीत्या परित्यक्तवान् रामभद्र इति प्रतिपादित-मुत्तरकाण्डे —

पौरापवादस्सुमहान् तथा जनपदस्य च। वर्तते मयि बीभत्सा मम मर्माणि कृन्तति ॥
अहं किल कुले जात इक्ष्वाकूणां महात्मनाम्। सीतां पापसमाचारामानयेयं कथं पुनः ॥
प्रीत्यर्थं तव सौमित्रे देवानां हव्यवाहनः। अपापां मैथिलीं प्राह वायुश्चाकाशगोचरः ॥
एवं शुद्धसमाचारां देवगन्धर्वसन्निधौ। लङ्काद्वीपे महेन्द्रेण मम हस्ते निवेशिता ॥
अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्। अतो गृहीत्वा वैदेहीमयोध्यामहमागतः ॥
अयं च वादस्सुमहान् शोकश्च हृदि वर्तते। पौरापवादस्सुमहान् तथा जनपदस्य च ॥
अकीर्तिर्यस्य जायेत लोके भूतस्य कस्यचित्। पतत्येवाधमाल्लोंकान्यावच्छब्दस्तु कीर्त्यते ॥
अप्यहं जीवितं जह्यां युष्मान्वा पुरुषर्षभाः। अपवादभयाद्भीतः किंपुनर्जनकात्मजाम् ॥
श्वस्त्वं प्रभाते सौमित्रे सुमन्त्राधिष्ठितं रथम्। आरुह्य सीतामारोप्य विषयान्ते समुत्सृज ॥

इति। एवमपवादभीत्यापि सीतां परित्यक्तवतो रामस्य सीताप्राप्तिलोभेन अन्यसंगतवालि-वधप्रयुक्तदोषोपपादनं अयुक्तमेव।

एवंच यथा युधिष्ठिरस्य राज्यैकलुब्धस्य छद्मना गुरुवधप्रयुक्तापकीर्तिः प्रत्यवायाय न तथा रामस्य प्रतिज्ञापरिपालनरूपप्रबलतरधर्मसंरक्षणाय कृतवालिवध-प्रयुक्तापकीर्तिः प्रत्यवायाय। अतो "रामे वालिवधाद्यद्वदिति वचने अपकीर्तिमात्रे वालिवधो दृष्टान्तः, नतु प्रत्यवायकरत्वांशेऽपि। अत एव तत्रैव **द्रोणपर्वणि** षोडश-राजकीये सर्वप्रजाभिः सह रामः अप्रतिबन्धेन स्वर्गं गत इत्युक्तं — चतुर्विधाः प्रजा रामः स्वर्गं नीत्वा दिवं गतः, इति।

उत्तरकाण्डेऽपि—

गत्वा तु सरयूतोयं स्थावराणि चराणि च। प्राप्य तत्तोयविक्लेदं देवलोकमुपागमन् ॥
तथा स्वर्गगतं सर्वं कृत्वा लोकगुरुर्दिवम्। जगाम त्रिदशैस्सार्धं हृष्टो हृष्टैर्महामति,रिति।

एवं च प्रतिज्ञातार्थपरिपालनस्य उत्कृष्टधर्मत्वेन अवश्यकर्तव्यत्वात् बहुप्रजोपरोधस्य परिहर्तव्यत्वात् मन्वादिनिषेधवचनानां अन्यविषयत्वेनोपपन्नत्वात् 'रामे वालिवधाद्यद्वदिति भारतवचनस्य उक्तरीत्योपपन्नत्वाच्च रामकृतो वालिवधः अधर्माधायको न भवति,

किंतु धर्म एव। अत एव वालिना सकलधर्माभिज्ञेन "भवता अनभिज्ञोऽहं न प्रतिवक्तु-मर्हामि, प्रमादान्मया, 'अयुक्तं सोढव्यं, भवता यत्कृतं तद्धर्म्यमेवेत्यर्थकैः—

यत्त्वमात्थ नरश्रेष्ठ तदेवं नात्र संशयः। प्रतिवक्तुं प्रकृष्टो हि नापकृष्टस्तु शक्नुयात् ॥
यदयुक्तं मया पूर्वं प्रमादादुक्तमप्रियम्। तत्रापि खलु मे दोषं वक्तुं नार्हसि राघव ॥
ममाप्यपगतं धर्माद्व्यतिक्रान्तपुरस्कृतम्। धर्मसंहितया वाचा धर्मज्ञ परिपालय ॥

शराभितप्तेन विचेतसा मया प्रदूषितस्त्वं यदजानता प्रभो।
इदं महेन्द्रोपमभीमविक्रम प्रसादितस्त्वं क्षम मे महेश्वर ॥

इत्येवमादिभिः श्लोकैः धर्म्यत्वमेव ज्ञापितम्। अत्र च वालिनो वाक्यमखिलमपि स्वमरणानन्तरं भार्यापुत्रादीनां रक्षणमनेनैव भवितव्यमिति बुध्या प्रवृत्तत्वादौपचारिकं नतु धर्म्यत्वाभिप्रायकं। अत एव च तारांगदादीनां रक्षणप्रार्थनं कृतं--

वालश्चाकृतबुद्धिश्च एकपुत्रश्च मे प्रियः। तारेयो राम भवता रक्षणीयो महाबलः ॥
सुग्रीवे चांगदे चैव विधत्स्व मतिमुत्तमाम्। मद्दोषकृतदोषां तां यथा तारां तपस्विनीम् ॥
सुग्रीवो नावमन्येत तथावस्थातुमर्हसि, इति। अतो वालिनः धर्म्यत्वेन न सम्मतमिदमिति प्रसक्तामाशंकां निराकरोति भगवान्वाल्मीकिः—

एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम्।
न दोषं राघवे दध्यौ धर्मेऽधिगतनिश्चयः॥ इति।

अत्रच धर्मेऽधिगतनिश्चय इति विशेषणेन पूर्वोक्तमखिलमपि रामदूषणमज्ञानप्रवृत्तमेव। इतः परं वक्ष्यमाणमखिलं धर्म्यमेव वदतीत्यवगतम्। भार्यापुत्रादीनां संरक्षणप्रार्थनमपि चरमकाले धर्म्यमित्येव कृतम्।

अत एव **आदिपर्वणि** कुन्तीं प्रति माद्रीवचनं--

दारकेष्वप्रमत्ता च भवेथाश्च हिता मम। अतोन्यन्नहि पश्यामि संदेष्टव्यं हि किंचन ॥इति

महाप्रस्थानिकेऽपि--

कृपमभ्यर्च्य च गुरुं अथ पौरपुरस्कृतम्। शिष्यं परीक्षितं तस्मै ददौ भरतसत्तम, इति ॥

एकोनविंशविंशयोः-- ततः समाकर्ण्य भर्तृवधं व्यथितहृदया तारा झटिति विनिष्क्रम्यान्तःपुराद्राज्यसंरक्षणायांगदमभिषेचयेति वदतो वानरानपि किमङ्गदेन? किंवा

राज्येन? आत्मना वा किं अन्ततः? इति वदन्तीं हा मम प्रियेति पतिपादमूले निपपात। ततः कथंचिद्वानरैः समाश्वासिता तारा रणधरणीतलशयितं निजदयितं परिष्वज्य —

उत्तिष्ठ हरिशार्दूल भजस्व शयनोत्तमम्। नैवंविधाश्शेरते हि भूमौ नृपतिसत्तमाः॥

गतासुरपि भवान्यामिमां वसुन्धरां परिष्वज्य निषेवते सेयं वसुन्धरा मत्तः प्रियतरेति वितर्कयामि, महायूथपयूथपे त्वयि कालपरवशेऽपि हृदयं यन्मदीयं शतधा न विदीर्यते तदिदमयोमयं मन्ये,

सुग्रीवस्य त्वया भार्या हृता स च विवासितः।
यत्तु तस्य त्वया व्युष्टिः प्राप्तेयं प्लवगाधिप॥

अनेन परदाराभिमर्शनमायुःक्षयकरं, स्वजनविरोधश्च प्राणैश्वर्यनाशक इति सूचितम्। तथा च **मनुः** —

नहीदृशमनायुष्यं त्रिषु लोकेषु विद्यते। यादृशं पुरुषस्येह परदाराभिमर्शनम्॥ इति॥

प्राचीना अपि —

अनुचितकर्मारम्भस्स्वजनविरोधो बलीयसि स्पर्धा। प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि॥

वृद्धा यत्र न पूज्यन्ते वधूं यत्राप्यगौरवम्। तत्र गच्छ दरिद्र त्वं यत्र वैरं सहोदरे, इति॥

तदिदं दुष्टदिष्टसञ्चेष्टितं यन्मदीयं हितकरमपि वचनं अनादृत्य सुग्रीववशंगतो भवति भवान्। सदा सुखसंवर्धितां मामवलोक्य कुमारमङ्गदं च समागतमाश्वासयेति बहुविधं विललाप॥

एकविंशे — ततो हनुमान् पतिनिधनजनितक्लेशजलनिधिनिमग्नां विलपन्तीं तारामित्थमाश्वासयामास —

गुणदोषकृतं जन्तुः स्वकर्मफलहेतुकम्।
अव्यग्रस्तदवाप्नोति सर्वं प्रेत्य शुभाशुभम्॥

अत्र च स्वकर्मफलहेतुकमिति विशेषणेन अनादिभवपरम्परासादितधर्माधर्मवासनावशेन शुभमशुभं वा कर्मानुष्ठाय तदनुरूपं सुखं दुःखं वा फलमवाप्नोतीत्युक्तम्। **तथाचापस्तंबः** —

सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्। ततः परिवृत्तौ कर्मफलशेषेण

जातिं रूपं, वर्णं, बलं, मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते। तद्वत्- वदुभयोर्लोकयोस्सुख एव वर्तते। यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फल- परिवृद्धिः एवम्। एतेन दोषफलपरिवृद्धिरुक्तेति **मोक्षधर्मे**ऽपि—

आत्मनानर्थयुक्तेन पापे निविशते मनः। स कर्म कलुषं कृत्वा क्लेशे महति धीयते॥
दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं भयाद्भयम्। मृतेभ्यः प्रमृता यान्ति दरिद्राः पापकर्मिणः॥
उत्सवादुत्सवं यान्ति स्वर्गात्स्वर्गं सुखात्सुखम्।
श्रद्धधानाश्च दान्ताश्च धनस्थाः शुभकारिणः॥ इति।

शोच्या शोचसि कं शोच्यं दीनं दीनानुकम्पसे।
कश्च कस्यानुशोच्योस्ति देहेस्मिन्बुद्बुदोपमे॥

अनेन बुद्बुदवदत्यन्तास्थिरदेहपातप्रयुक्तशोको न कर्तव्य इति सूचितम्। तथा च **स्त्रीपर्वणि** विदुरः—

वैचित्रवीर्य साध्यं हि दुःखं वा यदि वा सुखम्। प्राप्नुवन्तीह भूतानि स्वकृतेनैव कर्मणा॥
कर्मणा प्राप्यते स्वर्गः सुखं दुःखं च भारत। ततो वहति तं भारमवशः स्ववशोऽपि वा॥
यथा च मृन्मयं भाण्डं चक्रारूढं विपद्यते। किञ्चित्प्रक्रियमाणं वा कृतमात्रमथापि वा॥
छिन्नं वाप्यवरोप्यन्तं अवतीर्णमथापिवा। आर्द्रं वाप्यथवा शुष्कं पच्यमानमथापि वा॥
अवतीर्यमाणमापाकादुद्धृतं चापि भारत। अथवा परिभुज्यन्तमेवं देहाश्शरीरिणाम्॥
गर्भस्थो वा प्रवृत्तो वाप्यथवा दिवसान्तरः। अर्धमासगतो वापि मासमात्रगतोऽपि वा॥
संवत्सरगतो वापि द्विसंवत्सर एव वा। यौवनस्थोऽथ मध्यस्थो वृद्धो वापि विपद्यते॥
प्राक्कर्मभिस्तु भूतानि भवन्ति न भवन्ति च। एवं सांसिद्धिके लोके किमर्थमनुतप्यसे॥
यथा तु सलिले राजन् क्रीडार्थमनुसंसरत्। उन्मज्जत्वनिमज्जत्वे किंचित्सत्वं नराधिप॥
एवं संसारगहने उन्मज्जननिमज्जने। कर्मभागेन बाध्यन्ते क्लिश्यन्ते स्वल्पबुद्धयः॥
ये तु प्राज्ञाः स्थितास्सत्ये संसारान्तगवेषिणः।
समागमं सभूतानां ते यान्ति परमां गतिम्, इति॥

जानास्यनियतामेवं भूतानामागतिं गतिम्।
तस्माच्छुभं हि कर्तव्यं पण्डितेनेह लौकिकम्॥

संस्कार्यो हरिराजश्च अंगदश्चाभिषिच्यताम् ।
सिंहासनगतं पुत्रं पश्यन्ती शान्तिमेष्यसि ॥

इति परिसान्त्विता तारा एवमवोचत्—

अंगदप्रतिरूपाणां पुत्राणामेकतः शतम् ।
हतस्याप्यस्य वीरस्य गात्रसंश्लेषणं वरम् ॥

अनेन पुत्रं परित्यज्यापि भर्तृसहगमनं श्रेय इति सूचितम् । तथाचादिपर्वणि— अन्वेष्यामीह भर्तारमहं प्रेतवशं गतम् । उत्तिष्ठ त्वं विसृज्यैनमिमान्पालय दारकान् ॥ इति ।

नचाहं हरिराज्यस्य प्रभवाम्यंगदस्य वा ।
पितृव्यस्तस्य सुग्रीवः सर्वकार्येष्वनन्तरः ॥

पिता हि बन्धुः पुत्रस्य न माता हरिसत्तमः ।

अहं तु हरिराजसंश्रयाद्धितमन्यं न पश्यामीति । अनेन भर्तृपुत्रादिशासने स्त्रीणां स्वातन्त्र्यं नास्तीत्युक्तम् । एतच्च प्रागेव प्रपञ्चितम् ॥

द्वाविंशे—ततो रामेण निषूदितो वाली सम्प्राप्तविजयं सुग्रीवमवलोक्य मन्दमुच्छ्वसन्नित्थमाह—

मम प्राणैः प्रियतरं पुत्रं पुत्रमिवौरसम् ।
मया हीनं विहीनार्थं सर्वतः परिपालय ॥

त्वमप्यस्य हि दाता च परित्राता च सर्वशः ।
भयेष्वभयदश्चैव यथाहं प्लवगेश्वर ॥

अनेन पितुरनन्तरं पितृव्य एव पितृस्थानीयः । तेन च स्वपुत्रवद्भ्रातृपुत्राः संरक्षणीयाः । तैरपि पितृव्ये पितृवद्वृत्तिः कर्तव्येति सूचितम् । अत एव पूर्वतनं तारावाक्यम्—

नचाहं हरिराज्यस्य प्रभवाम्यङ्गदस्य वा । पितृव्यस्तस्य सुग्रीवस्सर्वकार्येष्वनन्तरः ॥
पिता हि बन्धुः सर्वस्य न माता हरिसत्तम, इति ॥

भारतेऽपि—

यथैव पाण्डोस्ते वीराः कुन्तीपुत्रा महारथाः । तथैव धर्मतस्सर्वे मम पुत्रा न संशयः ॥
यथैव मम पुत्राणामिदं राज्यमसंशयम् । तथैव पाण्डुपुत्राणामिदं राज्यमसंशयम् इति ॥

वनपर्वण्यपि धृतराष्ट्रः —

असंशयं तेऽपि ममैव पुत्रा दुर्योधनो मम देहात्प्रसूत इति ।

उद्योगेऽपि —

पितृवत्त्वयि वर्तन्ते तेषु वर्तस्व पुत्रवत् । आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ॥ इति ।

त्वत्तुल्यपराक्रमोऽयं तारेयः तव रक्षोभिः समितौ पुरतः प्रभविष्यन्नितरासुकराणि कर्माणि विक्रम्य करिष्यति । इयमपि सुषेणदुहिता विविधौत्पातिके सूक्ष्मार्थविनिर्णये च अतीव निपुणा समयोचितं यद्ब्रूते निर्विचिकित्सं तन्निर्वाह्यम् ।

राघवस्य च ते कार्यं कर्तव्यमविशंकया ।
स्यादधर्मो ह्यकरणे त्वां च हिंस्याद्विमानितः ॥

अनेन — प्रत्युपकारः कर्तव्य इति सूचितम् ।

तथा च **कालिदासः** —

सम्मोचितस्सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद्भवतो न कुर्यां व्यर्था हि मे स्यात्स्वपदोपलब्धिः ॥ इति ॥

इत्यभिधाय उदारश्रियं मालामेनां गृहाणेति संचोदितस्सुग्रीवः गतहर्षस्तां मालां प्रतिजग्राह । ततो वाली स्वमरणं निश्चित्य पुत्राय चरमसन्देशमित्थमाचचक्षे —

संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ।
देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये ॥

सुखदुःखसहः काले सुग्रीववशगो भव ।
न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते ॥

उभयं हि महादोषः तस्मादन्तरदृग्भव ।

अनेन राजपुत्राणां पितरि वर्तितव्या धर्मा उक्ताः । तथा च **नीतिसारे** —

पितृसेवारतस्तिष्ठेत्कायवाङ्मनसैः सदा । तत्कर्म कुर्यान्नियतं येन तुष्टो भवेत्पिता ॥
तन्न कुर्याद्येन पिता मनागपि न तुष्यति । यस्मिन् पितुर्भवेत्प्रीतिः स्वयं तस्मिन्प्रियं चरेत् ॥
यस्मिन्द्वेषं पिता कुर्यात्स्वस्यापि द्वेष्य एव सः । असम्मतं विरुद्धं च पितुर्नैव समाचरेत् ॥
प्राप्यापि युवराजत्वं प्राप्नुयाद्विकृतिं न च । स्वसम्पत्तिमदान्नैव मातरं पितरं तथा ॥

भ्रातरं भगिनीं चापि अन्यान्वा राजवल्लभान्। महाजनांस्तथा राष्ट्रे नावमन्येन्न पीडयेत्॥
प्राप्यापि महतीं वृद्धिं वर्तेत पितुराज्ञया। पुत्रस्य पितुराज्ञा हि परमं भूषणं स्मृतम्॥
सोदरेषु च सर्वेषु नाधिक्यं संप्रदर्शयेत्। भ्रातॄणामवमानेन बहवो हि विनाशिताः॥
पितुराज्ञोल्लंघनेन प्राप्यापि मदमुत्तमम्। तस्माद्भ्रष्टा भवंतीह दासवद्राजपुत्रकाः॥
एवग्रहाविरोधेन राजपुत्रो वसन्गृहे। त्यागी च सत्वसम्पन्नः सर्वान्कुर्यात्स्वके वशे॥
शनैः शनैः प्रवर्धेत शुक्लपक्षमृगांकवत्। एवंवृत्तो राजपुत्रो राज्यं प्राप्याप्यकण्टकम्॥

सहायवान्महामात्यश्चिरं भुङ्क्ते वसुन्धराम्।

इत्यनुशास्य विवृत्तनयनदशनो वाली दिष्टां गतिमवाप।

ततो गतासुं तमवलोक्य नीलतारप्रमुखाः शाखामृगास्तारामुखा वानर्यश्च 'त्वत्सनाथा वयमनाथाः। अद्य सेयं राजधानी निरुत्सवा संजाता' इति बहुविधं परिदेवयमानाः प्रकाममायस्ता बभूवुः॥

त्रयोविंशचतुर्विंशयोः—ततः सुषेणदुहिता तारा नीलेन समुद्धृतशल्यं भर्तारमालिङ्ग्य सकरुणं विललाप, मामिहानाथां कथं विहाय गतोऽसि।

"शूराय न प्रदातव्या कन्या खलु विपश्चिता।
शूरभार्यां हतां पश्य सद्यो मां विधवां कृताम्॥

अनेन शूराय कन्या न दातव्येत्युक्तम्। तथा च कात्यायनः—

दूरस्थानामविद्यानां मोक्षमार्गानुसारिणाम्।
शूराणां निर्धनानां च न देया कन्यका बुधैः॥ इति॥

पतिहीना तु या नारी कामं भवतु पुत्रिणी।
धनधान्यैः सुपूर्णापि विधवेत्युच्यते जनैः॥

क्व गच्छामि, किं करिष्यामीति विलपन्तीं तारां रामशरनिकृत्तदेहं वालिनं चावलोक्य व्यथितहृदयस्सुग्रीवो राममित्याचचक्षे-महानुभावेन भवता प्रतिज्ञेयं निर्वर्तिता, तदधुना मत्प्राणरक्षकं महानुभावं भ्रातरं निहत्य राज्यमहं कथं भोक्ष्ये॥

न त्वां जिघांसामि चरेति यन्मामयं महात्मा मतिमानुवाच।
तस्यैव तद्राम वचोनुरूपं इदं पुनः कर्म च मेऽननुरूपम्॥

द्रुमशाखावभग्नोऽहं मुहूर्तं परिनिश्वसन् ।
सान्त्वयित्वा त्वनेनोक्तो न पुनः कर्तुमर्हसि ॥

भ्रातृत्वमार्यभावश्च धर्मश्चानेन रक्षितः ।
मया कोपश्च कामश्च कपित्वं च प्रदर्शितम् ॥

अचिन्तनीयं परिवर्जनीयं अनीप्सनीयं त्वनपेक्षणीयम् ।
प्राप्तास्मि पाप्मानमिमं वयस्य भ्रातुर्वधात्त्वाष्ट्रवधादिवेन्द्रः ॥

अधर्मयुक्तं कुलनाशयुक्तं एवंविधं राघव कर्म कृत्वा ।
पापस्य कर्तास्मि विगर्हितस्य क्षुद्रस्य लोकावमतस्य चैव ॥

अनेन भ्रातृवधः पापाधायक इत्युक्तम् — तथा च **कर्णपर्वण्यर्जुनं** प्रति भगवान् —

स भवान्धर्मभीरुत्वाद् ध्रुवं यायान्महत्तमः ।
नरकं घोररूपं च ध्रुवं ज्येष्ठस्य ते वधात्, इति ॥

त्वाष्ट्रवधसंभूतमहेन्द्रपापपरिग्रहीतारो महीस्त्रीजलवृक्षा इव को नाम कपेर्मम पाप्मानं भजेत । पापदूषितो वा कथमहं महत्सु सम्माननमर्हामि । कथं वा भ्रातुर्महात्मनो वालिनो वियोगमङ्गदस्य परिदेवनं च सोढ्वा जीवामि —

सुतस्सुलभ्यस्सुजनस्सुवश्यः कुतस्तु पुत्रस्सदृशोऽङ्गदेन ।
स चापि विद्येत न वीर देशो यस्मिन्भवेत्सोदरसन्निकर्षः ॥

अनेन सुगुणः पुत्रो दुर्लभः सोदरसन्निकर्षोऽप्यलभ्यः इत्युक्तम् । तथा च रुक्मिणीं प्रति कृष्णः —

नापुत्री विन्दते लोकान् कुपुत्राद्वन्ध्यता वरा । कुपुत्रो नरको यस्मात्सुपुत्रः स्वर्ग एव हि ॥

तस्माद्विहीनं यत्पुत्रं श्रुतवन्तं दयापरम् ।
विद्या च विनयो यस्मात्तस्मात्पुत्रं सुधार्मिकम् ।
इच्छेत्पुत्रं पुत्रकामः पुरुषो यत्नवान् भवेत् ॥ इति ॥

एष्टव्या बहवः पुत्राः शीलवन्तो गुणान्विताः ॥ इति ॥

सोदरसन्निकर्षविषये **युद्धकाण्डे** —

देशे देशे कलत्राणि देशे देशे च बान्धवाः। तं तु देशं न पश्यामि यत्र भ्राता सहोदरः॥ इति रामवाक्यस्य व्याख्यानावसरे प्रपञ्चयिष्ये। तदधुना प्रवेक्ष्यामि दीप्तमग्निं जलं वा। सीतागवेषणमपि भवदाज्ञाकिंकरा हनुमत्प्रमुखास्साधयिष्यन्ति। तद्भवदाज्ञा-माकांक्षमाणं मामनुजानीहीति। ततस्तदवस्थमित्रदर्शनेन संजातबाष्पलोचनं कपि-प्रधानैस्समाश्वासिता तारैवमाह — सीताविश्लेषदुःखगौरवं जानता भवता येन शरेण दिव्यां गतिं प्रापितो मत्प्रियस्तेनैव शरेणाहमपि तत्समीपं प्रापणीया। भर्त्रात्मभूताया मम वधात् स्त्रीवधदोषस्तव न भविष्यति, यतः —

शास्त्रप्रयोगाद्विविधाच्च वेदादात्मा ह्यनन्यः पुरुषस्य दाराः।

अनेन स्त्रियः पुरुषस्यात्मभूता इत्युक्तम्। तथा च **श्रुतिः** — अर्धो वा एष आत्मनो यत्पत्नीति। **आदिपर्वण्यपि** —

अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमस्सखा इति।

पञ्चविंशे — ततो रामस्त्वादृशीनां वीरभार्याणां नियतिनियमितसुखदुःखप्राप्तौ अतिहर्षो विषादो वा नोचितः।

न कालादुत्तरं किञ्चित्कर्म शक्यमुपासितुम्।
नियतिः कारणं लोके नियतिः कर्मसाधनम्॥

नियतिस्सर्वभूतानां नियोगेष्विह कारणम्।
न कर्ता कस्यचित्कश्चिन्नियोगे चापि गोचरः॥

स्वभावे वर्तते लोकः तस्य कालः परायणम्।
न कालः कालमत्येति न कालः परिहीयते॥

स्वभावं च समासाद्य न कश्चिदतिवर्तते।
न कालस्यास्ति बन्धुत्वं न हेतुर्न पराक्रमः॥

न मित्रज्ञातिसंबन्धः कारणं नात्मनो वशम्।
किन्तु कालपरीणामो द्रष्टव्यस्साधु पश्यता॥

धर्मश्चार्थश्च कामश्च कालक्रमसमाहिताः।
इतः स्वां प्रकृतिं वाली गतः प्राप्तः क्रियाफलम्॥

धर्मार्थकामसंयोगैः पवित्रं प्लवगेश्वरः ।
स्वधर्मस्य च संयोगाज्जितस्तेन महात्मना ॥

स्वर्गः परिगृहीतश्च प्राणानपरिरक्षता ।
एषा वै नियतिः श्रेष्ठा यां गतो हरियूथपः ॥

तदलं परितापेन प्राप्तकालमपास्यताम् ॥

अत्र नियतिशब्दापरपर्यायं जन्मान्तरकृतं कर्म कालमपेक्ष्य फलति, कालोऽपि पूर्वकृतकर्मसापेक्ष एव, न स्वतन्त्रः। एवं कालकर्मपराधीनः पुरुषोऽपि न कर्मणि स्वतन्त्रः। अतः स्वभावपरम्परासादितकर्मपरिपाककालानुरोधेन युद्धे मृतो वाली स्वकर्मवशेन जितस्वर्गो न शोच्य इत्युक्त्या परप्रयुक्तमपि दुःखं स्वकृतपूर्वकर्मवशादेव प्राप्तमिति मत्वा परस्मिन् दोषबुद्धिश्शोको वा न कर्तव्य इति सूचितम् ॥

तथा चानुशासनिके :—

सोऽहं तव ह्यन्तकरः सुहृद्वधकरस्तथा । न शान्तिमधिगच्छामि पश्यंस्त्वां दुःखितं क्षितौ ॥

इति परितप्यमानं धर्मपुत्रं प्रति भीष्मः —

परतन्त्रं कथं हेतुमात्मानमनुपश्यसि । कर्मणां हि महाभाग सूक्ष्मं ह्येतदतीन्द्रियम् ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् । संवादं मृत्युगौतम्योः काललुब्धकपन्नगैः ॥
गौतमी नाम कौन्तेय स्थविरा शमसंयुता । सर्पेण दष्टं स्वं पुत्रमपश्यद्गतचेतनम् ॥
अथ तं स्नायुपाशेन बद्ध्वा सर्पममर्षितः । लुब्धकोऽर्जुनको नाम गौतम्यास्समुपानयत् ॥
स चाब्रवीदयं तेऽत्र पुत्रहा पन्नगाधमः । ब्रूहि क्षिप्रं महाभागे वध्यतां केन हेतुना ॥
अग्नौ प्रक्षिप्यतामेष छिद्यतां खण्डशोऽपि वा । न ह्ययं बालहा पापः चिरं जीवितुमर्हति ॥

गौतम्युवाच :—

विसृजैनमबुद्धिस्त्वं अवध्योऽर्जुनक त्वया । को ह्यात्मानं गुरुं कुर्यात्प्राप्तव्यमविचिन्तयन् ॥
प्लवन्ते धर्मलघवो लोकेऽम्भसि यथा प्लवाः । मज्जन्ति पापगुरवः शस्त्रं स्कन्नमिवोदके ॥

हत्वा चैनं नामृतस्स्यादयं मे जीवत्यस्मिन् कोऽत्ययः स्यादयं ते ।
अस्योत्सर्गे प्राणयुक्तस्य जन्तोर्मृत्योर्लोकं को नु गच्छेदनन्तम् ॥

लुब्धकः — जानाम्यहं देवि गुणागुणज्ञे सर्वार्तियुक्ता गुरवो भवन्ति ।
स्वस्थस्यैते तूपदेशा भवन्ति तस्मात्क्षुद्रं सर्पमेनं हनिष्ये ॥

शमार्थिनः कालगतिं वदन्ति सत्यच्युतं त्वर्थविदस्त्यजन्ति।
श्रेयःक्षयं शोचति नित्यमोहात्तस्माच्छिशुं मुञ्च हते भुजङ्गे॥

गौतमी :— आर्तिर्नैवं विद्यतेऽस्मद्विधानां धर्मात्मानस्सर्वदा सज्जना हि।
नित्ययस्तो बालकोऽप्यस्य तस्मादीशो नाहं पन्नगस्य प्रमाथे॥

न ब्राह्मणानां कोपोस्ति कुतः कोपाच्च यातना। मार्दवात्क्षम्यतां साधो मुच्यतामेष पन्नगः॥

लुब्धकः —

हत्वा लाभः श्रेय एवाव्ययः स्याल्लभ्यो लाभः स्याद्बलिभ्यः प्रशस्तः।
कालाल्लाभो यस्तु सत्यो भवेत श्रेयोलाभः कुत्सितेऽस्मिन्हते स्यात्॥

गौतमी —

कानु प्राप्तिः गृह्य शत्रुं निहत्य का कामाप्तिः प्राप्य शत्रुं न मुक्त्वा।
तस्मात्सौम्याहं न क्षमे नो भुजङ्गे मोक्षार्थं वा कस्य हेतोर्न कुर्याम्॥

लुब्धकः —

अस्मादेकाद्बहवो रक्षितव्या नैको बहुभ्यो गौतमि रक्षितव्यः।
कृतागसं धर्मविदस्त्यजन्ति सरीसृपं पापमिमं जहि त्वम्॥

गौतम्युवाच —

नास्मिन् हते पन्नगे पुत्रको मे संप्राप्स्यते लुब्धक जीवितं वै।
गुणं चान्यन्नास्य वधे प्रपश्ये तस्मात्सर्पं लुब्धक मुञ्च जीवम्॥

लुब्धकः —

वृत्रं हत्वा देवराट् श्रैष्ठ्यभाग्वै यज्ञं हत्वा भागमवाप चैव।
शूली देवो देववृत्तं चर त्वं क्षिप्रं सर्पं जहि माभूत्ते विशङ्का॥

भीष्मः —

असकृत्प्रोच्यमानापि गौतमी भुजगं प्रति। लुब्धकेन महाभागा पापे नैवाकरोन्मतिम्॥
ईषदुत्स्मयमानस्तु कृच्छ्रात्संस्तभ्य पन्नगः। उत्ससर्ज गिरं मन्दां मानुषीं पाशपीडितः॥

सर्पः —

कोन्वर्जुनक दोषोऽत्र विद्यते मम बालिश। अस्वतन्त्रं हि मां मृत्युरवशं यदचूचुदत्॥

तस्यायं वचनाद्दष्टो न कोपेन न काम्यया ।
तस्य तत्किल्बिषं लुब्ध विद्यते यद्यकिल्बिषम् ॥

लुब्धकः —

यदन्यवशगेनेदं कृतं ते पन्नगाशुभम् । कारणं वै त्वमप्यत्र तस्मात्त्वमपि किल्बिषी ॥
मृत्पात्रस्य क्रियायां हि दण्डचक्रादयो यथा । कारणत्वे प्रकल्पन्ते तथा त्वमपि पन्नग ॥

किल्बिषी चापि मे वध्यः किल्बिषी चापि पन्नग ।
आत्मानं कारणं ह्यत्र त्वमाख्यासि भुजङ्गम ॥

सर्पः —

सर्व एते ह्यस्ववशा दण्डचक्रादयो यथा । तथाहमपि तस्मान्मे नैष दोषो मतस्तव ॥
अथवा मतमेतत्ते तेऽप्यन्योन्यप्रयोजकाः । कार्यकारणसन्देहो भवत्यन्योन्यचोदनात् ॥

एवं सति न दोषो मे नास्मि वध्यो न किल्बिषी ।
किल्बिषं समवाये स्यान्मन्यसे यदि किल्बिषम् ॥

लुब्धकः —

कारणं यदि न स्याद्वै न कर्तासि त्वमप्युत । विनाशकारणं त्वं च तस्माद्वध्योसि मे मतः ॥
असत्यपि कृते कार्ये नेह पन्नग लिप्यते । तस्मान्नात्रैव हेतुः स्याद्वध्यः किं बहुमन्यसे ॥

सर्पः — कार्याभावे क्रिया न स्यात्सत्यसत्यपि कारणे ।
तस्मात्समेस्मिन् हेतौ मे वाच्यो हेतुर्विशेषतः ॥

यद्यहं कारणत्वेन मतो लुब्धक तत्वतः । अन्यः प्रयोगो स्यादत्र किल्बिषी जन्तुनाशने ॥

लुब्धकः —

वध्यस्त्वं मम दुर्बुद्धे बालघाती नृशंसकृत् । भाषसे किं बहु पुनः वध्यस्सन्पन्नगाधम ॥

सर्पः — यथा हवींषि जुह्वाना मुखे वै लुब्धकर्त्विजः ।
न फलं प्राप्नुवन्त्यत्र फलयोगे तथाह्यहम् ॥

भीष्मः —

तथा ब्रुवति तस्मिंस्तु पन्नगे मृत्युचोदिते । आजगाम तथा मृत्युः पन्नगं चाब्रवीदिदम् ॥

मृत्युः —

प्रचोदितोऽहं कालेन पन्नग त्वामचूचुदम् । तद्वज्जलदवत्सर्प कालस्याहं वशानुगः ॥
सात्त्विका राजसाश्चैव तामसा ये च केचन । भावाः कालात्मकास्सर्वे प्रवर्तन्तेह जन्तुषु ॥
जंगमाः स्थावराश्चैव दिवि वा यदि वा भुवि । आदित्यश्चन्द्रमा विष्णुरापो वायुर्दिशस्तथा ॥
सर्वे कालात्मकास्सर्प कालात्मकमिदं जगत् । प्रवृत्तयश्च लोकेस्मिंस्तथैव च निवृत्तयः ॥
तासां विकृतयो याश्च सर्वं कालात्मकं स्मृतम् । आदित्यश्चन्द्रमा विष्णुरापो वायुश्शतक्रतुः ॥
अग्निः खं पृथिवी मित्रः पर्जन्यो वसवो दितिः । सरितस्सागराश्चैव भावाभावौ च पन्नग ॥
सर्वे कालेन सृज्यन्ते ह्रियन्ते च पुनः पुनः । एवं ज्ञात्वा कथं मां त्वं सदोषं सर्प मन्यसे ॥

अथ चैवंगते दोषे मयि त्वमपि दोषवान् ।

सर्पः– निर्दोषं दोषवन्तं वा न त्वा मृत्यो ब्रवीम्यहम् ॥

त्वयाहं चोदित इति ब्रवीम्येतावदेव तु । यदि कालेऽपि दोषोस्ति यदि तत्रापि नेष्यते ॥

दोषो नैव परीक्ष्यो मे नह्यत्राधिकृता वयम् ।
निर्मोक्षस्तस्य दोषस्य मया कार्यो यथा तथा ॥

मृत्योरपि न दोषः स्यादिति मेत्र प्रयोजनम् ।

भीष्मः —

सर्पोथार्जुनकं प्राह श्रुतं ते मृत्युभाषितम् । नानागसं मां पाशेन सन्तापयितुमर्हसि ॥

लुब्धकः —

मृत्योः श्रुतं मे वचनं तव चैव भुजङ्गम । नैव तावददोषत्वं भवति त्वयि पन्नग ॥
मृत्युस्त्वं चैव हेतुर्हि बालस्यास्य विनाशने । उभयं कारणं मन्ये न कारणमकारणम् ॥
धिङ्मृत्युं च दुरात्मानं क्रूरं दुःखतरं सताम् । त्वां चैवाहं वधिष्यामि पापं पापस्य कारणम् ॥

मृत्युः —

विवशौ कालवशगावावां निर्दिष्टकारणौ । नावां दोषेण गन्तव्यौ यदि सम्यक्प्रपश्यसि ॥

लुब्धकः —

युवामुभौ कालवशौ यदि मे मृत्युपन्नगौ । हर्षक्रोधौ यथा स्यातां एतदिच्छामि वेदितुम् ॥

षड्विंशे — ततो मन्त्रिश्रेष्ठेन हनुमता भवत्प्रसादलब्धराज्यश्रीः **सुग्रीवो** भवन्तमर्चितुमिच्छति, तन्मनोरथपरिपूरणाय वानरराजधानीं प्रविशतु भवानिति प्रार्थितो रामः पितुर्वचनपरिपालनाय चतुर्दश समा वने वत्स्यामीति कृतप्रतिज्ञस्य मम ग्रामनगरप्रवेशोनुचितः, प्लवगेश्वरोऽयं झटिति सचिवैर्भवद्भिरभिषिच्यतामिति हनूमन्तमभिधाय सुग्रीवमेवमुवाच —

इममप्यङ्गदं वीर यौवराज्येऽभिषेचय ।
ज्येष्ठस्य हि सुतो ज्येष्ठस्सदृशो विक्रमेण ते ॥

अनेन ज्येष्ठो गुणवान् ज्येष्ठभ्रातृपुत्रोपि यौवराज्येऽभिषेचनीय इत्युक्तम् । अत **एवादिपर्वणिः** —

ततस्संवत्सरस्यान्ते यौवराज्याय पार्थिव । स्थापितो धृतराष्ट्रेण पाण्डुपुत्रो युधिष्ठिरः ॥

धृतिस्थैर्यसहिष्णुत्वादानृशंस्यात्तथार्जवात् ।
भृत्यानामनुकम्पार्थं तथैव स्थिरसौहृदात् ॥ इति ।

पूर्वोऽयं वार्षिको मासः श्रावणः सलिलागमः ।
प्रवृत्ताः सौम्य चत्वारो मासा वार्षिकसंज्ञिकाः ॥

नायमुद्योगसमयः प्रविश त्वं पुरीं शुभाम् ।
अस्मिन्वत्स्याम्यहं सौम्य पर्वते सहलक्ष्मणः ॥

कार्तिके समनुप्राप्ते त्वं रावणवधे यत ।

अनेन वर्षाकाले जलकर्दमादिदोषाद्राजभिर्यात्रा न कर्तव्या, शरदि यात्रोद्योगः कर्तव्य इत्युक्तम् । अत एवाग्रे अष्टाविंशे **रामवाक्यं** —

स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशान् ।

वृत्ता यात्रा नरेन्द्राणां सेना प्रतिनिवर्तते । वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥ इति ।

एकोनत्रिंशेऽपि —

सूर्यातपक्रामणनष्टपङ्का भूमिस्समुत्पादितसान्द्ररेणुः ।
अन्योन्यवैरेण समावृतानामुद्योगकालोद्य नराधिपानाम् ॥

अन्योन्यं बद्धवैराणां जिगीषूणां नृपात्मज ।
उद्योगसमयस्सौम्य पार्थिवानामुपस्थितः ॥ इति ॥

रघुवंशेऽपि —

सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै प्रेरयामास तं शक्तेः प्रथमं शरत् ॥ इति ।

तदधुना झटिति प्रविश स्वमालयं, भवदुदयमाकांक्षतः सुहृज्जनानपि संहर्षयेति श्रीरामवचनेन स्वपुरीं प्रविष्टः सुग्रीवः प्रमुदितानि वानरसहस्राणि सप्रहर्षं विलोकयन् विविधविनोदास्पदं स्वभ्रातृभवनं प्रविवेश । ततस्तत्सुहृदो हनुमत्प्रमुखाः सचिवाः संभृत्य सकलसंभारान् नदीनदसागरजलानि समाहृत्य शातकुंभमयैः कुम्भैः—

शास्त्रदृष्टेन विधिना महर्षिविहितेन च ।
अभ्यषिंचन्त सुग्रीवं प्रसन्नेन सुगन्धिना ॥

रामस्य तु वचः कुर्वन् सुग्रीवो हरिपुङ्गवः ।
अंगदं सम्परिष्वज्य यौवराज्येऽभ्यषेचयत् ॥

अंगदे चाभिषिक्ते तु सानुक्रोशाः प्लवंगमाः ।
साधुसाध्विति सुग्रीवं महात्मानोऽभ्यपूजयन् ॥

रामं चैव महात्मानं लक्ष्मणं च पुनः पुनः ।
प्रीताश्च तुष्टुवुस्सर्वे तादृशे तत्र वर्तिनि ॥

अनेन उचितं समीचीनं कर्म यः करोति तस्य सकलजनश्लाघ्यता भवतीति सूचितम् ॥

तथा च **भीष्मपर्वणि** युद्धसमये गुरुजननमस्कारपूर्वकं युद्धायाभ्यनुज्ञाग्रहणानन्तरं सैनिकाः —

गौरवं पाण्डुपुत्राणां मान्यान्मानयतश्च तान् । दृष्ट्वा महीक्षितस्तत्र पूजयांचक्रिरे भृशम् ॥
सौहृदं च कृपां चैव प्राप्तकालं महात्मनाम् । दयां च ज्ञातिषु परां कथयाञ्चक्रिरे नृपाः ॥
साधु साध्विति सर्वत्र निश्चेरुः स्तुतिसंहताः । वाचः पुण्याः कीर्तिमतां मनोहृदयहर्षणाः ॥

म्लेच्छाश्चार्याश्च ये तत्र ददृशुश्शुश्रुवुस्तदा ।
वृत्तं तत्पाण्डुपुत्राणां रुरुदुस्ते सगद्गदाः ॥ इति ।

निवेद्य रामाय तदा महात्मने महाभिषेकं कपिवाहिनीपतिः ।
रुमां च भार्यां प्रतिलभ्य वीर्यवान् अवाप राज्यं त्रिदशाधिपो यथा ॥

सप्तविंशे — ततस्सलक्ष्मणो रामभद्रः गुहां प्रविष्टं सुग्रीवमवलोक्य नानाविध-वृक्षलतागुल्मसंकुलं सिंहशार्दूलवृकादिसत्वैरतिभयंकरं प्रस्रवणं गिरिमभ्येत्य तस्य गिरेर्महतीं गुहामवलोकयन् लक्ष्मणमिदमाह —

इयं गिरिगुहा रम्या विशाला युक्तमारुता।
अस्यां वत्स्यामि सौमित्रे वर्षरात्रमरिन्दम॥

अस्याश्च गुहायास्समीपे पङ्कजसमलंकृता नलिनी —

अहो सुरमणीयोऽयं देशः शत्रुनिषूदन।
इदं रंस्याव सौमित्रे साध्वत्र निवसावहै॥

इत्युक्त्वा न्यवसत्तत्र राघवः सहलक्ष्मणः।

ततश्चातिमनोहरेऽपि प्रस्रवणशिखरे भार्याहरणजनितेन खेदेन कलानिधिदर्शनेन निशास्वपगतनिद्रं शोचन्तं रामभद्रः —

अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि।
शोचतो व्यवसीदन्ति सर्वार्था विदितं हि ते॥

शरत्कालं प्रतीक्षस्व प्रावृट्कालोऽयमागतः।
ततस्सराष्ट्रं सगणं त्वं वधिष्यसि रावणम्॥

इत्यादिवचनैर्लक्ष्मणः पर्यसान्त्वयत् —

अष्टाविंशे —

स तथा वालिनं हत्वा सुग्रीवमभिषिच्य च।
वसन्माल्यवतः पृष्ठे रामो लक्ष्मणमब्रवीत्॥

अयं स कालस्संप्राप्तः समयोद्य जलागमः।
संपश्य त्वं नभो मेघैस्संवृतं गिरिसन्निभैः॥

शक्यमम्बरमारुह्य मेघसोपानपङ्क्तिभिः।
कुटजार्जुनमालाभिरलंकर्तुं दिवाकरम्॥

सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वधिकपाण्डरैः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवांबरम्॥

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य ॥

विद्युत्पताकास्सबलाकमालाः शैलेन्द्रकूटाकृतिसन्निकाशाः ।
गर्जन्ति मेघाः समुदीर्णनादा मत्ता मृगेन्द्रा इव संयुगस्थाः ॥

नीलेषु नीला नववारिपूर्णा मेघेषु मेघाः प्रविभान्ति सक्ताः ।
दावाग्निदग्धेषु दवाग्निदग्धाः शैलेषु शैला इव बद्धमालाः ॥

मेघास्समुद्भूतसमुद्रनादा महाजलौघैर्गगनावलंबाः ।
घनोपगूढं गगनं सतारं न भास्करो दर्शनमभ्युपैति ॥

इत्यादिश्लोकैर्मेघानां सोपानाकारत्व सन्ध्यारक्तत्व पर्यन्तपाण्डरत्व सविद्युत्व गर्जनवत्वादीनि सद्योवृष्टिचिह्नान्युक्तानि । तथाच ज्योतिःशास्त्रे **तोडरानन्देः**—

पर्यन्तेषु सुधाशशाङ्कधवला मध्येञ्जनालित्विषः
स्निग्धानेकपुटाः क्षरज्जलकणास्सोपानविच्छेदिनः ।
माहेन्द्रीप्रभवाः प्रयान्ति परतः प्राग्वांबुपाशोद्भवा
एते वारिमुचः सृजन्ति नचिरादंभः प्रभूतं भुवि ॥

मयूरशुकचाषचातकसमानवर्णा यदा जपाकुसुमपङ्कजद्युतिमुषश्च सन्ध्याघनाः ।
जलोर्मिनगनक्रकच्छपवराहमीनोपमाः प्रभूतपुटसंचया नतु चिरेण यच्छन्त्यपः ॥

स्तनितं निशि विद्युतो दिवा रुचिरनिभा यदि दण्डवस्थिताः ।
पवनश्च पुरस्सुशीतलो यदि सलिलस्य तदागमो भवेत् ॥ इति ।

अन्यान्यपि वृष्टिचिह्नानि तत्रैवः —

उदयशिखरसंस्थो दुर्निरीक्ष्योतिदीप्तो द्रुतकनकनिकाशः स्निग्धवैडूर्यकान्तिः ।
तदहनि कुरुतेंभस्तोयकाले विवस्वान् प्रतपति यदि चोच्चैः खं गतोतीव तीक्ष्णम् ॥

विरसमुदकं गोनेत्राभं वियद्विमला दिशो लवणविकृतिः काकांडाभं यदा च भवेन्नभः ।
पवनविगमः पोप्लूयन्ते झषाः स्थलकामिनो रसितमसकृन्मण्डूकानां जलागमहेतवः ॥

मार्जारा भृशमवनिं नखैर्लिखन्तो लोहानां मलनिचयः सविस्रगन्धः ।
रथ्यायां शिशुरचिताश्च सेतुबन्धाः संप्राप्तं जलमचिरान्निवेदयन्ति ॥

गिरयोंजनचूर्णसन्निभा यदि वा बाष्पनिरुद्धकन्दराः ।
कृकवाकुविलोचनोपमाः परिवेषाश्शशिनश्च वृष्टिदाः ॥

विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवायः ।
द्रुमाधिरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतं च ॥

शुककपोतविलोचनसन्निभो मधुनिभश्च यदा हिमदीधितिः ।
प्रतिशशी च यदा दिवि जायते पतति वारि तदप्यचिरान्नवम् ॥

वल्लीनां गगनतलोन्मुखाः प्ररोहाः स्नायन्ते यदि जलपांसुभिर्विहङ्गाः ।
सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः ॥

यदि तित्तिरिपत्रनिभं गगनं मुदिताः प्रवदन्ति च पक्षिगणाः ।
उदयास्तमये सवितुः द्युनिशं त्वचिरेण घना विसृजन्ति जलम् ॥

यद्यमोघकिरणास्सहस्रगोरस्तभूधरकरा इवोच्छ्रिताः ।
भूसमं च रसते यदांबुदस्तन्महद्भवति वृष्टिलक्षणम् ॥

अस्तभूधरस्य करा हस्ता इव किरणा यस्य; उदयसमये एतद्द्रष्टव्यम् । अमोघत्वं च कराणां पारिभाषिकम् । तद्यथा —

शुक्लाः करा दिनकृतो दिवादिमध्यान्तगामिनः स्निग्धाः ।
अव्युच्छिन्ना ऋजवो वृष्टिकरास्त्वमोघाख्याः ।
उदयास्तमये भानोर्ये दीर्घा रश्मयस्त्वमोघास्ते ॥ इति ।

नवमासधृतं गर्भं भास्करस्य गभस्तिभिः ।
पीत्वा रसं समुद्राणां द्यौः प्रसूते रसायनम् ॥

अत्र मेघाः सूर्यरश्मिमरुदादिभिः सामुद्रमुदकं गृहीत्वा गर्भवत्कार्तिकमासप्रभृति नवमासधृतं सस्यानां षड्रससम्पत्तिहेतुभूतं शुद्धमुदकं श्रावणे मासि मुञ्चन्तीति सूचितम् । तथा च रश्मिमरुद्भ्यां सामुद्रोदकग्रहणे **तैत्तिरीयश्रुतिः** — 'याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति, पर्जन्येनौषधिवनस्पतयः प्रजायन्ते' इति । 'उदीर यथा मरुतस्समुद्रतो यूयं वृष्टिं वर्ष यथा पुरीषिण' इति च । कार्तिकमासप्रभृति गर्भधारणं **तोडरानन्दे** प्रतिपादितम् —

शुक्लपक्षमतिक्रम्य कार्तिकस्य विचारयेत् ।
गर्भाणां सम्भवं सम्यक् सस्यसम्पत्तिकारणम् ॥ इति ।

हरिवंशेऽपि —

दुदोह स विभुर्गा वै शक्रो दिव्याः पयस्वलाः ।
ताः क्षरन्ति नवं क्षीरं मेध्यं मेघौघधारितम् ॥
तज्जलं वज्रनिर्घोषं विमुञ्चन्ति नभोगताः । एवमेतत्पयो दुग्धं गोभिः सूर्यस्य शाश्वतम् ॥
पर्जन्यः सर्वभूतानां भवाय भुवि वर्षति ॥ इति ।

सूर्यकिरणैर्जलग्रहणं **वनपर्वणि** :—

नत्वोत्तरायणं तेजो रसानुद्धृत्य रश्मिभिः ।
दक्षिणायनमावृत्तो महीं निविशते रविः ॥ इति ।

कालिदासोऽपि —

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥ इति ।

मेघानां गर्भसंभवचिह्नानि च उदगैशानैन्द्रीदिक्षु आह्लादकरो मृदुर्वातः आकाशनैर्मल्यं, चन्द्रसूर्ययोः स्निग्धसितस्थूलपरिवेषः, स्थूलतरस्निग्धबहुलसूचीक्षुराकारा लोहिता मेघाः, वियद्विशुद्धेन्दुनक्षत्रं, नभोनीलता, इन्द्रधनुर्मन्द्रगर्जितविद्युत्प्रतिसूर्ययुक्ता सन्ध्या, उदगैशानैन्द्रीदिक्षु पक्षिमृगादिशब्दराहित्यं, कुजबुधशुक्रशनिगुरूणां स्वाधिष्ठान-नक्षत्रादुदक्संचाररूपप्रादक्षिण्यं, स्थौल्यस्निग्धमयूखत्वोपसर्गराहित्यं च, तरूणामनुप-सृष्टाङ्कुरता, नरचतुष्पदामतिहर्ष इत्येतानि । तथा च ज्योतिश्शास्त्रे **तोडरानन्दः**—

ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतो वियद्विमलम् ।
स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयूखार्कौ ॥
पृथुबहुलस्निग्धघनं सूचीक्षुरलोहिताभ्रयुतम् । काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम् ॥
सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यकैः प्रतियुता शुभा सन्ध्या ।
शशिशिवशक्राशास्थाः शांतरवाः पक्षिमृगसंघाः ॥
विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः ।
तरवश्च निरुपसृष्टांकुरा नरचतुष्पदा हृष्टाः ॥ इति ।

तत्रापि माघे मासि मेघाडम्बरहिमवातचन्द्रसूर्यपरिवेषणानि श्रावणमास-वृष्टिप्रदगर्भचिह्नानि । फाल्गुनमासि अभ्रसंघातवृष्टिस्तनितपुरोवाताः भाद्रपदवृष्टिगर्भ-चिह्नानि । चैत्रमासि वृक्षाणां बहुपुष्पफलससिकतवातहिमवर्षाभ्राणि आश्वयुजे मासि वृष्टिचिह्नानि । वैशाखे मासि प्रदक्षिणावर्तवायुः स्वल्पा वृष्टिश्च कार्तिकमास-गर्भमासचिह्नानि । तथा च **तोडरानन्दे** —

सितमभ्रं तथा वायुः चन्द्रार्कपरिवेषणम् । माघे मासि परीक्षेत श्रावणे वृष्टिमादिशेत् ॥
फाल्गुने चाभ्रसंघातो वृष्टिस्तनितमेव च । पुरोवाताश्च ये प्रोक्ताः मासि भाद्रपदे शुभाः ॥
बहुपुष्पफला वृक्षा वाताः शर्करवर्षिणः । शीतवर्षं तथाभ्राणि चैत्रे चाश्वयुजे वदेत् ॥
वहन्ति मृदवो वाताः स्वल्पं वर्षं प्रदक्षिणाः । वैशाखे तानि रूपाणि कार्तिके मासि वर्षति ॥
इति । येषु नक्षत्रेषु संभूतो गर्भः बहुतोयदो भवति तानि **तोडरानन्दे**—
भाद्रपदाद्वयविश्वांबुदैवतैतामहेष्वथर्क्षेषु । सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति ॥

एतच्चोक्तेषु नक्षत्रेषु दोषाभावविषयं, सति तु दोषे उपघात एव । तथा च **गर्गः**—
प्राजापत्यं मृगाश्लेषा रौद्रं चानिलवारुणम् । आषाढाद्वितयं चैव तथा भाद्रपदाद्वयम् ॥
नक्षत्रदशकं चैतद्यदि स्याद्ग्रहदूषितम् । न गर्भाः सम्पदं यान्ति योगक्षेमो न कल्पयेत् ॥
उल्कयाभिहतं वापि केतुना वाप्यधिष्ठितम् । न गर्भास्संपदं यान्ति वासवश्च न वर्षति ॥

गर्भचिह्नानि च —

मुक्तारजतनिकाशास्तमालनीलोत्पलांजनाभासाः ।
जलचरसत्वाकारा गर्भेषु घनाः प्रभूतजलाः ॥
तीव्रदिनकरकिरणाभितापिता मन्दमारुता जलदाः ।
रूपिता इव धाराभिः विसृजन्त्यंभः प्रसवकाले ॥

गर्भधारणलक्षणं च —

सविद्युतः सपृषतः सपांसूत्करमारुताः । सार्कचन्द्रपरिच्छिन्ना धारणाः शुभधारणाः ॥ इति ।

तत्रापि ज्येष्ठशुक्लाष्टमीप्रभृति एकादशीपर्यन्तं पूर्वफल्गुनीप्रभृति नक्षत्रचतुष्टये मृदुर्वायुः श्रवणादिमासचतुष्टयगर्भपोषणचिह्नं । तदुक्तम् —
ज्येष्ठस्य शुक्लाष्टम्यां तु नक्षत्रे भगदैवते । चतस्रो धारणाः प्रोक्ताः मृदुवातसमीरिताः ॥
ततः स्वात्यादिनक्षत्रैश्चतुर्भिः श्रावणादयः । परिपूर्णाश्शुभास्तास्स्युस्सर्वाश्शिवसुभिक्षदाः ॥

अथ गर्भोपघातलक्षणानि —

गर्भोपघातलिङ्गान्युल्काश्शशिपांसुपातदिग्दाहाः ।
क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः ॥
रुधिरादिवृष्टिवैकृतपरिहेन्द्रधनुषि दर्शनं राहोः ।
इत्युत्पातैरेतैस्त्रिविधैश्चान्यैर्हतो गर्भः ॥

अयमर्थः —गर्भे दृष्टे यदि पश्चादिमे उत्पाता दृश्यन्ते तदा गर्भो निहत इति ज्ञेयम्। यस्तूत्पातानन्तरं गर्भो जायते न तस्य विनाश इति। तत्र ज्येष्ठशुक्लद्वादश्यादिदिनचतुष्टये स्वात्यादिनक्षत्रचतुष्टये वृष्टिः श्रावणादिमासचतुष्टयगर्भसूचिका। तदुक्तं तत्रैव —

स्वातौ तु श्रवणं विद्या वृष्टे त्वैन्द्राग्नदैवते। भाद्रपदे त्वनावृष्टिर्मैत्रे चाश्वयुजे स्मृता।

ऐन्द्रे तु कार्तिकेत्येव वृष्टे वृष्टिं निहन्ति च। एतेषु यदि नो वृष्टिस्तदा सौभिक्ष्यलक्षणम्॥

एतच्च ग्रहोदयास्तमयादिनिमित्तरहितवृष्टिविषयम्। गर्भसमयेतिवृष्टिर्गर्भाभावाय। निमित्तानि—'प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च' त्यादीनि।

निरुद्धो गर्भः आगामिगर्भात्पूर्वं करकारूपेण पतति।

गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न वृष्टिः।
आत्मीये गर्भसमये करकामिश्रं ददात्यम्भः॥

काठिन्यं याति यदा चिरकालधृतं पयः पयस्विन्याः।
कालातीतं तद्वत्सलिलं काठिन्यमुपयाति॥

वर्षाकालीनसद्यःसुवृष्टिप्रदमेघलक्षणानि। तत्र आषाढे रोहिणीयोगे वृष्टिसूचकमेघलक्षणं—चित्रैर्मधुकरकिंशुककुसुमावदातैः,

अथवाञ्जनशैलशिलानिचयप्रतिरूपधरैः स्थगितं गगनम्।
हिममौक्तिकशङ्खशशाङ्ककरद्युतिहारिभिरंबुधरैरथवा॥

तटिद्धेमपक्षैर्बलाकाग्रदन्तैः स्रवद्वारिदानैश्चलत्प्रान्तहस्तैः।
विचित्रेन्दुचापध्वजोच्छ्रायशोभैस्तमालालिनीलैर्वृतं चाब्दनागैः॥

सन्ध्यानुरक्ते नभसि स्थितानां इन्दीवरश्यामरुचां घनानाम्।
बृन्दानि पीतांबरवेष्टितस्य कान्तिं हरेश्चोरयतां यदा वा॥

निगदितरूपैर्जलधरजालैस्त्र्यहमवरुद्धं द्व्यहमथवापि।
यदि वियदेवं भवति सुभिक्षं मुदितजनश्च प्रचुरजला भूः॥ इति॥

शक्यमम्बरमारुह्य मेघसोपानपंक्तिभिः।
कुटजार्जुनमालाभिरलंकर्तुं दिवाकरम्॥

सन्ध्यारागोत्थितैस्ताम्रैरन्तेष्वधिकपाण्डरैः।
स्निग्धैरभ्रपटच्छेदैर्बद्धव्रणमिवांबरम्॥

मन्दमारुतनिःश्वासं सन्ध्याचन्दनरञ्जितम् ।
आपाण्डुजलदं भाति कामातुरमिवाम्बरम् ॥

एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता ।
सीतेव शोकसंतप्ता मही बाष्पं विमुञ्चति ॥

मेघोदरविनिर्मुक्ताः कल्हारसुखशीतलाः ।
शक्यमञ्जलिभिः पातुं वाताः केतकिगन्धिनः ॥

एष फुल्लार्जुनश्शैलः केतकैरधिवासितः ।
सुग्रीव इव शान्तारिर्धाराभिरभिषिच्यते ॥

मेघकृष्णाजिनधरा धारायज्ञोपवीतिनः ।
मारुतापूरितगुहाः प्रथिता इव पर्वताः ॥

अत्र पर्वतानां कृष्णाजिनयज्ञोपवीतादिधर्मकल्पनेन अध्येतृसादृश्यप्रतिपादनात् अध्येतृणां ब्रह्मचारिणां कृष्णाजिनोपवीतादिधारणं धर्म इत्युक्तम् । तथा **मनुः** —

कार्ष्णरौरवबस्तानि चर्माणि ब्रह्मचारिणः । वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च ॥

गौतमोऽपि–क्रमेण कृष्णरुरुबस्ताजिनानि वासांसीति । यज्ञोपवीतधारणे **मनुः** –

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्वकृतं त्रिवृत् ।
शाणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकम् ।

खादिरगृह्येऽपि–यज्ञोपवीतं सौत्रं कौशं वा ग्रीवायां प्रतिमुच्य दक्षिणं बाहुमुद्धृत्य यज्ञोपवीती भवति, इति । मेखलाधारणे **मनुः** —

मौञ्जी त्रिवृत्कृता श्लक्ष्णा कार्या विप्रस्य मेखला ।
क्षत्रियस्य तु मौञ्जी ज्या वैश्यस्य कुशतान्तवी ॥ इति ।

गौतमोऽपि — मौञ्जीज्यामौर्वीसौत्र्यो मेखलाः । इति । दण्डधारणे **मनुः** —

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ ।
पैप्पलौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः ॥ इति ।

तत्परिमाणमाह स एव —

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः ।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः ॥
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः ।

अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः ॥ इति ।

गौतमोऽपि — मूर्धललाटनासाग्रप्रमाणा इति ।

कशाभिरिव हैमीभिर्विद्युद्भिरिव ताडितम् ।
अन्तःस्तनितनिर्घोषं सवेदनमिवांबरम् ॥

नीलमेघाश्रिता विद्युत्स्फुरन्ती प्रतिभाति मा ।
स्फुरन्ती रावणस्याङ्के वैदेहीव तपस्विनी ॥

इमास्ता मन्मथवतां हिताः प्रतिहिता दिशः ।
अनुलिप्ता इव घनैर्नष्टग्रहनिशाकराः ॥

क्वचिद्बाष्पाभिसंरुद्धान् वर्षागमसमुत्सुकान् ।
कुटजान्पश्य सौमित्रे पुष्पितान् गिरिसानुषु ॥

मम शोकाभिभूतस्य कामसन्दीपनान्स्थितान् ।

रजः प्रशान्तं सहिमोद्य वायुर्निदाघदोषप्रसराः प्रशान्ताः ।
स्थिता हि यात्रा वसुधाधिपानां प्रवासिनो यान्ति नराः स्वदेशान् ॥

संप्रस्थिता मानसवासलुब्धाः प्रियान्विताःसम्प्रति चक्रवाकाः ।
अभीक्ष्णवर्षोदकविक्षतेषु यानानि वर्त्मसु न सम्पतन्ति ॥

क्वचित्प्रकाशं क्वचिदप्रकाशं नभः प्रकीर्णाम्बुधरं विभाति ।
क्वचित्क्वचित्पर्वतसन्निरुद्धं रूपं यथा शान्तमहार्णवस्य ॥

व्यामिश्रितं सर्जकदम्बपुष्पैर्नवं जलं पर्वतधातुताम्रम् ।
मयूरकेकाभिरनुप्रयातं शैलापगाश्शीघ्रतरं वहन्ति ॥

रसाकुलं षट्पदसन्निकाशं प्रभुज्यते जम्बुफलं प्रकामम् ।
अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम् ॥

विद्युत्पताकास्सबलाकमालाश्शैलेन्द्रकूटाकृतिसन्निकाशाः ।
गर्जन्ति मेघास्समुदीर्णनादा मत्ता गजेन्द्रा इव संयुगस्थाः ॥

वर्षोदकाप्यायितशाद्वलानि प्रवृत्तनृत्तोत्सवबर्हिणानि ।
वनानि निर्विष्टवलाहकानि पश्यापराह्णेष्वधिकं विभान्ति ॥

समुद्वहन्तः सलिलातिभारं बलाकिनो वारिधरा नदन्तः ।
महत्सु शृङ्गेषु महीधराणां विश्रम्य विश्रम्य पुनः प्रयान्ति ॥

मेघाभिकामा परिसंपतन्ती संमोदिता भाति बलाहपङ्क्तिः ।

वातावधूता वरपौण्डरीकी लंबेव माला रचितांबरस्य ॥

बालेन्द्रगोपान्तरचित्रितेन विभाति भूमिर्नवशाद्वलेन ।
गात्रानुवृत्तेन शुकप्रभेण नारीव लाक्षोक्षितकंबलेन ॥

अत्रोक्तवर्षाकालवैचित्र्यं **विष्णुपुराणेऽपि**—

प्रावृट्कालस्ततोतीव मेघौघस्तनितांबरः । बभूव वारिधाराभिरैक्यं कुर्वन्दिशामिव ॥
प्ररूढनवशष्पाढ्या शक्रगोपास्तृता मही । तदा मरतकेवासीत्पद्मरागविभूषिता ॥
ऊहुरुन्मार्गगामीनि निम्नगांभासि सर्वतः । मनांसि दुर्विनीतानां प्राप्य लक्ष्मीं नवामिव ॥
न रेजेन्तर्हितश्चन्द्रो निर्मलो मलिनैर्घनैः । सद्वादिवादो मूर्खाणां प्रगल्भाभिरिवोक्तिभिः ॥
निर्गुणेनापि चापेन शक्रस्य गगने पदम् । अवाप्यताविवेकस्य नृपस्येव परिग्रहे ॥
मेघपृष्ठे बलाकानां रराज विमलावलिः । दुर्वृत्ते वृत्तचेष्टेव कुलीनस्यातिशोभना ॥
न बबन्धाम्बरे स्थैर्यं विद्युदत्यंतचञ्चला । मैत्रीव प्रवरे पुंसि दुर्जनेन प्रयोजिता ॥
मार्गा बभूवुरस्पष्टा नवशष्पसमावृताः । अर्थान्तरमिव प्राप्ताः प्रबलानामिवोक्तयः ॥
उद्वृत्तशिखिसारंगे तस्मिन् काले महावने । रामकृष्णौ मुदा युक्तौ गोपालैश्चेरतुस्सह ॥

निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति ।
हृष्टा बलाका घनमभ्युपैति कान्ता सकामा प्रियमभ्युपैति ॥

अनेन हरेर्निद्राकाल उक्तः । तथा च **यमः**—

क्षीराब्धौ भोगपर्यङ्के आषाढ्यां संविशेद्धरिः । निद्रां त्यजति कार्तिक्यां तयोस्तं पूजयेत्सदा ॥
ब्रह्महत्यादिकं पापं क्षिप्रमेव विनश्यति ।

तोडरानन्दे **स्कान्दे** तु—

आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवम् । आभाकासितपक्षे तु मैत्रश्रवणरेवती ॥
आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ।
निशि स्वापो दिवोत्थानं सन्ध्यायां परिवर्तनम् ॥ इति ।

वाराहे तु—

द्वादश्यां सन्धिसमये नक्षत्राणामसंभवे । आभाकासितपक्षेषु शयनावर्तनादिकम् ॥
आषाढशुद्धद्वादश्यां पौर्णमास्यामथापि वा । चातुर्मास्यव्रतारंभं कुर्याद्वा कर्कसंक्रमे ॥ इति ।

अत्र च परमेश्वरस्य स्वापादिप्रबोधपर्यन्तं सर्वैः किञ्चिद्व्रतं कर्तव्यम्। तथा च **निर्णयसिन्धौ** —

आषाढे तु सिते पक्षे एकादश्यामुपोषितः।
चातुर्मास्यव्रतं कुर्याद्यत्किञ्चिन्नियतो नरः॥ इति॥

तत्रापि अवश्यकर्तव्यान्युत्कृष्टव्रतान्याह **देवलः** —

ब्रह्मचर्यं तथा सत्यं शौचमामिषवर्जनम्।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः॥ इति।

आमिषाणि च **पाद्मे** —

प्राण्यङ्गचूर्णचर्माम्बु जम्बीरं बीजपूरकम्। अयज्ञशिष्टं माषादि यद्विष्णोरनिवेदितम्॥
दग्धमन्नं मसूरं च मांसं चेत्यष्टधामिषम्। रुच्यं तत्तद्देशलभ्यं सुप्ते देवे विवर्जयेत्॥

गोछागीमाहिषीभूतादन्यदुग्धादि चामिषम्।
धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा॥

द्विजक्रीतरसास्सर्वे लवणं भूमिजं तथा। ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितम्॥

आत्मार्थं पाचितं सर्वमामिषं तत्स्मृतं बुधैः।
निष्पावान्राजमाषांश्च मसूरान् संधितानि च॥
वृन्ताकं च कलिङ्गं च सुप्ते देवे विवर्जयेत्।

संधितानि लवणशाकादीनि इति। समाप्तिस्तु कार्तिकशुद्धद्वादश्यामेव कार्या। तदुक्तं **हेमाद्रौ-भारते** —

चतुर्धा गृह्य वै चीर्णं चातुर्मास्यव्रतं नरः।
कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत्॥ इति।

इदं च शिवभक्तादिभिरपि कार्यम्। तदुक्तं **ब्रह्मकैवर्ते** —

शिवे वा भक्तिसंयुक्तो भानौ वा गणनायके। कृत्वा व्रतस्य नियमं यथोक्तफलभाग्भवेत्॥

व्रतग्रहणप्रकारस्तु **हेमाद्रौ, भविष्ये** —

महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः। जातीकुसुममालाभिर्मन्त्रेणानेन पूजयेत्॥
सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम्। प्रबुद्धे च विबुध्येत प्रसन्नो मे भवाच्युत॥
एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं नरः। प्रभाषेताग्रतो विष्णोः कृताञ्जलिपुटस्तदा॥

चतुरो वार्षिकान् मासान्देवस्योत्थापनावधि । इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत ॥

हरिवंशेऽपि —

नूनं त्रिदशभूयिष्ठं मेघकालसुखोषितम् । पतत्रिकेतनं देवं बोधयन्ति दिवौकसः ॥ इति ।

"द्रुतं नदी सागरमभ्युपैति" इत्यनेन वृष्ट्यादीनां पूर्णप्रवाहेन समुद्रं प्रति द्रुततरगमनं प्रत्यक्षसिद्धमेव । 'हृष्टा बलाका घनमभ्युपैति' इत्यनेन बलाकानां गर्भधारणार्थं सजलं घनं प्रति गमनमुक्तम् । तथा च कालिदासो **मेघसन्देशे** —

गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः
सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ इति ॥

प्रतापमार्ताण्डेऽपि — "गर्भं बलाका दधतेऽब्दयोगा"दिति । 'कान्ता सकामा प्रियमभ्युपैती'त्यनेन वर्षाकाले स्त्रीणां कामोद्रेक उक्तः । तथा च **रसमञ्जर्यां**—

एते वारिकणान् किरन्ति परुषान् वर्षन्ति नांभोधराः
शैलाश्शाद्वलमुद्रमन्ति न सृजन्त्येते पुनर्नायकान् ।
त्रैलोक्ये तरवः फलानि सुवते नैवारभंते जनान्
धातः कातरमालयामिकुलटाहेतोस्त्वया किं कृतम् ॥

अत्र चतुर्ष्वपि पादेषु निद्रानदीबलाकाकान्तानां स्वस्वप्रियतमान् केशवसमुद्रघनपतीन् प्रति स्वत एवाभिसरणकथनात् पतिं प्रत्यभिसरणशीला अभिसारिका सूचिता । तथा **चामरकोशे** — 'कान्तार्थिनी तु या नारीति' । सा च त्रिविधा—स्वीया, परकीया सामान्या चेति । तत्र स्वामिन्येवानुरक्ता स्वीया । तस्याश्चेष्टा, भर्तृशुश्रूषा, शीलसंरक्षणं, आर्जवं, क्षमा चेति । तद्यथा —

गतागतकुतूहलं नयनयोरपाङ्गावधि स्मितं कुलनतभ्रुवामधर एव विश्राम्यति ।
वचः प्रियतमश्रुतेरतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति ॥ इति ।

अप्रकटितपरपुरुषानुरागा परकीया । तद्यथा —

अयं रेवाकुञ्जः कुसुमशरसेवासमुचितः समीरोऽयं वेलानवविदलदेलापरिमलः ।
इयं प्रावृट् धन्या नवजलदविन्यासचतुरा पराधीनं चेतः सखि किमपि कर्तुं मृगयते ॥ इति ।

वित्तमात्रोपाधिकतया परपुरुषाभिलाषिणी सामान्या । तद्यथा—

दृष्ट्वापांगणसन्निधौ बहुधनं दातारमभ्यागतं
वक्षोजौ तनुतः परस्परमिवाश्लेषं कुरङ्गीदृशः ।

आनन्दाश्रुपयांसि मुञ्चति मुहुर्मालामिषात्कुन्तलो
दृष्टिः किंच घनागमं कथयितुं कर्णान्तिकं गाहते ॥ इति ।

स्वीयापि त्रिविधा, मुग्धा, मध्या, प्रौढा चेति । तासां लक्षणानि **प्रतापरुद्रीये** – उदयचौवना मुग्धा लज्जाविजितमन्मथा । लज्जामन्मथमध्यस्था मध्यमोदितयौवना ॥

स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवना । इति ।

तत्र मुग्धाभिसारिका यथा ––

दूतीविद्युदुपागता सहचरी रात्रिस्सहस्थायिनी
दैवज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां शुभाम् ।
वाचं मांगलिकीं तनोति तिमिरस्तोमोऽपि झिल्लीरवैः
जातोयं दयिताभिसारसमयो मुग्धे विमुञ्च त्रपाम् ॥

मध्यमाभिसारिका यथा —

भीतासि नैव भुजगात्पथि मद्भुजस्य सङ्गे पुनः किमपि कम्पमुरीकरोषि ।
अम्भोधरध्वनिभिरक्षुभितासि तन्वी मद्वाचि साचिवदनासि किमाचरामि ॥

प्रगल्भाभिसारिका यथा ––

स्फुरदुरसिजभारभंगुराङ्गी किसलयकोमलकान्तिना पदेन ।
अथ कथय कथं सहेत गन्तुं यदि न निशासु मनोरथो रथः स्यात् ॥

समयानुरूपभूषणशंकाप्रज्ञानैपुण्यप्रकटप्रहासादिचेष्टायुक्ता परकीयाभिसारिका । यथा–

रभसादभिसर्तुमुद्यतानां वनितानां सखि वारिदो विवस्वान् ।
रजनी दिवसोन्धकारमर्चिर्विपिनं वेश्म विमार्ग एव मार्गः ॥

सामान्यवनिताभिसारिका यथा —

चन्द्रोदये चन्दनमंगकेषु विलिप्य विन्यस्य विनिर्गतायाः ।
मनो निहन्तुं मदनोऽपि बाणान् करेण कौन्दान्बिभरांबभूव ॥

उक्तास्सर्वविधा अपि पुनस्त्रिविधाः । दिवाभिसारिका, श्वेताभिसारिका, कृष्णाभिसारिका चेति । दिवाभिसारिका यथा —

पल्लीनामभिपस्य पङ्कजदृशां सर्वोत्सवामन्त्रणे
जाते सद्मजना मिथः कृतमहोत्साहाः पुरं प्रस्थिताः ।

सव्याजस्थितयोर्विहस्य गतयोः शुद्धान्तमत्रान्तरं
यूनोः स्विन्नकपोलयोर्विजयते कोऽप्येष कण्ठग्रहः ॥

श्वेताभिसारिकालक्षणं "न चन्द्रोदय" इत्यनेन श्लोकेनोक्तं प्राक् प्रपञ्चितम्। कृष्णाभिसारिका यथा—

गन्तुं यदि व्यवसितासि घने निशीथे नीलांशुकेन तनुमावृणु मुग्धशीले।
सौदामिनी यदि पथि प्रतिरोधिनी स्यादप्रावृतैव कनकद्रवगौरि गच्छेः ॥ इति।

इतोऽप्यभिसारिकाणां बहवो भेदास्तल्लक्षणोदाहरणभेदाश्च सन्ति, विस्तरभिया न लिख्यन्ते।

सुरतामर्दविच्छिन्नास्स्वर्गस्त्रीहारमौक्तिकाः।
पतन्तीवाकुला दिक्षु तोयधारास्समन्ततः ॥

इत्यनेन सुरसुन्दरीणां पुरुषायितं सूचितम्। तथा च प्राचीनाः—

मुक्ताः पतन्ति भूमौ बालाः कलयन्ति केवलां मुक्तिम्।
चुम्बत्यंबरमवनिर्विपरीते किन्नु विपरीतम् ॥

षट्पादतन्त्रीमधुराभिधानं प्लवङ्गमोदीरितकण्ठतालम्।
आविष्कृतं मेघमृदङ्गनादैः वनेषु सङ्गीतमिव प्रवृत्तम् ॥

अस्यार्थः—षट्पादाः भ्रमरा एव तन्त्र्यः तदुत्थः श्रोत्रचित्तानुरञ्जनसंपादनसमर्थगान्धर्वशास्त्रसिद्धमधुरादिगुणोपेतो ध्वनिविशेषो यस्मिन् तत्सङ्गीतम्। प्लवङ्गमोदीरितकण्ठतालं, प्लवङ्गमा मण्डूकास्तदुदीरिततालज्ञसमयप्रसिद्धकण्ठाभरणादितालोपेतम्। मेघमृदङ्गनादैः। मेघा एव मृदङ्गास्तेषां नादैराविष्कृतं प्रकटीकृतं तत्संगीतं प्रस्तुतमिवेति। अत्र वीणातालमृदङ्गवाद्यमात्रं प्रतिपाद्य सङ्गीतं प्रवृत्तमित्युक्त्या वक्ष्यमाणं नृत्तगीतमप्यभिप्रेतम्, तस्य त्रितयात्मकत्वात्। तदुक्तं **शार्ङ्गदेवेन**—

'गीतं वाद्यं तथा नृत्तं त्रयं सङ्गीतमुच्यते' इति। षट्पादतन्त्रीत्यत्र षट्पदानां तन्त्रीत्वनिरूपाणात् तद्युक्ता वीणा द्योत्यते। सा द्विविधा गात्रवीणा, दारुवीणा चेति। तदुक्तं **नारदेन**—

'दारवी गात्रवीणा च द्वे वीणे नरजातिषु' इति।

तथा बह्वृचारण्यके दारुवीणागात्रवीणयोः सम्यक्प्रतिपादनेन वीणाद्वयं प्रतिपादितम्। "अथ खल्वियं दैवी वीणा भवति, तदनुकृतिरसौ मानुषी वीणा भवति यथास्याः

शिर एवममुष्याः शिरो, यथास्या उदरमेवममुष्या अम्भणं, यथास्या जिह्वैवममुष्या वादनम्, यथास्यास्तन्त्रय एवममुष्या अंगुल्यो, यथास्याः स्वरा एवममुष्याः स्वराः, यथास्याः स्पर्शा एवममुष्याः स्पर्शाः, यथाह्येवेयं शब्दवती, एवमसौ शब्दवती, चर्मवती यथा ह्येवेयं लोमशेन चर्मणा पिहिता भवति एवमसौ लोमशेन चर्मणापिहिता, लोमशेन ह वै स चर्मणा पुरा वीणा अपिदधति, स यो हैतां दैवीं वीणां वेद श्रुतवदनो भवति भूमिप्रास्य कीर्तिर्भवति यत्र क्वचार्या वाचो भाषन्ते विदुरेनं तत्रेति। तथा दारुवीणापि द्विविधा श्रुतिवीणा स्वरवीणा चेति। तत्र महाव्रतादौ माहेन्द्रस्तोत्रोपाकरणानन्तरं आहतदुन्दुभीन् प्रवदन्तु वीणा इति श्रुत्या विनियुक्ता वीणा श्रुतिवीणा। सा अनेकविधा। वाणः अलाबुवीणा, वक्त्रा, कपिशीर्ष्णी महावीणा, पिशीलवीणा, काण्डवीणा, पिछोलवीणा चेति। स्वरवीणाप्यनेकविधा, एकतन्त्री नकुला, त्रितन्त्रिका, चित्रा, विपञ्ची, मत्तकोकिला आलापिनी, पिनाकी, निश्शंकादिभेदात्। तदुक्तं **संगीतरत्नाकरे** —

तद्भेदास्त्वेकतन्त्री स्यान्नकुलश्च त्रितन्त्रिका। चित्रा वीणा विपञ्ची च ततः स्यान्मत्तकोकिला॥
आलापिनी किन्नरी च पिनाकीसंज्ञिकापरा। निश्शङ्कवीणेत्याद्याश्च शार्ङ्गदेवेन कीर्तिताः॥इति।

तस्याश्चैकतन्त्र्याख्यवीणाया वादने त्रिविधाः करव्यापाराः घातपातादिरूपाः। तत्र नव दक्षिणकरव्यापाराः, द्वावितरस्य करस्य, तद्व्यतिरिक्ताश्च हस्तद्वयसाधारणास्त्रयोदश व्यापाराः। तदुक्तं **शार्ङ्गदेवेन** —

घातः पातश्च संलेखः तथोल्लेखावलेखकौ। भ्रमरः संरुधिछिन्नौ नवमी नखकर्तरी॥
व्यापारा दक्षिणस्यैते पाणेर्वामस्य तु द्वयम्। स्फुरितः खसितश्चेति करयोरुभयोस्त्वमी॥
घोषो रेफोथ बिन्दुः स्यात्कर्तरी चार्धकर्तरी। निष्कोटिताख्यः स्खलितः शुकवक्त्रश्च मूर्छना॥
तालहस्तोर्धचन्द्रश्च प्रसारः कुहरोऽपरः। त्रयोदशैते सर्वेऽमी स्युश्चतुर्विंशतिर्युताः॥
करनामान्यपीमानि मन्वते वाद्यवेदिनः। इति।

तत्र घातो नाम मध्यमांगुल्याक्रान्ततर्जन्या तन्त्रिकाताडनम्। केवलतर्जन्या तन्त्रीघातः पातः। अन्तःस्थिततर्जन्या तन्त्रीस्फालनं संलेखः। अन्तःस्थितमध्यमया तन्त्र्यास्फालनमुल्लेखः। मध्यमया बहिस्तन्त्रीताडनं संरुधिः। तर्जनीपार्श्वलग्नायास्तन्त्र्या अनामिकया ताडनं छिन्नः। त्वरितगत्या नखैश्चतुर्भिस्तन्त्रीताडनं नखकर्तरी इति दक्षिणकरव्यापाराः। अथ सव्यकरव्यापारौ, पार्श्वभागसंबद्धाद्वामकरात्प्रसारिताद्यः कम्पजनको व्यापारः स स्फुरितः। वीणादण्डोपरि स्थितया सोपानरूपया पुनस्तन्त्रीघर्षणं सितः इति।

एवमन्येऽपि घोषादयः अन्तःस्थितानामिकादिभिस्तन्त्रीताडनरूपाः। तदुक्तं **संगीतरत्नाकरे —**

घातः स्यान्मध्यमाक्रान्ततर्जन्या तन्त्रिकाहरिः। हरिर्हरणम्।

पातः केवलया घातः सलेखोन्तःस्थया हरिः। अन्तर्मध्यमया घातमुल्लेखं संप्रचक्षिरे ॥

अवलेखो मध्यमया स्यात्तन्त्रीताडनं बहिः। अंगुल्यान्येन्यथाप्याहुः संलेखश्चावलेखनम् ॥

सर्वाभिस्तिसृभिर्द्वाभ्यामथवेति च ते जगुः। मध्यमानामिकाभ्यां तु बहिर्वातोऽर्धसंधितः ॥

तर्जनीपार्श्वलग्नायास्तन्त्र्या बहिरनामया। हननं छिन्नमाचष्ट श्रीमत्सोड्डुलनन्दनः ॥

क्रमाद्द्रुतं नखैर्घातश्चतुर्भिर्नखकर्तरी। स्फुरितः कम्पितस्तन्त्रीपार्श्वलग्ने प्रसारणात् ॥

मुहुस्सारणया तन्त्रीघर्षणं खसितो मतः।

इति। एवमन्येषां लक्षणानि विस्तरभयान्न लिख्यन्ते। इयमेकतन्त्री। नकुलादयोपि तत्रैव निरूपिताः। तथाहि —

तन्त्रीद्वयेन नकुलः स्यादन्वर्था वितन्त्रिका। तन्त्रीभिस्सप्तभिश्चित्रा विपञ्ची नवभिर्मता ॥

तन्त्रीणामेकविंशत्या कीर्तिता मत्तकोकिला। मुख्येयं सर्ववीणानां त्रिस्थानैस्सप्तभिः स्वरैः ॥

संभिन्नत्वात्तदन्यास्तु तस्याः प्रत्यंगमीरिताः। करणैश्चिलयन्त्यस्तास्तस्यारुपरंजितकाः ॥ इति।

एवं वीणायां घातुसंज्ञिकाः केचन रागा निस्तुलरागसंपादकाः अदृष्टसंपादकाश्च प्रहारविशेषजनिता विस्तारकरणादिरूपाः विस्तरभयान्नेह प्रतिपाद्यन्ते।

मधुराभिधानमित्यनेन रक्तादयो गुणा उपलक्ष्यन्ते। ते च **नारदेन** प्रतिपादिताः —

रक्तं पूर्णमलंकृतं प्रसन्नं व्यक्तं विकृतं श्लक्ष्णं समं सुकुमारं मधुरमिति गुणा गानस्य दशेति। एतादृशवीणायास्सर्वदेवतामयत्वेन दर्शनस्पर्शनादिकं महाफल-मित्युक्तम् —

दर्शनस्पर्शने चास्या भोगस्वर्गापवर्गदे। पुनाति विप्रहत्यादिपातकैः पतितं जनम् ॥

दण्डश्शंभुरुमा तन्त्रिः ककुभः कमलापतिः। इन्दिरा पत्रिका ब्रह्मा तुंबं नाभिस्सरस्वती ॥

दोरको वासुकिर्जीवा सुधांशुस्सारिका रविः। सर्वदेवमयी तस्माद्वीणेयं सर्वमङ्गला ॥

इति संगीतनिपुणैर्मुनिभिर्भरतादिभिः। वीणा प्रशंसिता तस्माच्छ्लाघनीयतमा मता ॥

धर्मार्थकाममोक्षाणामियमेव हि साधनम्। गायतो ब्राह्मणौ वीणागाथिनाविति च श्रुतौ ॥

अश्वमेधप्रकरणे वीणोक्ता धर्मसाधनम्। वीणानादानुरक्तेभ्यो राजभ्यो वैणिका जनाः॥
लभन्ते काङ्क्षितानर्थान् तस्माद्वीणार्थसाधनम्। कामयन्तेह गायन्तं स्त्रिय इत्युदितं श्रुतौ॥
गानस्य कामहेतुत्वं गानोत्पत्तिस्तु वीणया। वीणावादनतत्वज्ञः श्रुतिजातिविशारदः॥
तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति। इत्येवं याज्ञवल्क्येन वीणा मोक्षाय शंसिता॥
सा च रुद्रप्रियत्वेन रुद्रवीणेति गीयते॥ इति॥

याज्ञवल्क्यवचनस्यार्थः — महत्यादयो नानाविधा वीणाः। तदुक्तम् —

विश्वावसोस्तु बृहती तुंबुरोस्तु कलावती। महती नारदस्य स्यात्सरस्वत्यास्तु कच्छपी॥

इत्यादि। एतासां वीणानां मध्ये यस्याः कस्याश्चिद्वीणायाः भरतशास्त्रोक्तप्रकारेण यद्वादनं तन्त्रीषु ध्वनिविशेषकरणं तद्वीणावादनं, तस्य यत्तत्वं तानात्मकसंगीतप्रणवोच्चारणपूर्वकं तत्स्वरूपानुगुण्यसंपादनं तज्ज्ञ इत्यर्थः। संगीतप्रणवस्य तानरूपत्वं प्रतिपादितं **संगीतचिन्तामणौ** –

शृणुध्वं गीतशास्त्रस्य वच्मि प्रणवमादितः। यदज्ञानान्नष्टकुला नष्टश्रीका गतायुषः॥
क्लेशपाशशतं प्राप्ता नष्टबुद्धीन्द्रियप्रजाः। शोकदावाग्निसन्तप्ता लोकनिन्द्याः पुनःपुनः॥
पापेषु निरताः क्रूराः पुण्यदूरा हतव्रताः। अभ्यासो विफलं याति तस्य वीणासमुद्भवः॥
यज्ञदानफलं पुण्यं शीलं सौभाग्यमेव च। प्रयाति वैणिकस्साक्षात्पूर्णचन्द्र इवापरः॥
संगीतप्रणवं ज्ञात्वा महाविष्णुसमो भवेत्। संगीतप्रणवो ज्ञेयः महासौभाग्यवर्धनः॥

तकारश्च नकारश्चेत्युक्तं, तज्ज्ञः, श्रुतिजातिविशारदः निपुणः तालज्ञः मार्गतालदेशिकतालसंपन्नः विनैवायासं मोक्षं प्राप्नोति इति॥

प्लवङ्गमोदीरितकण्ठतालमित्यत्र नामैकदेशग्रहणे नामग्रहणमिति न्यायेन भीमो भीमसेन इतिवत् कण्ठतालशब्देन कण्ठाभरणाख्यतालप्रतिपादनद्वारा सर्वे तालाः प्रतिपाद्यन्ते। तत्र नृत्तगीतवाद्यप्रतिष्ठाभूमिः लघ्वक्षरोच्चारणादिक्रियापरिमितः तालः तल-प्रतिष्ठायामिति धातोर्धञि[ङि]स्मृतः।

गीतं नृत्यं तथा वाद्यं भाति ताले प्रतिष्ठितम्॥
संयोगे च वियोगे च तलयोरुभयोर्यदा।
वर्तते व्याप्तिमान् कालः स कालस्तालसंज्ञितः॥ इति।

उक्ततालस्याङ्गभूताश्च दश प्राणाः, प्राणा इव प्राणास्तालनिर्वर्तका इति यावत्। ते च दश। तदुक्तं **सङ्गीतरत्नाकरे** —

कालो मार्गः क्रियाङ्गानि ग्रहजातिकलालयाः। यतिः प्रस्तारकश्चेति तालप्राणा दश स्मृताः॥

तत्र कालः प्रसिद्धः। स च द्वादशविधः, क्षण, लव, निमेष, काष्ठा, कला, चतुर्भागानुद्रुत, बिन्दु, लघु, गुरु, प्लुत, पताक, भेदात्। तत्र शतपत्रपत्रशतस्य मध्ये सूच्या संभेदे क्रियमाणे यावान् कालः तावान् कालः क्षण इत्युच्यते। तादृशक्षणाष्टात्मकः कालो लव इत्युच्यते, तादृशलवाष्टात्मकः कालः काष्ठा, अष्टौ काष्ठा निमेषः, अष्टौ निमेषाः कला, कलाद्वयं चतुर्भागः, चतुर्भागद्वयं अनुद्रुतं, अनुद्रुतद्वयं च बिन्दुः, बिन्दुद्वयं च लघुः, लघुद्वयं च गुरुः, लघुत्रयं च प्लुतः, प्लुतचतुष्कं पताकमिति। तदुक्तमाकरे —

उपर्युपरि विन्यस्य पद्मपत्रशतं सकृत्। यः कालः सूचिसंभेदे सः क्षणः परिकीर्तितः॥
लवः क्षणैरष्टभिः स्यात् काष्ठा ह्यष्टौ लवात्मिका। अष्टौ काष्ठा निमेषः स्यान्निमेषैरष्टभिः कला॥
कलाभ्यां तु चतुर्भागश्चतुर्भागावनुद्रुतम्। अनुद्रुताभ्यां बिन्दुः स्याद्बिन्दुभ्यां तु लघुर्भवेत्॥
लघुद्वयं गुरुश्चैव त्रिलघुः प्लुत उच्यते। लघुचतुष्कं निश्शब्दमेतत्काकपदाभिधम्॥ इति।

एवं मार्गोऽपि षड्विधः—दक्षिण, वार्तिक, चित्र, चित्रतर, चित्रतम, अतिचित्रतमभेदात्। तत्र दक्षिणे मार्गे अष्टौ मात्राः कला इत्यादिलक्षणं विस्तरभयान्नेह प्रतिपाद्यते। तादृशमार्गगतत्वेन कर्णाट लाट गौड आन्ध्रादिदेशगतत्वेन च तालो द्विविधः। तत्र मार्गतालः चतुरश्रत्र्यश्रषट्पितापुत्रादिभेदेनानेकविधः। देशतालश्च आदितालप्रभृतिशार्ङ्गदेवसंज्ञकतालान्ताः विंशत्यभ्यधिकं शतं तालाः। तत्र कण्ठाभरणाख्यतालोऽपि प्रतिपादितः, गौरी सरस्वती कण्ठाभरणो लग्नसंज्ञक इति। तेषां लक्षणं विस्तरभयान्नेह प्रतिपाद्यते। अन्ये सप्ततालाः ध्रुव, मध्य, रूपक, जम्पा, त्रिकुट, अड्डतालयेकतालरूपाः सप्त प्रसिद्धास्तालाः। तदुक्तं **संगीतशास्त्रे** —

ध्रुवो मध्यो रूपकं च जम्पा त्रिकुटमेव च। अड्डताल्येकताली च सप्त तालाः प्रकीर्तिताः॥
इति। तत्र ध्रुवः षोडशविधः। तदुक्तं **संगीतरत्नाकरे** —
जयन्तश्शेखरोत्साहौ ततो मधुरनिर्मलौ। कुन्तलः केरलश्चारो नन्दनश्चन्द्रशेखरः॥
कामदो विजयाख्यश्च कन्दर्पजयमङ्गलौ। तिलको ललितश्चेति संज्ञास्तेषां क्रमादिमाः॥ इति

एवमन्येषां भेदास्तल्लक्षणानि च विस्तरभयान्नेह प्रतिपाद्यन्ते । एतादृशतालस्य फलमाह **शार्ङ्गदेवः** —

तकारश्शंकरः प्रोक्तः लकारश्शक्तिरुच्यते । शिवशक्त्यात्मकं तालं यो जानाति स तत्ववित् ॥
आदितालेन शृङ्गारे जयन्तो गीयते बुधैः । स नेतृश्रोतृगातॄणामायुःश्रीवर्धनो मतः ॥

इति तालनिरूपणम् ।

"आविष्कृतं मेघमृदङ्गनादैः" इत्यनेन मुरजवाद्यमुत्प्रेक्षितम् । तच्चानेकविधं, पटः, मद्दलः, हुडुक्का, करट्टं, घण्टा, सोडक्सः, ढक्का, कुडुक्का, रुंवः, डमरुः, डक्का, मड्डुः, डक्कुली, सल्लकः झल्लरी, घोणा त्रिवली, दुन्दुभिः भेरीनिस्सारणं इत्येवमादि-रूपम् । तत्र हस्तद्वयसम्मितायामं षष्ट्यंगुलमूलमध्यदेशं एकादशांगुलसम्मितदक्षिणमुखं दशांगुलसम्मितवाममुखम् । तदुक्तं **संगीतरत्नाकरे** —

सार्धहस्तद्वयं तस्य दैर्घ्यं स्यात्परिधिः पुनः । षष्ट्यंगुलो मध्यदेशः पृथुलो दक्षिणं मुखम् ॥
कर्तव्यं सम्मितं सार्धैरेकादशभिरंगुलैः । वामं तु दशभिस्सार्धैः समितं दक्षिणं मुखम् ॥ इति ।

क्वचित्प्रनृत्तैः क्वचिदुन्नदद्भिः क्वचिच्च वृक्षाग्रनिषण्णकायैः ।
व्यालम्बबर्हाभरणैर्मयूरैर्वनेषु सङ्गीतमिव प्रवृत्तम् ॥

अत्र नृत्यन्तो मयूरा नर्तका इव भवन्ति । उन्नदन्तो मयूराः गायका वादका इव च भवन्ति । वृक्षाग्रनिषण्णकायाश्च मयूराः उच्चस्थानस्थितसभानायका इव भवन्ति । व्यालम्बबर्हाभरणैरित्यनेन सभानायकेन नर्तकादिभिश्चालंकृतैर्भवितव्यमिति सूचितम् । अत्र क्वचित्प्रनृत्तैरित्यनेन नर्तनं सूचितम् । तच्च गात्रविक्षेपादिरूपम् । तत्त्रिविधं, नाट्यं, नृत्यं, नर्तनं चेति । तदुक्तं **भावप्रकाशे** —

तदपि त्रिविधं नाट्यनृत्यनृत्तप्रभेदतः । आंगिकाद्यैरभिनयैर्वाक्यार्थाभिनयात्मकम् ॥
रसभावसमायुक्तं तन्नाट्यं परिचक्षते । भावाविर्भावसुभगं पदार्थाभिनयात्मकम् ॥
गात्रविक्षेपणं यत्र तन्नृत्यमिति गीयते । तन्नृत्तं स्याद्गीतवाद्यमिलत्ताललयाश्रयम् ॥
उदाराभिनयं यत्र गात्रविक्षेपणं यदि । इति ।
एतत्त्रयं द्विधा भिन्नं लास्यताण्डवसंज्ञया । सुकुमारं तयोर्लास्यमुद्धतं ताण्डवं विदुः ॥
चतुर्विधं तच्च लास्यं कुण्डलीदण्डरासकम् । करणांश्चैव तत्रापि तत्तद्देशानुसारतः ॥

शार्ङ्गदेवस्तु नाट्यं, नृत्यं, नृत्तमिति भेदत्रयमङ्गीकृत्य नाट्य, नृत्य, नृत्तानां

प्रकारान्तरेण लक्षणमाह। तत्र वाक्यार्थपदार्थाभिनयात्मकं आंगिकाभिनयमात्रोपेतं गात्रचलनं नाट्यम्। आंगिक, वाचिकाहार्थ सात्विक, चतुष्टयात्मकं गात्रचलनं नृत्यम्। गात्रचलनमात्रं नृत्तम्। तत्रैकैकं द्विविधं लास्यताण्डवभेदात्। तत्र कोमलकरणाङ्गविक्षेपकैशिकवृत्तिप्रधानं मकरध्वजवर्धनं स्त्रीकर्तृकं गात्रचलनं लास्यम्। उद्धतकरणाङ्गविक्षेपारभटीवृत्तिप्रधानं ताण्डवम्। आंगिकः अंगैर्विनिर्मितो व्यापारविशेषः। नायकादिगततत्तद्व्यापारसूचकशब्दविशेषो वाचिकः। अनुकार्यतत्तन्नायकादिगतहारकेयूरकिरीटालङ्कारादिभूषणमाहार्यः। सात्विकैरन्तःकरणव्यापारविशेषैर्विरचितः सात्विकः। तदुक्तं **संगीतरत्नाकरे**-

नाट्यं, नृत्यं, तथा नृत्तं त्रेधा तु परिकीर्तितम्। चतुर्धाभिनयोपेतं लक्षणावृत्तितो बुधैः ॥
नाटकस्थितवाक्यार्थपदार्थाभिनयात्मकम्। नाट्यं तन्नाटकेष्वेव प्रयुक्तं तद्धतार्थवत् ॥
विहाय त्रीनभिनयानाँगिकोत्र विधीयते। आंगिको वाचिकस्तद्वत् आहार्यः सात्विकोऽपरः ॥
चतुर्धाभिनयस्तत्र ह्यांगिकोंगैर्विनिर्मितः। वाचा विरचितः काव्यनाटकादिषु वाचकः ॥
आहार्यो हारकेयूरकिरीटादिविभूषणम्। सात्विकः सात्विकैर्भावैर्भावुकेन विभावितः ॥
लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम्। तद्रिक्तमुद्धतं प्रायः प्रयोगं ताण्डवं विदुः ॥ इति।

नर्तनारंभवेलायां पात्राणां प्रवेशे विशेषमाह **नन्दिकेश्वरः**—

नायकाभिमुखं पात्रं प्रविशेद्रङ्गमन्दिरम्। प्रवेशे दक्षिणे भागे मार्दलीकः प्रतिष्ठितः ॥
वामपार्श्वे मार्दलीकः वंशशंखे तु दक्षिणे। तद्दक्षिणे करटिका तत्पृष्ठे गायकाः स्मृताः ॥
गायकानां ततः पश्चात्काहलीक्रमतालकः ॥ इति।

एतादृशनृत्तस्य फलमुक्त **नन्दिकेश्वरेण**—

द्रष्टव्ये नाट्यनृत्ये ते सर्वकाले विशेषतः। नृत्तं त्वल नरेन्द्राणामभिषेके महोत्सवे ॥
श्रुतार्थिभिः प्रयोक्तव्यं माङ्गल्यं सर्वकर्मसु ॥ इति।

क्वचिदुन्नदद्भिरित्यनेन शारीरं गानं सूचितम्। तच्च गानं नादोत्पत्तिक्रमेणोत्पद्यते। प्रथमं विवक्षमाणेनात्मना प्रेरितं मनः जाठरं वह्निमाहन्ति, स च वायुं प्रेरयति। स च वायुर्मूलाधारे स्थितः क्रमादूर्ध्वस्थाने संचरन् नाभिहृदयकण्ठमूर्धास्यरूपेषु स्थानेषु ध्वनिमाविर्भावयति। स एव ध्वनिर्नाद इत्युच्यते। स चातिसूक्ष्म, सूक्ष्म पुष्टापुष्ट, कृत्रिमभेदेन क्रमान्नाभ्यादिस्थानेषु स्थितः पञ्च संज्ञा धत्ते। एवं व्यवहारकाले नादस्त्रिविधः। मन्द्रो मध्यस्तारश्चेति। हृदि मन्द्रः, मध्यः कण्ठे, मूर्ध्नि तारः,। स च पूर्वपूर्वध्वन्यपेक्षया उत्तरोत्तरो द्विगुणध्वनिः। तदुक्तं **भरतशास्त्रे**—

आत्मा विवक्षमाणो हि मनः प्रेरयते मनः। देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम्।
ब्रह्मग्रन्थिगतस्सोथ क्रमादूर्ध्वपदे चरन्। नाभिहृत्कण्ठमूर्धास्ये त्वाविर्भावयति ध्वनिम्॥
नादोतिसूक्ष्मस्सूक्ष्मश्च पुष्टोपुष्टश्च कृत्रिमः। इति पञ्चाभिधा धत्ते पञ्चस्थानस्थितः क्रमात्॥
व्यवहारे त्वसौ त्रेधा हृदे मन्द्रोऽभिधीयते। कण्ठे मध्यो मूर्ध्नि तारः द्विगुणश्चोत्तरोत्तरः॥

तस्य नादस्य द्वाविंशतिश्रुतयो हृदयस्योपरिप्रदेशे विद्यमानासु नाडीषु द्वाविंशति-संख्यासु वायुनाभिहतासु श्रुतय उत्तरोत्तरोच्चतरा जायन्ते। तदुक्तं **संगीतरत्नाकरे**—
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः। हृद्यूर्ध्वनाडीसंलग्नाः नाड्यो द्वाविंशतिर्मताः॥
तिर्यञ्चस्तासु तावृत्त्यः श्रुतयो मारुताहते। उच्चोच्चतरतायुक्ताः प्रभवन्त्युत्तरोत्तरम्॥
एवं कण्ठे तथा शीर्षे श्रुतिर्द्वाविंशतिर्मता।

तासां श्रुतीनां पञ्च जातयः। दीप्ता आयता करुणा मृदुर्मध्येति। तत्र दीप्ता चतुर्विधा—तीव्रा, रौद्री, वज्रिका उग्रा चेति। एवमायता पञ्चविधा— कुमुद्वती, क्रोधा, प्रसारिणी, सन्दीपिनी, रोहिणी इति। करुणापि त्रिविधा—दयावती, आलापिनी, मदंतिका चेति। मृदुश्चतुर्विधा, मन्दा चरतिका प्रीतिः—क्षितिरिति। मध्या षड्विधा—छन्दोवती रंजनी, रक्तिका, मार्जनी, रम्या, क्षोभिणी इति। तदुक्तं **संगीतरत्नाकरे**—

दीप्ता[प्ता]यता च करुणा मृदुर्मध्येति जातयः।
तीव्रा रौद्री वज्रिकोग्रेत्युक्ता दीप्ता चतुर्विधा॥
कुमुद्वत्यायताख्या च क्रोधा चापि प्रसारिणी। सन्दीपिनी रोहिणी च भेदाः पञ्चेति कीर्तिताः॥
दयावती तथालापिन्यथ प्रोक्ता मदन्तिका। त्रयस्ते करुणाभेदा मृदोर्भेदचतुष्टयम्॥
मन्दा चरतिका प्रीतिः क्षितिर्मध्या तु षड्विधा। छन्दोवती रंजिनी च रक्तिका मार्जनी तथा॥
रम्या च क्षोभिणीत्यासामथ ब्रूमः स्वरस्थितिम्॥ इति।

एतासु श्रुतिषु षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाख्याः सप्त स्वराः समुत्पद्यन्ते। तत्र तीव्रा कुमुद्वती छन्दोवती संज्ञकासु श्रुतिषु चतसृषु षड्जः समुत्पद्यते, दयावतीरक्तिकारञ्जन्याख्यासु तिसृषु श्रतिषु ऋषभः संजायते। रौद्रीक्रोधाख्ययोः श्रुत्योः गान्धारः समुपद्यते। वज्रिकाप्रसारिणीप्रीतिमार्जनाख्यासु चतसृषु श्रुतिषु धैवतः, उग्राक्षोभिण्योः द्वयोः श्रुत्योः निषादः सञ्जायते। तदुक्तं **सङ्गीतरत्नाकरे**—
दीप्तायता ऋजुर्मध्या षड्जा स्यादृषभे पुनः। संस्थिता करुणा मध्या मृदुर्गान्धारके पुनः॥

दीप्तायते मध्यमे ते मृदुमध्ये च संस्थिताः । मृदुर्मध्यायताख्या च करुणा पञ्चमे स्थिताः ॥
करुणा चायता मध्या धैवते सप्तमे पुनः । दीप्ता मध्येति तासां च जातीनां ब्रूमहे भिदाम् ॥
तीव्रा कुमुद्वती मन्दा छन्दोवत्यस्तु षड्जगाः । दयावती रंजिनी च रक्तिका ऋषभे स्थिताः ॥
रौद्री क्रोधा च गान्धारे वज्रिकाथ प्रसारिणी। प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ॥

मध्यमस्वरमाश्रिता इत्यर्थः ।

क्षिती रक्ता च सन्दीपिन्यालापिन्यथ पञ्चमे । मदंती रोहिणी रम्येत्येतास्तिस्रस्तु धैवते ॥

उग्रा च क्षोभिणीति द्वे निषादे भवतः श्रुती ।

तत्र षड्भ्यो जायत इति षड्जः । तदुक्तं **नारदेन** —

नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संस्पृशन् ।
षड्भिः सञ्जायते यस्मात्तस्मात् षड्ज इति स्मृतः ॥

ऋषति हृदयं गच्छति प्राप्नोतीति ऋषभः, ऋषभस्वरसम्पादितत्वाद्वा ऋषभः । तदुक्तम् —

गावो रंगन्ति चार्षभम् ।

गां वाचं धरतीति गान्धारः । गान्धाराः जनपदाः, तदधिष्ठितैर्जनैर्गीयत इति गान्धारः । स्वराणां मध्यमे स्थाने स्थितत्वान्मध्यमः, पञ्चस्थानस्थितत्वात्पञ्चमः । धीमद्भिर्गीयत इति धैवतः । निषीदन्ति स्वरास्सर्वे अस्मिन्निति निषादः । तदुक्तं **नारदेन** —

वायुस्समुत्थितो नाभेः कण्ठं शीर्षसमाहतः । नादो ऋषभवद्यस्मात्तस्मादृषभ उच्यते ॥
वायुस्समुत्थितो नाभेः कण्ठशीर्षसमावृतः । नासागन्धवहः पुण्यः गांधारस्तेन हेतुना ॥
वायुस्समुत्थितो नाभेरुरोहृदि समाहतः । नाभिं प्राप्तो महानादः मध्यमत्वं समश्नुते ॥
वायुस्समुत्थितो नाभेरुरोहृत्कण्ठरोहतः । पञ्चस्थानोत्थितस्तस्मात्पञ्चमत्वं विधीयते ॥
धैवतं च निषादं च वर्जयित्वा स्वरद्वयम् । शेषान्पञ्चस्वरांस्त्वन्यान्पञ्चस्थानोत्थितान्विदुः ॥

इति । ते च स्वरा द्विविधाः शुद्धा विकृताश्चेति । तत्र शुद्धषड्जः, शुद्धऋषभः, शुद्धगान्धारः, शुद्धमध्यमः, शुद्धपञ्चमः, शुद्धधैवतः, शुद्धनिषाद, इति । विकृतषड्जः द्विविधः च्युतोच्युतः । मध्यमोपि द्विविधः च्युतोऽच्युतश्चेति । पञ्चमोपि द्विविधः च्युतोऽच्युतश्चेति । गान्धारोऽपि द्विविधः, साधारणगान्धारः, अंतरगान्धारश्चेति ।

निषादोऽपि द्विविधः, काकलिनिषादः कैशिकनिषादश्चेति। ऋषभश्चतुःश्रुतिरेक एव विकृतः। धैवतोऽपि चतुःश्रुतिरेको विकृतः। तत्र तीव्रा कुमुद्वती मन्दा छन्दोवतीरूपस्वाधारश्रुतिचतुष्टयापेक्षया अधिकर्षभस्वराधारभूतदयावतीरंजनीरूपश्रुतिद्वयाश्रितः अच्युतषड्जः। कुमुद्वतीतीव्रारूपश्रुतिद्वयं परित्यज्य मन्दाछन्दोवतीरूपस्वाधारश्रुतिद्वयं ऋषभाधारभूतं दयावतीरंजनीरूपश्रुतिद्वयं चाश्रितः च्युतषड्जः। ऋषभः स्वाश्रयीभूतदयावतीरंजनीरक्तिकारूपश्रुतित्रयापेक्षया षड्जाधारभूतस्वसमीपवर्तिछन्दोवतीसंज्ञकश्रुत्याश्रितः ऋषभश्चतुःश्रुतिः। एको विकृतः गान्धारः रौद्रीक्रोधरूपस्वाधारश्रुतिद्वयापेक्षया वज्रिकारूपमध्यमाधारभूतश्रुतिमाश्रितः साधारणगान्धारः। गान्धार एव वज्रिकाप्रसारिणीरूपमध्यमाधारभूतश्रुतिद्वयाश्रितः अंतरगान्धारः। मध्यमः स्वाधिकरणीभूतवज्रिकाप्रसारिणीप्रतिमार्जनीरूप श्रुतिचतुष्टयापेक्षया स्वसमीप वर्ति पञ्चमस्वराधारभूत क्षितिरक्तारूपश्रुतिद्वयाश्रितोऽच्युतमध्यमः। स एव वज्रिकाप्रसारिणीरूपस्वाधारभूतश्रुतिद्वयं परित्यज्य क्षितिरक्तारूपपंचमस्वराधारभूतश्रुतिद्वयमाश्रितः च्युतमध्यमः। पंचमस्वरः, स्वाधारभूतक्षितिरक्तासन्दीपिन्यालापिन्याख्यश्रुतिषु मध्ये आलापिन्याख्यश्रुत्या हीनः मध्यमग्रामसमाश्रितः त्रिश्रुतिरेको विकृतः, कैशिकाश्रितश्च। मध्यमस्वराधारभूतस्वानन्तरमार्जन्याख्यश्रुत्याश्रितः चतुःश्रुतिरेकः मध्यमग्रामसमाश्रितः धैवतः। स्वाधारभूतमन्दतीव्रारोहिणीरम्यारूपश्रुत्यपेक्षयाधिकमध्यमग्रामाश्रित आलापिन्याख्यश्रुत्या समाहितः चतुःश्रुतिरेकः। निषादः उग्राक्षोभिणीरूप स्वाधार श्रुतिद्वयापेक्षया षड्जाधारभूत तीव्राख्यश्रुतिमाश्रितः कैशिकनिषादः त्रिश्रुतिरेकः। स एव पूर्वोक्तश्रुतित्रयाधिक कुमुद्वतीरूप षड्जाधारश्रुतिमाश्रितश्चतुःश्रुतिरेकः काकलिनिषाद इति। तदुक्तं **सङ्गीतरत्नाकरे** षड्जादिस्वरानधिकृत्य —

त एव विकृतावस्था द्वादश प्रतिपादिताः। च्युतोऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत्॥
साधारणे काकलित्वे निषादस्य च दृश्यते। साधारणे श्रुतिं षड्जमृषभः संश्रितो यदा॥
चतुःश्रुतित्वमायाति तदैको विकृतो भवेत्। साधारणे त्रिश्रुतिः स्यादंतरित्वे चतुःश्रुतिः॥
गान्धार इति तद्भेदौ द्वौ निश्शङ्केन वर्तितौ। मध्यमः षड्जवद्वेधान्तरे साधारणाश्रयात्॥
पञ्चमो मध्यमग्रामे त्रिश्रुतिः कैशिकी पुनः। मध्यमस्य श्रुतिं प्राप्य चतुःश्रुतिरिति द्विधा॥
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः। कैशिके काकलित्वे च निषादस्त्रिचतुःश्रुतिः॥

ते शुद्धैस्सप्तभिस्सार्धं भवन्त्येकोनविंशतिरिति।

ननु चतुर्थ्यां श्रुतौ षड्जः, सप्तम्यामृषभः, नवम्यां गान्धारः, त्रयोदश्यां मध्यमः, सप्तदश्यां पञ्चमः विंश्यां धैवतः, द्वाविंश्यां श्रुतौ निषाद इत्युक्तमभिनवभरताचार्येण —

तत्र तुर्यश्रुतौ षड्जः सप्तम्यामृषभो मतः । ततो नवम्यां गान्धारस्त्रयोदश्यां तु मध्यमः ॥
पञ्चमस्सप्तदश्यां तु विंश्यां स्थाप्यस्तु धैवतः ।
द्वाविंश्यां तु श्रुतौ स्थाप्यो निषादः कथ्यते स्वरः, ॥ इति ।

तथाचैकैकस्य स्वरस्य अनेकश्रुत्याधारत्वप्रतिपादनमनुपपन्नमिति चेन्न, "तत्र तुर्यश्रुतौ षड्ज" इति पूर्वोदाहृतवचनानां पूर्वश्रुतिमपेक्ष्यैव षड्जादिस्वराणां चतुर्थ्यादिश्रुत्याधारत्वप्रतिपादनेन विरोधाभावात्, अन्यथा तुर्यश्रुतौ षड्ज इत्यादौ संख्यापूरणार्थकप्रत्ययानुपपत्तेः । प्रत्युत अभिनवभरताचार्येणैव —

द्वाभ्यां निषादगान्धारौ तिसृभ्यो धैवतर्षभौ ।
चतसृभ्यः श्रुतिभ्यः स्युः षड्जपञ्चममध्यमाः ॥

इति वचनेन षड्जादिनिषादान्तानां सप्तानां स्वराणामनेकश्रुत्याश्रितत्वप्रतिपादनेन पूर्वोक्तवचनानामपि पूर्वपूर्वश्रुतिमपेक्ष्यैव चतुर्थ्यादिश्रुत्याश्रयत्वप्रतिपादनपरत्वमिति न किंचिदनुपपन्नम् । एवं प्रतिपादितेषु सप्तसु स्वरेषु त्रयो ग्रामाः, षड्जग्रामो मध्यमग्रामो, गान्धारग्रामश्चेति । ग्रामो नाम षड्जादिनिषादान्तानां सप्तानां स्वराणां समूहः, मूर्छना, शुद्धतान, कूटतानादीनामाश्रयः । तदुक्तं शार्ङ्गदेवेन --

'ग्रामः स्वरसमूहः स्यान्मूर्छनादेस्समाश्रयः, इति । तत्र षड्जग्रामो नाम पञ्चमः स्वरः आलापिन्याख्यस्वाधारभूतचतुर्थश्रुतौ वर्तते तदा षड्जग्रामः । पञ्चमस्वर एव सन्दीपिन्याख्यायां स्वाधारभूतायां तृतीयस्यां श्रुतौ यदा वर्तते तदा मध्यमग्रामः । यदा गान्धारः स्वपूर्वभाविऋषभस्वराधारभूतां रक्तिकाख्यां श्रुतिमधिष्ठितस्सन् स्वोत्तरभाविमध्यमस्वराधारभूतां यञ्चिकाख्यां श्रुतिमाश्रयते तदा गान्धारग्रामः । तदुक्तमाकरे —

ग्रामः स्वरसमूहः स्यान्मूर्छनादेः समाश्रयः । षड्जग्रामः पञ्चमे स्वचतुर्थश्रुतिसंस्थिते ॥
स्वोपान्त्यश्रुतिसंस्थेऽस्मिन् मध्यमग्राम इष्यते । रिमयोः श्रुतिमेकैकां गान्धारश्चेत्समाश्रितः ॥
पश्रुतिं धोनिषादस्तु धश्रुतिं सश्रुतिं श्रितः । गान्धारग्राममाचष्टे तदा तन्नारदो मुनिः ॥
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदितः । द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ॥
प्रवर्तते स्वर्गलोके ग्रामोसौ न महीतले ॥ इति ।

असौ गान्धारग्राम इत्यर्थः। एतेषां ग्रामाणां ब्रह्मविष्णुमहेश्वरास्त्रयो देवाः हेमन्तग्रीष्मवर्षाश्च कालाः। तत्रापि पूर्वाह्णमध्याह्नापराह्णरूपा विशेषकालाः। तदुक्तं **सङ्गीतरत्नाकरे—**

क्रमाद्ग्रामत्रये देवा ब्रह्मविष्णुमहेश्वराः। हैमन्तग्रीष्मवर्षासु गातव्यास्ते यथाक्रमम् ॥

पूर्वाह्णकाले मध्याह्ने पराह्णेभ्युदयार्थिभिः ॥ इति।

तत्र ग्रामाश्रिता मूर्छना नाम षड्जादिनिषादान्तानां स्वराणामारोहावरोहरूपा। सा च मूर्छना एकैकस्मिन् ग्रामे सप्तविधा। तत्र षड्जग्रामे, रजनी उत्तरायता शुद्धा, षड्जा, मत्सरीकृत् अश्वक्रान्ता अभिरुद्गता इति सप्त मूर्छनाः। मध्यमग्रामेऽपि सौवीरी, हरिणाश्वा, कलोपनता, शुद्धा, मध्या मार्गा, पौरवी, हृष्यकेति सप्त मूर्छनाः। गान्धारग्रामेऽपि नन्दा, विशाला, सुमुखी, चित्रा, चित्रवसुखा, आलापा इति सप्त मूर्छनाः। षड्जग्राममूर्छना मध्यमग्राममूर्छनाश्च भूलोके प्रयोक्तव्याः। तत्र षड्जग्राममूर्छनानां प्रत्येकमेकैकस्याश्चातुर्विध्ये सति षट्पञ्चाशन्मूर्छनाः सम्पद्यन्ते। तासां च प्रत्येकं साप्तविध्ये सति द्वानवत्यधिकं त्रिशतं मूर्छनाः सम्पद्यन्ते। तासामपि काश्चन मूर्छनाः शुद्धतानसंज्ञकाः कूटतानसंज्ञकाश्चेति द्विविधाः। तदुक्तम् —

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम्। मूर्छनेत्युच्यते ग्रामद्वये तास्सप्त सप्त च ॥

षड्जे तूत्तरमन्द्रादौ रजनी चोत्तरायता। शुद्धा षड्जा, मत्सरीकृत् अश्वक्रान्ताभिरुद्गता ॥

मध्यमे स्यात्तु सौवीरी हरिणाश्वा ततः परा ॥

स्यात्कलोपनता शुद्धा मध्या मार्गा च पौरवी। हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते ॥

मध्यस्थानस्थषड्जेन मूर्छना लभ्यतेऽग्रिमा। अधस्तनैर्निषादाद्यैः षडन्या मूर्छनाः क्रमात् ॥

मध्यमध्यममारभ्य सौवीरी मूर्छना भवेत्। षडन्यास्तदधोधस्थस्वरानारभ्य तु क्रमात् ॥

षड्जस्थानस्थितैन्याद्यैरजन्याद्याः परे जगुः। हरिणाश्वादिकागाद्यैर्मध्यमस्थानसंश्रितैः ॥

षड्जादीन्मध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात्।
चतुर्धा ताः क्रमाच्छुद्धाः काकलीकलितास्तथा ॥

सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः। प्रथमादिस्वरारंभादेकैका सप्तधा भवेत् ॥

तासूच्चार्यान्त्यस्वरान्तान् पूर्वांतुच्चारयेत्क्रमात्। ते क्रमास्तेषु संख्या स्याद्द्वानवत्या शतत्रयम् ॥

नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा।
आलापा चेति गान्धारे ग्रामे स्युः सप्त मूर्छनाः ॥

ताश्च स्वर्गे प्रयोक्तव्या विशेषास्तेन नोदिताः ॥ इति ।

चतुर्दण्डिप्रकाशिकायां तु प्रकारान्तरेण मूर्छनास्वरूपं प्रतिपादितम् --

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् । मूर्छनेत्युच्यते तास्तु प्रतिमेलं च सप्तधा ॥
तथाहि षड्जमारभ्य निषादान्ताधिरोहणात् । निषादादिषु षड्जान्तावरोहान्मूर्छनादिमाः ॥
एवं ऋषभमारभ्य षड्जान्तमधिरोहणात् । षड्जादि ऋषभान्तं चावरोहेण द्वितीयका ॥
एवमेव समुन्नेया गान्धारादिस्वरेष्वपि । अतः प्रतिस्वरं तावदेकैका मूर्छना भवेत् ॥
आहत्य वक्ष्यमाणेषु द्विसप्ततिविधेष्वपि । सप्तस्वरसमूहात्मा मेलेषु प्रतिमेलकम् ॥
मूर्छनास्सप्तसप्तेति, इति ।

एवं मूर्छनास्वरूपमुक्तम् । गमकस्वरूपं च तत्रैवोक्तम्—श्रोतृचित्तसुखसंपादनैकतानः स्वरस्य यः कम्पः स गमकः, स च पञ्चदशविधः— निरूप, स्फुरित, कंपित, लीन, आन्दोलित, वलि, त्रिभिन्न, कुरल, आहत, उल्लासित, प्लावित हुंभित, मुद्रित, नामित मिश्रित भेदात् । तदुक्तं **चतुर्दण्डिप्रकाशिकायाम्** —

स्वरस्य कम्पो गमकः श्रोतृचित्तसुखावहः । स्वीयस्थानश्रुतिगतछायामन्याश्रयामपि ॥
छायां गमयतीत्येष गमकः परिकीर्तितः । ते च पञ्चदश प्रोक्ता गमका भरतादिभिः ॥
निरूपः स्फुरितश्चैव कम्पितो लीन इत्यपि । आन्दोलितो वलिश्चाथ त्रिभिन्नकुरलाहतौ ॥

उल्लासितः प्लावितश्च कुंभितो मुद्रितस्तथा ।
नामितो मिश्रितश्चेति भेदाः पञ्चदश स्मृताः ॥ इति ।

तेषां लक्षणानि विस्तरभिया नेह प्रतिपादितानि । एवं स्थाय्यादीनां स्वरूपमपि विस्तरभयान्नेह प्रतिपादितम् । एतादृशगीतिः पञ्चविधा शुद्धा भिन्ना गौडी वेसरा साधारण-भेदात् । तदुक्तं **शार्ङ्गदेवेन** —

गीतयः पञ्चधा शुद्धा भिन्ना गौडी च वेसरा । साधारणीति शुद्धा स्यादवक्रैर्ललितैः स्वरैः ॥
भिन्ना सूक्ष्मैः स्वरैर्वक्रैर्मधुरैर्गमकैर्युता । गौडी त्रिस्थानगमकैरोहटी ललितैः स्वरैः ॥
वेगवद्भिः स्वरैर्वर्णचतुष्केप्यतिरक्तितः । वेगस्वराश्रिता गीतिर्वेसरा चोच्यते बुधैः ॥

चतुर्गीतिगतं लक्ष्म श्रिता साधारणी मता ॥ इति ।

एवमुक्तानां गीतिसन्दर्भरूपाणां सप्तानां स्वराणां समूहो रागः श्रोतृचित्तानु-रंजनसम्पादनसमर्थानुपूर्वीविशेषनिष्पाद्यो नानाप्रकारः सम्भवति । ग्रामरागा, उपरागा,

भाषारागाः वैभाषिका अंतरभाषाख्याश्चेति शुद्धादिगीतियोगेन पञ्चधा भवन्ति । तदाह **शार्ङ्गदेवः** —

शुद्धादिगीतियोगेन रागाश्शुद्धादयो मताः, ॥ इति ।

तत्र ग्रामरागस्त्रिंशद्विधः । शुद्धाख्याः सप्त, भिन्नपदसंज्ञाश्च पञ्च, त्रयो गौडाख्याः, अष्टौ वेसराख्याः । सप्त साधारणाः आहत्य त्रिंशद्रागाः सम्पद्यन्ते । एवमन्येषामपि रागाणां भेदा विस्तरभयान्नेह प्रतिपाद्यन्ते । एतादृशरागगानकर्ता चतुर्विधः वाग्गेयकारः स्वरादिः गान्धर्वः, गायनश्चेति । तेषां लक्षणान्युक्तानि **संगीतरत्नाकरे** —

वाङ्मात्रं रुच्यते गेयं धातुरित्यभिधीयते । वाचं गेयं च कुरुते यस्स वाग्गेयकारकः ॥
शब्दानुशासनज्ञानमभिधानप्रवीणता । लयतालतलाज्ञानं विवेकोनेककाकुषु ॥
देशिरागेष्वभिज्ञत्वं वाक्पटुत्वं सभाजयः । परचित्तपरिज्ञानं प्रबन्धेषु प्रगल्भता ॥
त्रिस्थानगमकप्रौढिर्विविधालप्तिनैपुणम् । अवधानं गुणैरेभिर्वरवाग्गेयकारकः ॥

अथ गान्धर्वः— मार्गं देशं च यो वेत्ति स गान्धर्वोऽभिधीयते ।

अथ स्वरादिः — यो वेत्ति केवलं मार्गं स्वरादिस्स निगद्यते ।

अथ गायनः—हृद्यशब्दस्सुशारीरो ग्रहमोक्षविचक्षणः ।
राग रागाङ्ग भाषाङ्ग क्रियाङ्गोपाङ्ग कोविदः ॥

इत्येवमादिभिर्गुणैर्लक्षितो गायनः पञ्चविधः । तदुक्तं **सङ्गीतरत्नाकरे** —

शिक्षाकारोनुकारश्च रसिको रञ्जकस्तथा । भावकश्चेति गीतज्ञाः पञ्चधा गायनं जगुः ॥

भावको नाम गीतस्य अतिशयपोषणं स्वमनसापि भावयतीति गीतिपोषकः । तच्च पोषणं शारीरेणापि प्रसाध्यम् । तच्च शारीरमुक्तं **शार्ङ्गसूरिणा** —

रागाभिव्यक्तिशक्तत्वमनभ्यासेऽपि यद्ध्वनेः । तच्छारीरमिति प्रोक्तं शरीरेण सहोद्भवात् ॥
तारानुध्वनिमाधुर्यव्यक्तिगाम्भीर्यमार्दवैः । घनता स्निग्धता कान्तिप्राचुर्यादिगुणैर्युतम् ॥ इति ।

एतच्च शारीरं पुण्यवतः पुंसः स्वत एव भवतीत्युक्तं **निश्शङ्कदेवेन** —

विद्यादानेन तपसा भक्त्या वा पार्वतीपतेः । प्राग्जन्मभाग्यविभवैस्सुशारीरमवाप्यते ॥ इति ।

एवं च सङ्गीतसाहित्योभयधारको वाग्गेयकारकः, मार्गदेशोभयप्रस्थानवेदी गान्धर्वः, मार्गप्रमाणमात्रनिरतः स्वरादिः, श्रोतृचित्तरंजनैकतानशेमुषीसमुद्दीपकशारीरसम्पन्नो गायनश्चतुर्थ इति विवेकः ॥

"व्यालम्बबर्हाभरणैर्मयूरै" रित्यनेन सभानायकेन नर्तकादिभिश्च अलंकृतै-र्भवितव्यमिति सूचितम्। तदुक्तं **सङ्गीतरत्नाकरे** —

शृङ्गारी भूरिदो मानी सर्वालङ्कारभूषितः। श्रीमान्गुणालयश्चापि ग्राहकः कौतुके रतः ॥
वाग्मी निर्मत्सरो नर्मनिर्माणनिपुणस्सुधीः। गम्भीरभावः कुशलः सकलासु कलासु च ॥
समस्तशास्त्रविज्ञानसम्पन्नः कीर्तिलोलुपः। प्रियवाक्यरतस्तज्ज्ञो मेधावी धारणान्वितः ॥
तुर्यलयविशेषज्ञः पारितोषिकदानवित्। सर्वोपकरणोपेतो देशिमार्गविभागवित् ॥
हीनाधिकविभागज्ञः प्राज्ञो मध्यस्थ धीरधीः। स्वाधीनपरिवारश्च भावको रसनिर्भरः ॥
सत्यवादी कुलीनश्च प्रसन्नवदनोऽत्वरः। स्थिरप्रेमा कृतज्ञश्च करुणावरुणालयः ॥
धर्मिष्ठः पापभीरुश्च विद्वद्बन्धुः सभापतिः। वाग्मी सुरूपवेषोसौ गुरुषु स्तुतिकोविदः ॥
सभासु परिहासज्ञो भवेद्वादनवाद्यवित् ॥ इति ॥

"वृक्षाग्रनिषण्ण" इत्यनेन उच्चस्थानस्थिता सभा सूचिता। सभास्वरूपं चोक्तं **सङ्गीतरत्नाकरे** —

विचित्रनृत्तशाला स्यात्पुष्पप्रकरशोभिता। नानावितानसंपन्ना रत्नस्तम्भविभूषिता ॥
तस्यां सिंहासनं रम्यमध्यासीत सभापतिः। वामतोन्तःपुराणि स्युः प्रधानं दक्षिणेन तु ॥
पृष्ठभागे प्रधानानां कोशश्रीकरणाधिपः। तत्सन्निधौ तु विद्वांसो लोकवेदविशारदाः ॥
रसिकाः कवयोऽप्यत्र चतुराः सर्वरीतिषु। मान्यान्ज्योतिर्विदो वैद्यान्विद्वन्मध्ये निवेशयेत् ॥
स्याद्वामेतराभागे तु मन्त्रिणां पुरमण्डलम्। तत्रैव सैन्यमान्यानामन्येषामुपवेशनम् ॥
विलासिनो विलासिन्यः परितोंतःपुरस्य च। पुरतोऽपि नृपस्य स्युः पृष्ठभागे तु भूपतिः ॥
चारुचामरधारिण्यो रूपयौवनसंभृताः। स्वकङ्कणरणत्कारनिर्वाणजनमानसाः ॥
— अग्रिमा वामभागे स्युः अग्रे वाग्गेयकारकाः।
कथका वन्दिनश्चात्र विद्यावन्तः प्रियंवदाः ॥
प्रशंसाकुशलाश्चान्ये विचराः सर्वदा नृषु। ततः परंतु परितः परिवारोपसेवनम् ॥
अधिष्ठितं सदः कार्यं दक्षैर्वेत्रधरैर्वरैः। असंरक्षास्तु तिष्ठेयुः सर्वतः शस्त्रपाणयः ॥
सन्निवेश्य सभामेनां नेता सङ्गीतवीक्षणे ॥ इति।

अत्रापरिमितगायकवादकादिसमुदायनिष्पाद्यत्वप्रतिपादनात् वृन्दगानं सूचितम् ॥ वृन्दगानलक्षणं चोक्तं **शार्ङ्गदेवेन** —

गात्रवादकसंघातो वृन्दमित्यभिधीयते ॥ इति ।

तच्च वृन्दं पञ्चविधं, उत्तमं, मध्यं, कनिष्ठं, हीनं कोलाहलं चेति। तल्लक्षणमुक्तं **सङ्गीतरत्नाकरे**—

उत्तमं मध्यममथो कनिष्ठमिति तत्त्रिधा। चत्वारो मुख्यगातारो द्विगुणास्समगायनाः ॥
गायिन्यो द्वादश प्रोक्ता वंशिकानां चतुष्टयम्। मार्दंगिकास्तु चत्वारो यत्र तद्वृन्दमुत्तमम् ॥
मध्यम स्यात्तदर्धेन कनिष्ठमितरद्भवेत्। इतो न्यूनं तु हीनं स्याद्यथेष्टमथवा भवेत् ॥
उत्तमाभ्यधिकं वृन्दं कोलाहलमितीरितम् ॥ इति ।

अन्ये तु प्रकारान्तरेण वृन्दलक्षणमुक्तवन्तः—

आह वृन्दविशेषं तु कुतुपं भरतो मुनिः। ततस्य चावनद्धस्य नाट्यस्येति त्रिधा च सः ॥
ततस्स कुतुपो ज्ञेयो गायनः सपरिग्रहः। वीणा घोषवती चित्रा विपञ्ची परिवादिनी ॥
वल्लकी कुब्जिका ज्येष्ठा नकुलोष्ठी च किन्नरी।
जया कुर्मी पिनाकी च हस्तिका शततन्त्रिका ॥
औदुम्बरी च षड्वर्णः पौर्णो रावणहस्तकः। वाद्यानामेवमादीनां पृथग्वादकसंचयः ॥
नाट्यस्य कुतुपः पात्रैरुत्तमाधममध्यमैः। कुतुपानाममीषां तु समूहो वृन्दमुच्यते ॥

तच्च वृन्दगानं द्विविधं निबद्धमनिबद्धं चेति ।

तदुक्तं—बद्धं धातुभिरंगैश्च निबद्धमभिधीयते। आलप्तिबन्धहीनत्वादनिबद्धमितीरिता ॥

अत्रानिबद्धगानमेव प्रबन्धगानमित्याख्यायते। प्रबन्धलक्षणं चोक्तं **संगीतचूडामणौ**—

चतुर्भिर्धातुभिष्षड्भिश्चाङ्गैर्यस्मात्प्रयुज्यते। तस्मात्प्रबन्धः कथितः प्रतापपृथिवीभुजा ॥

तत्र चत्वारो धातवः, उद्ग्राहः,मेलापकः, ध्रुवः, आभोगश्चेति। तत्रोद्ग्राहो नाम पादचतुष्टयात्मकस्य श्लोकस्य प्रथमे पादे कामवत्पदघटितं, मघवत्पदघटितं चेति यत्खण्डद्वयं तद्द्वयाभिव्यञ्जकगीतिभागः। तथा कान्तवत्पदघटितश्लोकखण्डाधारात्मकाक्षराभिव्यञ्जकगीत्यंशः ध्रुवः। उद्ग्राहध्रुवयोर्मेलसम्पादको गीत्यंशो मेलापकः। आभोगः अन्तिमो भागः, 'आभोगः परिपूर्णते'त्युक्तेः। अङ्गानि, सरिगमपधनीत्येवंरूपाः स्वराः षड्जादयः। विरुदं नायकगतशौर्यौदार्यादिगुणप्रतिपादकं पदं, नायकवाचकं पदं मङ्गलार्थं च तत्पदं, तोदिगदांदांधिमिधिमीत्यादिवाद्याक्षराणि पाठः। ध्रुवमध्यादिरूपास्तालाः। तदुक्तं **सङ्गीतरत्नाकरे**—

प्रबन्धावयवो धातुः स चतुर्धा निरूपितः। उद्ग्राहः प्रथमो भागः ततो मेलापकः स्मृतः ॥

ध्रुवत्वात्स्याद् ध्रुवः पश्चादाभोगस्त्वन्तिमो मतः ।
तत्र मेलापकाभोगौ न भवेतां क्वचित्क्वचित् ॥

स द्विधातुस्त्रिधातुश्च चतुर्धातुरिति त्रिधा । प्रबन्धाङ्गानि षट् तस्य स्वरश्च बिरुदं पदम् ॥
तेन्नकः पाठतालौ च प्रबन्धपुरुषाकृतेः । भवत्यङ्गपदाङ्गानि मङ्गलार्थं प्रकाशिते ॥
तत्र तेन्नपदे नेत्रे स्तः पाठविरुदौ करौ । प्रबन्धगतिहेतुत्वात्पादौ तालस्वरौ मतौ ॥
स्वराः षड्जादयस्तेषां वाचकाः सरिगादयः । विरुदं गुणनाम स्यात्ततोन्यद्वाचकं पदम् ॥
तेन्नेति शब्दस्तेन स्यान्मङ्गलस्य प्रकाशकः । ओंतत्सदिति निर्देशतत्वमस्यादिवाक्यवत् ॥
तदिति ब्रह्म तेनायं ब्रह्मणा मङ्गलात्मना । लक्षितस्तेन तेनेति पाठो वाद्याक्षरात्मकः ॥

निरूपयिष्यते तालो ध्रुवमध्यादिरूपतः ॥ इति ।

एवमुक्तं प्रबन्धाख्यनिबन्धगानं द्विविधं निर्युक्तमनिर्युक्तंचेति । तत्र नियतच्छन्दस्तालादियुक्तं गानं निर्युक्तमित्युच्यते, तन्नियमरहितं तु अनिर्युक्तम् । तदुक्तं **शार्ङ्गसूरिणा**—

अनिर्युक्तश्च निर्युक्तः प्रबन्धो द्विविधो मतः ।
छन्दस्तालाद्यनियमात् आद्यस्तन्नियमात्परः ॥ इति ।

एतदपि पुनस्त्रिविधं, सूडः, आलिकुलक्रमसंश्रयः विप्रकीर्णश्चेति । तत्र सूडो द्विविधः, शुद्धस्तालकश्चेति । तत्र शुद्धश्चतुर्विधैला अष्टविधकरण, ठेंकिकाचतुष्टय, एकविधवर्तनि, द्विविधजोंड, अष्टविधलम्भक, एकविधरास, एकविधैकतालीरूपाष्टांगोपेतः । सालकस्तु ध्रुव, मध्य, प्रतिमध्य, निरासक, अड्डताल, रास, एकतालीरूप सप्ततालोपेतः । तत्र एला बहुविधाः, तेषां मध्ये वर्णैला गणैला, मात्रैला, देशैलेति चतसृणामेव प्राधान्यं प्रतिपादितम् । तदुक्तं **सङ्गीतरत्नाकरे** —

एलादिरशुद्ध इत्युक्तो ध्रुवादिस्सालतो मतः । एलाकरणढेंकीभिः वर्तन्या जोंवडेन च ॥
लम्भरासैकतालीभिः अष्टभिस्सूड उच्यते । तत्र वर्णगणैर्जाता गणैला परिकीर्तिता ॥

सा भद्रे(वे)त्रिविधा शुद्धा संकीर्णा विकृता तथा ।
शुद्धा चतुर्विधा नादावती हंसावती तथा ॥

नन्दावती च भद्रावत्यथासां लक्ष्म कथ्यते । गणादिनियमस्त्वासां अंघ्रिखण्डद्वयाश्रयः ॥
गणस्समूहः स द्वेधा वर्णमात्राविशेषणात् । गुरुर्लघुरिति द्वेधा वर्णोनुस्वारसंयुतः ॥

सविसर्गो व्यञ्जनान्तो दीर्घो युक्तपरो गुरुः। वा पादान्तो गुरुर्वक्रो द्विमात्रो मात्रिको लघुः॥
एवं पदे पदान्ते वा प्रकृते लघवो मताः। तच्च वर्णगणो वर्णैः त्रिभिरष्टविधश्च सः॥

मस्त्रिगुः पूर्वलो यः स्यान्मध्यलो रोन्तगुस्तु सः।
तोंतलो मध्यगो जः स्याद्भादिर्भः त्रिलघुस्तु नः॥ इति।

एवमन्येषां भेदास्तल्लक्षणानि च विस्तरभयान्नेह प्रतिपाद्यन्ते, इति।

इत्थं वीणातालमृदङ्गनृत्तगीतादिविशिष्टं कोलाहलाख्यवृन्दगानोपेतं संगीतमुत्प्रेक्षितम्।

ननु भगवता वाल्मीकिना वनेषु संगीतमिव प्रवृत्तमिति संगीतमुत्प्रेक्षितम्। तथान्यत्रापि 'पाठ्ये गेये च मधुरमिति' रामायणस्य गानयोग्यत्वं प्रतिपादितम्। **एवमुत्तरकाण्डेऽपि —**

ऋषीणामुपविष्टानां ततो गेयं प्रवर्त्यताम्।

इति गानार्थतया वाल्मीकिमहर्षिप्रेषणं च कुशलवयोरवगम्यते। एवं **बालकाण्डेऽपि —** "काव्यमेतदगायेता"मिति कुशलवकर्तृकगानं प्रतिपादितं, एतत्सर्वमसंगतम्। सकलशास्त्रप्रतिषिद्धगीतप्रतिपादनस्य धर्मैदम्पर्येण प्रवृत्ते रामायणे अयुक्तत्वात्। तत्प्रतिषेधश्च **मानवे —**

न नृत्येदथवा गायेन्न वादित्राणि वादयेत्।
न चास्फोटेन्न च क्ष्वेलेत्संरक्तोऽपि न रावयेदिति॥

श्रुतावपि गायकस्यापपात्रत्वाप्रतिग्राह्यत्वादिप्रतिपादनादपि गानविषेधोऽवगम्यते। तथाचापपात्रत्वे **तैत्तिरीयत्वश्रुतिः —** 'तस्माद्गायते न देयं, गाथा हि तद्वृङ्क्त' इति। अप्रतिग्राह्यत्वमपि **पारक्षुद्रशाखायां** तत्रैव, 'देवा वै ब्रह्मणश्चान्नस्य च शमलमपाघ्नन्ती'त्युपक्रम्य 'तस्माद्गायतश्च मत्तस्य च न प्रतिगृह्यं, यत्प्रतिगृह्णीयाच्छमलं प्रतिगृह्णीयात्' इति। गायकस्य हव्यकव्ययोर्वर्जितत्वप्रतिपादनेनापि, निषेधो **मानवे** वर्ज्याः स्युर्हव्यकव्ययोरित्यधिकृत्य —

कुशीलवोऽवकीर्णी च वृषलीपतिरेव च। स्तेयगायकयोर्वान्नं तक्ष्णो वार्धुषिकस्य च॥इति।

तथा चेत्थं श्रुतिस्मृतिप्रतिषिद्धं संगीतं कथं रामायणे महर्षिणा प्रतिपादितम्। किंच नृत्तदर्शनसंगीतश्रवणादिकमपि विशिष्य गृहस्थानामेवाभिहितम्। **मोक्षधर्मे —** चातुराश्र्म्ये गृहस्थाश्रममधिकृत्य—अपिचात्र माल्याभरणवस्त्राभ्यङ्गनित्योपभोगनृत्तगीतवादित्रश्रुतिसुखनयनाभिरामदर्शनानां प्राप्तिः भक्ष्यभोज्यपेयचोष्याणां विविधानामुपभोगः विहार-

सन्तोषकामसुखावाप्तिरिति। तथाच सर्वाश्रमसाधारण्येन संगीतनृत्तवाद्याचरणस्य प्रतिषिद्धत्वात् नृत्तदर्शनसंगीतश्रवणादेः विशिष्य गृहस्थानामेव विधानबलेन इतराश्रमिणां प्रतिषिद्धत्वाच्च वाल्मीकिः कथं गीतियोग्यप्रबन्धं रचयित्वा कुशलवयोर्गीतिशिक्षणं कृतवान्? कथं वा ब्रह्मचारिणौ कुशलवौ प्रबन्धमगायेतामिति चेत्, न तावद्गानमात्रं प्रतिषिद्धमिति वक्तुं शक्यं, कर्मांगतया गानमात्रस्य तत्र तत्रोपलम्भात्। तथा च **महाव्रते** श्रुतिः—
'उदकुम्भानधिनिधाय दास्यो मार्जालीयं परिनृत्यन्ति पदो निघ्नतीरिदं मधुं गायन्त्यो मधु वै देवानां परममन्नाद्यं परममेवान्नाद्यमवरुन्धते' इति।

अश्वमेधेऽपि— 'ब्राह्मणौ वीणागायिनौ गायतः श्रिया वा एतद्रूपं यद्वीणा श्रियमेवास्मिन् धत्ते' इति। तथा 'ब्राह्मणोन्यो गायेद्राजन्योन्यः ब्रह्म वै ब्राह्मणः क्षत्रं राजन्यः तथाहास्य ब्रह्मणा क्षत्रेण चोभयतः श्रीः परिगृहीता भवती'ति। तथा 'दिवा ब्राह्मणो गायन्नक्तं राजन्यः ब्रह्मणो वै रूपमहः क्षत्रस्य रात्रिः तथाहास्य ब्रह्मणा च क्षत्रेण चोभयतो राष्ट्रं परिगृहीतं भवतीति' च। तथा 'इत्यददा, इत्ययजथा, इत्यपच इति ब्राह्मणो गायेत्। इष्टापूर्तं वै ब्राह्मणस्य इष्टापूर्तेनैवैनं स समर्धयतीति'। तथा 'इत्यजिना इत्ययुध्यथाः अमुं संग्रामं अहन्निति राजन्यः युद्धं वै राजन्यस्य युद्धेनैवैनं स समर्धयति' इति।

तद्भाष्यं च 'इत्यददा इति दानादिप्रकारविशेषे इतिशब्दः इत्यददाः एवं ब्राह्मणेभ्यो गोभूहिरण्यादि दत्तवानसि। इत्ययजथाः एवं वाजपेयराजसूयद्वादशादिभिरिष्टवानसि, इत्यपचः एवं कुल्यासशाकसूपपायसादीनि ब्राह्मणेभ्योन्नानि पक्ववानसि, एवमीदृशार्थप्रतिपादिकाभिर्लौकिकगाथाभिः संस्कृतैः पदैः ब्राह्मणो गायेत्। इष्टापूर्तयोः ब्राह्मणसंबन्धित्वात् ताभ्यामेनं यजमानं समर्धयति। इत्यजिना इत्यादि सायं धृतिषु हूयमानासु राजन्यो वीणागाथी गायति। इत्यजिनाः एवं पृथुभरतभागीरथयुधिष्ठिरादिभिः सुकृतकर्मभिः समानं शत्रून् क्षपितवानसि, इत्ययुध्यथाः, एवं करिरथतुरगपदातिसमेतः शरचापतोमरकरवाळादिभीषणमहाशूरपरिवृतोरिभिः सह युद्धं कृतवानसि, इत्यमुं संग्राममहन् एवं दुष्यन्तयुधिष्ठिरादिवन्महावीरपुरुषसिंहसहस्रसमधिष्ठितं संग्राममसुं काश्मीरं मागधं पौण्ड्रमित्यादि निशितासिमात्रसहायस्त्वं हतवानसि। इत्थं राजन्यसंबन्धिना युद्धेन समृद्धमेनं करोति। तथा च श्लोकाः—

दानस्य—

सौवर्णीर्निष्ककोटीः प्रतिदिनमददाः सादरं ब्राह्मणेभ्यो
ब्रह्मभ्यो वेदविद्भ्यो, दिशि दिशि विहिता अग्रहाराः समग्राः ।
कुण्डोध्नीनां गवामप्यविरतमयुतं ब्राह्मणेभ्यो वितीर्णं
वासोरत्नादिदाने नहि तव गणना भूपचूडामणेऽभूत् ॥

यागस्य —

मखैरयजथा महीशतमख स्फुरद्दक्षिणैरविक्षतविधिक्रमैरहरहीनभेदैस्सदा ।
सर्वैः पशुभिरिष्टिभिर्विविधनित्यकाम्यात्मभिर्महाक्रतुभिरुज्वलैरपि च राजसूयादिभिः ॥

पाकस्य यथा — खण्डजीरकघृताम्लसैन्धवस्वादुसूपमरिचादिसंस्कृतैः ।
व्यञ्जनैस्सह बहूपदंशकैः ब्राह्मणार्थमपचस्त्वमोदनान् ॥

ज्यानेः — विषयान्प्रविलुप्य गोधनानामुपहर्ता त्वमुदारदामहारी ।
विनिवार्य च मङ्गलोपचारानजिनाविद्विषतां महाकुलानि ॥

युद्धस्य यथा —

आकर्षन्मददुर्दिनां गजघटां सिन्दूरसन्ध्याकुला-
मुद्वृत्तोत्प्लुतवाजिलोकपिहितव्योमावकाशो भृशम् ।
पादातैर्निशितासिभीषणकरैर्दिङ्मण्डलग्राहिभि-
र्विक्रान्तस्त्वमयुध्यथाः परबलैस्सार्धं महीवासवः ॥

वधस्य — विक्रान्तान् रथगजवाजिलोकजुष्टानक्षोभ्यान्धृतविविधायुधप्रधानान् ।
संग्रामे मगधकलिंगवङ्गपूगान् शक्रस्त्वं प्रसभमहन्महीमहेन्द्र ॥ इति ॥

इत्थं कर्माङ्गतया श्रौतं गानं विहितम् । तथा लौकिकमपि गानं कर्माङ्गतया विहितम् । तथा चाग्न्याधेये **आपस्तम्बः** — वीणातूणवेनैनमेतां रात्रिं जागरयन्तीति । तत्र भाष्यं-तूणवो वंशः वीणा च तूणवश्च वीणातूणवं, 'द्वन्द्वश्च प्राणितूर्यसेनांगाना-मित्येकवद्भाव इति । स्मार्तकर्मण्यपि सीमन्ते स एव — 'गायतमिति वीणागाथिनौ संशास्तीति' । **आश्वलायनोऽपि** – वीणागाथिनौ संशास्ति सोमं राजानं संगायेतामिति । तथा च इत्थं कर्माङ्गतया गानं विहितम् ॥

इत्थं कर्माङ्गत्ववदुभयविधस्य गानस्य मोक्षोपयोगोऽपि भवतीति मत्वा वैदिक-गीतेस्तदुपासनाप्रतीकत्वमाह **याज्ञवल्क्यः** —

यथाविधानेन पठन् सामगायमविच्युतम् । सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति, इति ।

तद्व्याख्या च — यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्यमित्याह—यथाविधानेनेति—स्वाध्यायावगतमार्गानतिक्रमेण सामगायं सामगानं, साम्नो गानात्मकत्वेऽपि गायमिति विशेषणमप्रगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितं, सावधानः सामध्वन्यनुस्यूतात्मैकाग्रचित्तवृत्तिः, पठन् तदभ्यासवशात् तत्र निष्णातः शब्दाकारशून्योपासनेन परं ब्रह्माधिगच्छति । तदुक्तम् — 'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति' इति । इत्थं च वैदिकगीतेः ब्रह्मोपासनाप्रतीकत्वमुक्तम् । यस्य पुनर्वैदिक्यां गीतौ चित्तवृत्तिर्न रमते यस्य वा तत्रानधिकारः तेन निषिद्धलौकिकगीतानुस्यूतब्रह्मोपासनं कार्यं प्रधानसिद्ध्यर्थं निषिद्धस्यापि ग्राह्यत्वात् । तथा च **सुरेश्वराचार्यः** —

समाप्तिं न समायाति प्रधानं यदसंभवे ।
निषिद्धमपि तत्कार्यं तत्समाप्तिप्रयुक्तितः ॥ इति ।

युक्तं चैतत् —

शिशु(शुचि)र्वेत्ति पशुर्वेत्ति वेत्ति गानरसं फणी । लुब्धकाद्गीतिलोभेन मृगो मृगयते वधम् ॥

इत्यादिलोकप्रवादानुरोधेन अनुभवेन च शिशुसर्पमृगादीनामप्यैकाग्र्यस्यायत्नसिद्धत्वावगमेन तत्र ब्रह्मदृष्टिमात्रकरणस्य सुलभत्वादित्याहापरान्तकमित्यादिभिस्त्रिभिः श्लोकैः —

अपरान्तकमुल्लोप्यं मुद्रकं प्रकरी तथा । औवेणकं सगोविन्दं अन्तरं गीतकानि च ॥
ऋग्गाथा पणिका दक्षविहिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम् ॥
वीणावादनतत्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति ॥ इति ।

अत्र विज्ञानेश्वरः–अपरान्तकं उल्लोप्यं, मुद्रकं, प्रकरी, औवेणकं गोविन्दं, अन्तरमित्येतानि प्रकरणाख्यानि, सप्तगीतकानि । तानि च शब्दादासादितवर्धमानकादि महागीतकानि गृह्यन्ते । ऋग्गाथाद्याश्चतस्रो गीतका इत्येतदपरान्तकादि गीतजातं अध्यारोपितात्मभावं मोक्षसंज्ञितं गातव्यम् । तदभ्यासस्यैकाग्रतापादनद्वारेणात्मैकाग्रतापत्तिकारकत्वात् । तथा भरतादि मुनिप्रतिपादित वीणावादन तत्ववेदी वीणावादनतत्वज्ञः । श्रूयत इति श्रुतिः । द्वाविंशतिधा, सप्तस्वरेषु । तथाहि — षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतयः, ऋषभधैवतौ प्रत्येकं त्रिश्रुती, गान्धारनिषादौ प्रत्येकं द्विश्रुती इति । जातयः

षड्जादयः सप्त शुद्धाः, संकरजातयस्त्वेकादश इत्येवमष्टादशजातयः, तासु विशारदः प्रवीणः, ताल इति गीतेः परिमाणं कथ्यते, तत्स्वरूपज्ञश्च तदनुविध ब्रह्मोपासनया तालादिभङ्गभयाच्चित्तवृत्तेरात्मैकाग्रतायाः सुकरत्वादल्पायासेनैव मुक्तिपथं नियच्छति प्राप्नोति। चित्तविक्षेपाद्यन्तरायेण हतस्य गीतज्ञस्य फलान्तरमाह —

गीतज्ञो यदि योगेन न प्राप्नोति परं पदम्। रुद्रस्यानुचरो भूत्वा सह तेनैव मोदते॥

गीतियोगी यदि कथंचिद्योगेन तद्गीत्यनुविद्धब्रह्मानुसन्धानात्मकपरमं पदं न प्राप्नोति, तर्हि रुद्रस्य सचिवो भूत्वा तेनैव सह मोदते, क्रीडति, तथा च ब्रह्मज्ञानोपयोगः अविशेषेण लौकिकवैदिकगीत्योः प्रतिपादितः।

ननु उक्तरीत्या वैदिकगीत्युपासनवल्लौकिकगीत्युपासनमपि ब्रह्मज्ञानसम्पादकमित्युक्तं, तत्कथं लौकिकवैदिकगीत्योः साम्यमिति चेन्न, वैदिकगानसंबन्धिप्रथमादिस्वराणां लौकिकगानसंबन्धि षड्जादिस्वराणां च परस्पराभेदप्रतिपादनद्वारा साम्यस्य प्रतिपादितत्वात्। तथा च नारदः —

यस्सामगानां प्रथमः सवर्णो मध्यमः स्वरः। यो द्वितीयः स गान्धारः तृतीयस्त्वृषभः स्मृतः॥
चतुर्थं षड्ज इत्याहुः पञ्चमो धैवतो भवेत्। षष्ठो निषादो विज्ञेयः पञ्चमः सप्तमः स्मृतः॥
अंगुष्ठस्योत्तमे क्रुष्टो ह्यंगुष्ठे प्रथमः स्वरः। प्रादेशिन्यां तु गान्धारो ऋषभस्तदनन्तरः॥
अनामिकायां षड्जस्तु कनिष्ठायां तु धैवतः।
तस्याधस्तात्तदन्यं तु निषादं तत्र निर्दिशेत्॥ इति।

अतश्च शीक्षोक्तरीत्या लौकिकवैदिकगीत्योः परस्पराभेदं ज्ञात्वा लौकिक्यां गीतौ ब्रह्मोपासकस्यापि मोक्षो भवतीति। एवमेव लौकिके वैदिके वा अप्रतिषिद्धे प्रतीके उपासनात् ज्ञानसिद्धिरुक्ता योगशास्त्रे–यथाभिमतध्यानाद्वा। तस्य चायमर्थः—यद्यदनिषिद्धं लौकिकं वैदिकं वा स्वाभिमतं वस्तु तत्र ब्रह्मदृष्टिकरणेन ज्ञानद्वारा मोक्षो भवतीदि। अत्र च ब्रह्मज्ञानमुपासनासाध्यं, उपासनं च निराकारस्य ब्रह्मणो न भवतीति किंचिदालम्बनं वक्तव्यम्। तत्रानभिमते वस्तुनि बुद्धिप्रवृत्तिरेव न भविष्यतीति ध्यानमशक्यं, अभिमते वस्तुनि स्वत एव मनःप्रवृत्तेः सत्वात् ब्रह्मदृष्टिमात्रकरणं लघु इत्यभिप्रायेणैवाभिमतध्यानाद्वेत्याह। इत्थं धर्मोपयुक्तत्वं मोक्षोपयुक्तत्वं च। तथार्थकामार्थत्वमपि गानस्य "तद्य इमे वीणायां गायन्ति एतं ते गायन्ति तस्मात्ते धनसनय" इति।

"तस्माद्गायन्तं स्त्रियः कामयन्ते" इति श्रुतिभ्यां अनुभवेन चावगम्यते। अतस्तादृशगान-विषयाणि निषेधवचनानि। अत एव गानेन धनग्रहणं प्रतिषेधति **भगवान्वाल्मीकिः—**

ऋषीणामुपविष्टानां ततो गेयं प्रवर्त्यताम्।
लोभश्चापि न कर्तव्यः स्वल्पोऽपि धनकांक्षया॥ इति।

तथैव कुशलवाभ्यां रामदत्तं धनं न गृहीतम्। तदपि तत्रैव—

अष्टादशसहस्राणि सुवर्णस्य महात्मनोः। ददस्व शीघ्रं काकुत्स्थ बालयोर्मा वृथाश्रयः॥
दीयमानं सुवर्णं तन्न गृह्णीतां कुशीलवाविति।

इत्थं संगीतस्य पुरुषार्थचतुष्टयसाधनत्वं परमेश्वरोपासनाय प्रवृत्तस्य मोक्षफलकत्वं च। **सङ्गीतरत्नाकरेऽपि** — तत्र पुरुषार्थ चतुष्टय साधनत्वं श्रुतिस्मृतिप्रसिद्धमित्यत्र —

धर्मार्थकाममोक्षाणामिदमेव हि साधनम्। गायतौ ब्राह्मणौ वीणागाथिनाविति च श्रुतौ॥
अश्वमेधप्रकरणे वीणोक्ता धर्मसाधनम्। वीणानादानुरक्तेभ्यो राजभ्यो वैणिका जनाः॥
लभन्ते कांक्षितानर्थांस्तस्माद्वीणार्थसाधनम्। कामयन्ते ह गायन्तं स्त्रिय इत्युदितं श्रुतौ॥
गानस्य कामहेतुत्वं गानोत्पत्तिस्तु वीणया। वीणावादनतत्वज्ञः श्रुतिजातिविशारदः॥
तालज्ञश्चाप्रयासेन मोक्षमार्गं स विन्दति। इत्येवं याज्ञवल्क्येय वीणा मोक्षाय शंसिता॥

तथान्यत्रापि —

एतैः प्रकरणाख्यानि गीतकानि जगुर्बुधाः। तानि वक्ष्यामहे सम्यक् तेषामाद्यं तु मुद्रकम्॥
अपरान्तकमुल्लोप्यं प्रकर्यौ वेणकं तथा। गोविंदकान्तरे सप्त गीतकानीत्यवादिषुः॥

अथोत्तरसप्तकम् —

छन्दकासरितं वर्धमानकं पाणिकं तथा। ऋचो यजूंषि सामानि गीतकानि चतुर्दश॥
शिवस्तुतौ प्रयोज्यानि मोक्षाय विदधे विधिः।

तथाच भगवता वाल्मीकिमहर्षिणा स्वस्य परमपुरुषाभिध्यानार्थतया गीतिरूपं रामचरितं वर्णितम्। गानार्थतया रामनिकटे कुशलवयोः प्रेषणं तु "इत्यददाः इत्ययजथाः इत्यपच, इति ब्राह्मणो गायेत्, अमुं संग्राममहन्निति राजन्य इति श्रुतिविहितयजमानस्तुति पाठं गानार्थतैव। तथाचोत्प्रेक्षणं गेयत्वप्रतिपादनं गानाय प्रेषणादिकमखिलमपि अप्रतिषिद्धकर्मब्रह्मज्ञानार्थतया प्रवृत्तगानविषयतयैवोपपन्नमिति महर्षिकृतं संगीतत्वोत्प्रेक्षणादिकमखिलमपि युक्तमेव।

मासि भाद्रपदे ब्रह्म ब्राह्मणानां विवक्षताम् ।
अयमध्यायसमयः सामगानामुपस्थितः ॥

अत्र ब्रह्म वेदः तद्विवक्षतां सामगानां ब्राह्मणानां भाद्रपदे मासि अध्ययनारंभसमय इत्युक्तम् । तस्मिन् मासि कालविशेष उक्तः **खादिरगृह्ये** —

प्रौष्ठपदीहस्तेनाध्यायानुपाकुर्युरिति । तद्भाष्यं च प्रोष्ठपदे मासि हस्तेन युक्ते काले अध्यायान्वेदभागान् तदङ्गानि च उपविष्टाः संहिता अधीयीरन् । वक्ष्यमाणेन प्रकारेण प्रौष्ठपदहस्त इति वक्तव्ये बह्वन्यथोक्तम् । अन्यदपि बहुस्मृतिसदाचारसिद्धमत्र कर्तव्यमिति । तत्र गृह्यपरिशिष्टे-अथ नदीं महोदकां वा सह शिष्यैर्गत्वेत्यादिना, महानदीस्नान, पञ्चगव्य-प्राशन, ऋषिपूजनहोमादिरूपमित्युक्तम् । गौतमोऽपि— श्रवणादिवार्षिकं प्रौष्ठपदीं वोपाकृत्याधीयीत, छन्दाँस्यर्धपञ्चमान् मासान् पञ्च दक्षिणायनं वेति । सामगानामय-मुपस्थित इत्युक्त्या बह्वृचानां तैत्तिरीयाणां च अन्य एवोपाकर्मकाल इत्युक्तं भवति । तथाचाश्वलायनः— अथातोऽध्यायोपाकरणं, ओषधीनां प्रादुर्भावे श्रवणेन श्रवणस्य पञ्चम्यां हस्तेन वा, इति । आपस्तम्बोऽपि— श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत । तैष्यां पौर्णमास्यां तत्पूर्वस्यां रोहिण्यां वा विरमेत्, उत्सृजेदिति । बोधायनोऽपि—श्रावण्यां पौर्णमास्यामुपाकर्मापि वाषाढ्यां, तैष्यां माघ्यां वोत्सृजेदिति ।

मनुरपि—

श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । उक्तछन्दांस्यधीयीत मासान् विप्रोधिपञ्चमान् ॥
पुष्ये तु छन्दसां कुर्याद्बहिरुत्सर्जनं द्विजः । माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ इति ।

इदं चोपाकरणं सिंहस्थे सवितरि कर्तव्यम् । तथाच **कालादर्शे**—

विदधीरन् उपाकर्म श्रावण्यां तैत्तिरीयकाः । बह्वृचाः श्रवणे कुर्युः सिंहस्थोर्को भवेद्यदेति ॥

यदा सिंहस्थितोर्को न भवति तदा तैत्तिरीयकाः प्रोष्ठपद्यां श्रवणे च व्यवस्थया, इति । सिंहस्थे सवितरि कर्तव्यं, एतन्नर्मदोत्तरदेशविषयं, नर्मदादक्षिणे तु कर्कटराशिस्थे सवितरि कर्तव्यम् । तथा च **स्मृतिः** —

नर्मदोत्तरदेशे तु कर्तव्यं सिंहयुक्तके । कुलीरे रविसंयुक्ते उपाकुर्यात्तु दक्षिणे ॥ इति ।

व्याघ्रोऽपि —

रवौ कर्कटराशिस्थेप्याषाढे श्रावणेऽपि वा । उपाकर्म च कर्तव्यं निषेधो नास्ति दक्षिणे, इति ।

उक्तकाले तु श्रावणस्य शुक्रमौढ्यादिना दुष्टत्वे प्रौष्ठपद्यां कर्तव्यं, तस्यापि दुष्टत्वे आषाढ्यां, मासत्रयस्यापि दुष्टत्वे श्रावण्यामेव कर्तव्यम्। तथाच **वसिष्ठः** —

मलमासे निपतिते सूतके मृतकेऽपि वा। ग्रहणे संक्रमे चैव मौढ्येऽपि गुरुशुक्रयोः॥
प्रौष्ठपद्यामथाषाढ्यामुपाकरणमिष्यते। प्रौष्ठपद्यामुपाकुर्याच्छ्रावणं दूषितं यदि॥
आषाढे वापि कर्तव्यं प्रौष्ठपद्याश्च दूषणे। मासत्रयेऽपि दोषश्चेच्छ्रावण्यामेव कारयेत्॥

इति। **व्यासोऽपि** —

श्रावण्यामथवाषाढ्यां प्रौष्ठपद्यामथापि वा। दुष्टायां पूर्वपूर्वस्यामुत्तरस्यां विधीयते॥
कालत्रयेऽपि दोषश्चेच्छ्रावण्यामेव कारयेत्॥ इति।

संवर्तस्तु—आषाढ्याद्याश्च चत्वारो मासाः शस्ता ह्युपाकृतौ।
यो यो हि दोषयुक्तः स्यात्तं तं हित्वा परे विदुः॥ इति।

शुक्रमौढ्यादिदोषे न कर्तव्यमित्येतत् प्रथमोपाकृतिविषयम्। तथाच **गर्गः** —

गुरुभार्गवयोर्मौढ्ये मलमासे तथैव च। प्रथमोपाकृतिर्न स्यात्कुर्याच्चेत्स विनश्यति॥ इति।

उक्तकालस्य सर्वस्यापि शुक्रमौढ्यादिदोषे तत्तद्ग्रहशान्तिं कृत्वैव प्रथमोपाकृतिः कर्तव्या। तथा च **बृहस्पतिः** —

शान्तिं कृत्वा तयोर्वापि शुक्रदेवेन्द्रमन्त्रिणोः। होमैर्दानैर्जपैर्वापि तयोरुदितमन्त्रकैः॥
कर्तव्यं श्रावणं विप्रैरिति जीवेन भाषितम्। इति।

ग्रहसंक्रान्त्यादिदोषे विशेषः गर्गेण प्रदर्शितः—

अर्धरात्रादधस्ताच्चेत्संक्रान्तिर्ग्रहणं तथा। उपाकर्म न कर्तव्यं परतश्चेन्न दोषभागिति॥

उक्तमासेषु पौर्णमासीश्रवणहस्ताः शाखाभेदेन व्यवस्थिताः। तथाच गोभिलः—

पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः। बह्वृचाः श्रवणे कुर्युः हस्तर्क्षे सामवेदिनः॥

तत्रौदयिकत्वमुदयव्यापित्वं पर्वश्रवणहस्तेषु त्रिष्वपि संबध्यते। पर्वण औदयिकत्वे विशेषो गोभिलेन दर्शितः—

श्रावणी पौर्णमासी तु संगवात्परतो यदि। तदा त्वौदयिकी ग्राह्या नान्यथौदयिकी भवेत्॥

इति। श्रवणस्यापि उदयव्यापित्वे सफलत्वं तदभावे दुष्टफलत्वं अन्वयव्यतिरेकाभ्यां व्यासेन प्रतिपादितम्—

धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म यद्भवेत् । तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितम् ॥
श्रवणेन तु यत्कर्म ह्युत्तराषाढसंज्ञिते । संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥ इति ।

तथा चायं निष्कर्षः —श्रावण्यां पौर्णमास्यां याजुषाः कुर्युः, श्रावणे मासि श्रवणनक्षत्रे बह्वृचाः, प्रौष्ठपदे मासि हस्तनक्षत्रे सामशाखिन उपाकुर्युः, तेषां च मलमासदोषे निजमासि कुर्युः निजमासस्यापि शुक्रमौढ्यादिदोषे अदुष्टे मासि कुर्युः, मासत्रयस्यापि दुष्टत्वे तत्तद्ग्रहशान्तिपूर्वकं श्रावण्यादावेव कुर्युः । एतत्सर्वं प्रथमोपाकृतिविषयं, द्वितीयोपाकृतिस्तु दुष्टायामपि श्रावण्यां पौर्णमास्यां दुष्टेऽपि हस्तनक्षत्रे तत्रैव कर्तव्यम् । नन्विदमुपाकरणं गृहस्थादिभिः क्रियते, तदनुपपन्नं, तथाहि—उपाकरणं ब्रह्मचारिणां धर्मः, उपाकृत्याधीयीतेति ग्रहणाध्ययनाङ्गत्वप्रतीतेः, ग्रहणाध्ययनस्य च अष्टमे वर्षे ब्राह्मणमुपनयीत तमध्यापयीत इत्यादिवचनपर्यालोचनया उपनीतब्रह्मचारिकर्तृकत्वावगमात्, विवाहस्य वेदाध्ययनोत्तरकालिकत्वेन तत्पूर्वकालीनस्य वेदाध्ययनस्य ब्रह्मचारिकर्तृकत्वाच्च । तथा च **कूर्मपुराणे** —

> वेदं वेदौ तथा वेदान् वेदान्वा चतुरो द्विजः ।
> अधीत्य चाधिगम्यार्थं तदा स्नायाद्द्विजोत्तमः ॥ इति ।

आपस्तम्बोऽपि — वेदमधीत्य स्नास्यन्निति । न च "द्वितीयमायुषो भागं कृतदारो गृहे वसेत्' इत्युपक्रम्य श्रावण्यां प्रौष्ठपद्यां वेत्युपाकर्मणः गृहस्थधर्मप्रकरणपाठात् गृहस्थधर्मत्वमपीति वाच्यं, 'वेदानधीत्य वेदौ वा' इत्यादिपर्यालोचनया ब्रह्मचारिधर्मत्वे निर्णीते गार्हस्थ्यप्रकरणपठितस्य उपाकरणस्य पूषानुमन्त्रणमन्त्रवत् उत्कर्षस्य संभवात् । अतः कथं ब्रह्मचारिगृहस्थसाधारण्येन उपाकर्मविधानमिति चेन्न, गृहस्थानामप्यध्ययनसंभवात् । तथाचाश्वलायनः — 'अधीयीत स्वाध्यायं समावृत्तो ब्रह्मचारिकल्पेन, यथान्यायमितरे जायोपेयेत्येके प्राजापत्यं हि तत्' इति । अस्यार्थो **नारायणीयवृत्तौ** — समावृत्तो ब्रह्मचारिकल्पेन ब्रह्मचारिधर्मैरित्यर्थः, स्वाध्यायकाले विहिता ये धर्माः मधुमांसस्त्रीगमनखट्वाशयनादिवर्जनादयः तैर्युक्तो अधीयीत समावृत्तः । मेखलादयस्तु न भवन्ति, अस्वाध्यायधर्मत्वात् यथान्यायमितरे ब्रह्मचारिण इत्यर्थः । अस्मिन्नध्ययने ब्रह्मचारिणामपि प्रवृत्त्यर्थमिदं, इतरथा समावृत्तानामेवेति शंका स्यात् । जायोपेयेत्येके । समावृत्तो जायां गच्छेदित्येक आहुः । ऋतावेव गच्छेन्नानृतावित्याह प्राजापत्यं हि तत्, प्रजोत्पत्त्यर्थमित्यर्थः । ऋतुगमनं सर्वथा कार्यमिति तेषामभिप्रायः, अगमने दोषश्रवणात् —

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥

इति । अत्रोपाकृत्याध्ययने ऽभ्युपगमनस्य विकल्पेन विधानात् समावृत्तगृहस्थसाधारणं अध्ययनम् । अत एव गृहस्थस्यापि इदमध्ययनमाह **गोभिलः** —

उपाकर्मोत्सर्जनं च वनस्थानामपीष्यते । धारणाध्ययनांगत्वाद्गृहिणां ब्रह्मचारिणाम् ॥
उत्सर्जनं च वेदानामुपाकरणकर्म च । अकृत्वा वेदजप्येन फलं नाप्नोति मानवः ॥ इति ।

यदुक्तं पूषानुमन्त्रणमन्त्रवदुत्कर्ष इति तन्न, उदाहृतसूत्रस्मृत्यादिपर्यालोचनया गृहस्थब्रह्मचारिसाधारण्येन उपाकर्मविधानावगमेन गार्हस्थ्यप्रकरणादुत्कर्षस्यायुक्तत्वात् । तस्माद्गृहस्थानामप्युपाकरणं धर्मः । अतः सर्वेऽप्युक्तकालेषु उपाकर्म कृत्वाधीयीरन्निति ।

वृत्ता यात्रा नरेन्द्राणां सेनापतिनिवर्तने ।
वैराणि चैव मार्गाश्च सलिलेन समीकृताः ॥

निवृत्तकर्मायतनो नूनं संचितसंचयः ।
आषाढीमभ्युपगतो भरतः कोसलाधिपः ॥

अनेन वार्षिकेषु चतुर्ष्वपि मासेषु यैः पदार्थैः सुखं वसेत्तान् पदार्थानष्टसु मासेषु पूर्वमेव संपादयेदिति सूचितम् । तथाच **भारते** —

अष्टमासेन तत्कुर्याद्येन वर्षाः सुखं वसेत् । पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ॥
दिवैव कर्म तत्कुर्याद्येन रात्रौ सुखं वसेत् । इह जन्मनि तत्कुर्याद्येन प्रेत्य सुखं वसेत् ॥ इति ।

अपिचातिपरिक्लिष्टं चिराद्दारैः समागतम् ।
आत्मकार्यगरीयस्त्वाद्वक्तुं नेच्छामि वानरम् ॥

अनेन महापुरुषाः स्वकार्यविरोधे सत्यपि परहितमेवाचरन्तीति सूचितम् । तथाच **प्राचीनाः** —

एते सत्पुरुषाः परार्थघटकाः स्वार्थान्परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं के ते न जानीमहे ॥ इति ।

एकोनविंशे — ततः प्रविश्य गुहां अनवरतक्रीडासक्तमानसं मन्त्रिषु न्यस्त-राज्यतन्त्रं हरिराजं, निर्मलं गगनं चावलोक्य राममहिषीगवेषणासमयातिक्रमशंकया —

प्रसाद्य वाक्यैर्मधुरैर्हेतुमद्भिर्मनोरमैः ।
हितं तत्वं च पथ्यं च सामधर्मार्थनीतिमत् ॥

प्रणयप्रीतिसंयुक्तं विश्वासकृतनिश्चयम् ।
हरीश्वरमुपागम्य हनुमान्वाक्यमब्रवीत् ॥

अनेन कामवृत्तो राजा समये न्यायोपबृंहितैः वचनैः सचिवैः प्रबोधनीय इति सूचितम् । तथाच **कामन्दके**—

कृतविद्यो हि बलिना व्यक्तं रागेण रंज्यते । रागानुरक्तचित्तस्सन् किन्न कुर्यादसांप्रतम् ॥
पश्यन्नपि भवत्यन्धः पुमान्रागावृतेक्षणः । सुहृद्वैद्याश्चिकित्सन्ति निर्मलैर्विनयांजनैः ॥
रागमानमदान्धस्य स्खलतः पृथिवीपतेः । हस्तावलम्बो भवति सुहृत्सचिवचेष्टितम् ॥ इति

प्राप्तं राज्यं यशश्चैव कौली श्रीरभिवर्धिता ।
मित्राणां संग्रहः शेषः तद्भवान् कर्तुमर्हति ॥

कर्तुं दाशरथेः प्रीतिमाज्ञायां किं न सज्जसे ।
यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ॥

तस्य राज्यं च कीर्तिश्च प्रतापश्चाभिवर्धते ।

अत्र मित्रसंग्रह इत्यनेन नूतनमित्रसंग्रहो न प्रतिपाद्यते, अपि तर्हि संपादितमैत्रीरक्षणाय तत्प्रीत्याचरणमेव कर्तव्यमित्युक्तम् । तथा च **कामन्दकः** —

दूरादेवानुगमनं स्पष्टार्थहृदयानुगा । वाक् संहत्प्रदानं च त्रिविधो मित्रसंग्रहः ॥ इति ।

यस्य कोशश्च दण्डश्च मित्राण्यात्मा च भूमिप ।
सममेतानि सर्वाणि स राज्यं महदश्नुते ॥

अत्र कोशदण्डमित्रात्मनां संहतानामेव राज्यहेतुत्वमुक्त्वा पुनस्सर्वाणीत्युक्त्या अनुक्तममात्यादिकमपि गृह्यते, तेन विना महाराज्यश्रेयोनवाप्तेः । तथा च **कामन्दके**—
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते । एकांगेनापि विकलमेतत्साधु न वर्तते ॥

तस्य सामर्थ्यमन्विच्छन् कुर्वीताशु परीक्षणम् ।
इति स्म राज्यं सकलं समीरितं परा प्रतिष्ठास्य धनं सुसाधनम् ।
गृहीतमेतन्निपुणेन मन्त्रिणा त्रिवर्गनिष्पत्तिमुपैति शाश्वतीम् ॥
यथान्तरात्मा प्रकृतीरधिष्ठितश्चराचरं विश्वमिदं समश्नुते ।

तथा नरेन्द्रः प्रकृतीरधिष्ठितश्चराचरं विश्वमिदं समश्नुते ॥
प्रकृतिभिरतिसम्यगन्वितो जनपदमादरवांस्तु पालयेत् ।
जनपदपरिपालनाच्चिरं स्पृशति नरः परमं श्रियः पदम् ॥ इति ।

तानि च राज्याङ्गानि **मनुराह** —

स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा । सप्त प्रकृतयो ह्येतास्सप्तांगं राज्यमुच्यते ॥इति

तद्भवान्वृत्तसंपन्नः स्थितः पथि निरत्यये ।
मित्रार्थमभिनीतार्थं यथावत्कर्तुमर्हति ॥

सन्त्यज्य सर्वकार्याणि मित्रार्थे योऽनुवर्तते ।
संभ्रमादिकृतोत्साहः सोनर्थैर्नावरुध्यते ॥

यस्तु कालव्यतीतेषु मित्रकार्येषु वर्तते ।
स कृत्वा महतोऽप्यर्थानमित्रार्थेन युज्यते ॥

यदिदं वीर कार्यं नो मित्रकार्यमरिन्दम ।
क्रियतां राघवस्यैतद्वैदेह्याः परिमार्गणम् ॥

तदिदं वीर कार्यं ते कालातीतमरिन्दम ।
न च कालमतीतं ते निवेदयति कालवित् ॥

अनेन कार्यकालातिपाते महाननर्थ उचितकालकरणे श्रेयश्च भवतीति सूचितम् ।
तथा च **कामन्दकः** —
नातीयात्कार्यकालं हि कृत्वा मन्त्रविनिश्चयम् । अतिक्रान्तं तु संभूयो यथायोगं प्रकल्पयेत् ।
न कार्यकालं मतिमानतिक्रामेत्कदाचन । कथंचिदेव भवति कार्ययोगस्सुदुर्लभः ॥
सतां मार्गेण मतिमान् काले कर्म समाचरेत् । काले समाचरन् साधू रसवत्फलमश्नुते ॥इति ।

त्वरमाणोऽपि सन् प्राज्ञः तव राजन्वशानुगः ।
कुलस्य हेतुः स्फीतस्य दीर्घबन्धुश्च राघवः ॥

अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः ।
तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव ॥

हरीश्वर हरिश्रेष्ठानाज्ञापयितुमर्हसि ।
अकर्तुरपि कार्यस्य भवान्कर्ता हरीश्वर ॥

किं पुनः प्रतिकर्तुस्ते राज्येन च धनेन च ।
कामं खलु शरैः शक्तः सुरासुरमहोरगान् ॥

वशे दाशरथिः कर्तुं त्वत्प्रतिज्ञां तु कांक्षते ।
प्राणत्यागाविशंकेन कृतं तेन तव प्रियम् ॥

तस्य मार्गाम वैदेहीं पृथिव्यामपि चांबरे ॥ इति ।

अनेन कृतोपकारस्य गुणाढ्यस्य कार्यं कालानतिक्रमेण सर्वप्रकारेणापि साधनीयम् । अधर्मिष्ठस्य तु मित्रकार्यमुपेक्षणीयमिति सूचितम् । तथाच **कामन्दके**—

अधर्मद्रोहसंयुक्ते मित्रजात उपेक्षणम् । आत्मवन्मित्रवर्गे तु प्राणानपि परित्यजेत् ॥ इति । प्राणैरप्युपकारित्वं मित्रायाव्यभिचारिणे । गृहागते परिष्वङ्गः शक्त्या दानं सहिष्णुता ॥

परार्थं देशकालज्ञो देशे काले च साधयेत् । इति च । **राजधर्मेऽपि**—

न हि राज्ञा प्रमादो वै कर्तव्यो मित्ररक्षणे । प्रमादिनं हि राजानं लोकाः परिभवन्त्युत ॥इति ।

सुग्रीवोऽपि हनुमद्वचनमाकर्ण्य सकलवानरानयनाय नीलप्रमुखान् सेनानायकानादिश्य स्वयमपि गुहां प्रविवेश ।

त्रिंशे—

गुहां प्रविष्टे सुग्रीवे विमुक्ते गगने घनैः ।
वर्षरात्रोषितो रामः कामशोकाभिपीडितः ॥

पाण्डुरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम् ।
शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥

कामवृत्तं च सुग्रीवं नष्टां च जनकात्मजाम् ।
बुध्वा कालमतीतं च मुमोह परमातुरः ॥

सतु संज्ञामुपागम्य मुहूर्तं मतिमान् पुनः ।
मनस्स्थामपि वैदेहीं चिन्तयामास राघवः ॥

आसीनः पर्वतस्याग्रे हेमधातुविभूषिते ।
शारदं गगनं दृष्ट्वा जगाम मनसा प्रियाम् ॥

दृष्ट्वा च विमलं व्योम गतविद्युद्बलाहकम् ।
सारसारावसंघुष्टं विललापार्तया गिरा ॥

सारसारवसन्नादैः सारसारावनादिनी ।
याऽऽश्रमे रमते बाला साद्य मे रमते कथम् ॥

पुष्पितांश्चासनान्दृष्ट्वा कांचनानिव निर्मलान् ।
कथं सा रमते बाला पश्यन्ती मामपश्यती ॥

या पुरा कलहंसानां स्वरेण कलभाषिणी ।
बुध्यते चारु सर्वांगी साद्य मे बुध्यते कथम् ॥

निस्वनं चक्रवाकानां निशम्य सहचारिणाम् ।
पुण्डरीकविशालाक्षी कथमेषा भविष्यति ॥

सरांसि सरितो वापि काननानि वनानि च ।
तां विना मृगशावाक्षीं चरन्नाद्य सुखं लभे ॥

अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीम् ।
न दूरं पीडयेत्कामः शरद्गुणनिरन्तरः ॥

एवमादि नरश्रेष्ठो विललाप नृपात्मजः ।
विहंग इव सारंगः सलिलं त्रिदशेश्वरात् ॥

ततस्संचार्य रम्येषु फलार्थी गिरिसानुषु ।
ददर्श पर्युपावृत्तो लक्ष्मीवाँल्लक्ष्मणोऽग्रजम् ॥

तं चिन्तया दुःसहया परीतं निःसंज्ञमेकं विजने मनस्वी ।
भ्रातुर्विषादात्परितापदीनः समीक्ष्य सौमित्रिरुवाच रामम् ॥

किमार्य कामस्य वशं गतेन किमात्मपौरुष्यपराभवेन ।
अयं यदा संह्रियते समाधिः किमत्र योगेन निवर्तितेन ॥

क्रियाभियोगं मनसः प्रसादं समाधियोगानुगतं च कालम् ।
सहायसामर्थ्यमदीनसत्व स्वकर्महेतुं च कुरुष्व हेतुम् ॥

न जानकी मानववंशनाथ त्वया सनाथा सुलभा परेण ।
नचाग्निचूडां ज्वलितामुपेत्य न दह्यते वीरवरार्ह कश्चित् ॥

सुलक्षणं लक्ष्मणमप्रधृष्यं स्वभावजं वाक्यमुवाच रामः ।
हितं च पथ्यं च नयप्रसक्तं ससाम धर्मार्थसमाहितं च ॥

निस्संशयं कार्यमवेक्षितव्यं क्रियाविशेषो ह्यनुवर्तितव्यः ।

नतु प्रवृत्तस्य दुरासदस्य कुमार कार्यस्य फलं न चिन्त्यम् ॥

अथ पद्मपलाशाक्षीं मैथिलीमनुचिन्तयन् ।
उवाच लक्ष्मणं रामो मुखेन परिशुष्यता ॥

तर्पयित्वा सहस्राक्षस्सलिलेन वसुन्धराम् ।
निवर्तयित्वा सस्यानि कृतकर्मा व्यवस्थितः ॥

अनेन इन्द्रप्रेरिता मेघाः वर्षन्तीति सूचितम् । तथाच **हरिवंशे —**

दुदोह स विभुर्गा वै शक्रो दिव्याः पयस्वलाः ।
ताः क्षरन्ति नवं क्षीरं मेध्यं मेघौघधारितम् ॥ इति ।

स्निग्धगम्भीरनिर्घोषा शैलद्रुमपुरोगमाः ।
विसृज्य सलिलं मेघाः परिश्रान्ता नृपात्मज ॥

नीलोत्पलदलश्यामाः श्यामीकृत्वा दिशो दश ।
विमदा इव मातङ्गाः शान्तवेगाः पयोधराः ॥

जलगर्भा महावेगाः कुटजार्जुनगन्धिनः ।
चरित्वा विरतास्सौम्य वृष्टिवातास्समुद्यताः ॥

घनानां वारणानां च मयूराणां च लक्ष्मण ।
नादः प्रस्रवणानां च प्रशान्तस्सहसानघ ॥

अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः ।
अनुलिप्ता इवाभान्ति गिरयश्चन्द्ररश्मिभिः ॥

दर्शयन्ति शरन्नद्यः पुलिनानि शनैश्शनैः ।
नवसंगमसव्रीडा जघनानीव योषितः ॥

अत्र प्रियेण सह वने संगमसमयसमुदितया लज्जया शनैश्शनैर्जघनमिव कामिनी शरन्नद्यः पुलिनानि दर्शयन्तीत्युक्तम् । अत्र नवोढाविशेषः उपमानम् । तथाहि — नवोढास्तिस्रः केवलनवोढा, विस्रब्धनवोढा, अतिविस्रब्धनवोढा चेति । तत्र केवलनवोढा यथा —

हस्ते धृतापि शयने विनिवेशितापि क्रोडीकृतापि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या यः पारदं स्थिरयितुं क्षमते करेण ॥इति ।

विस्रब्धनवोढा यथा —

दरमुकुलितनेत्रपालिनीवीनियमितबाहुकृतोरुयुग्मबन्धम् ।
करकलितकुचस्थलं नवोढा स्वपिति समीपमुपेत्य कस्य यूनः ॥ इति ।

अतिविस्रब्धनवोढा यथा —

स्वप्ने प्रियाननविलोकनहानिरेव स्वापच्युतौ प्रियकरग्रहणप्रसंगः ।
इत्थं सरोरुहमुखी परिचिन्तयन्ती स्वापं विधातुमपि हातुमपि प्रपेदे ॥ इति ।

अत्रातिविस्रब्धनवोढैवोपमानम् ।

शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणाम् ।
लीलासु चैवोत्तमवारणानां श्रियं विभज्याद्य शरत्प्रवृत्ता ॥

संप्रत्यनेकाश्रयचित्रशोभा लक्ष्मीः शरत्कालगुणोपनीता ।
सूर्याग्रहस्तप्रतिबोधितेषु पद्माकरेष्वभ्यधिकं विभाति ॥

अभ्यागतैश्चारुविशालपक्षैः सरःप्रियैः पद्मरजोवकीर्णैः ।
महानदीनां पुलिनोपयातैः क्रीडन्ति हंसाः सह चक्रवाकैः ॥

मदप्रगल्भेष्वपि वारणेषु गवां समूहेषु च दर्पितेषु ।
प्रसन्नतोयासु च निम्नगासु विभाति लक्ष्मीर्बहुधा विभक्ता ॥

नभः समीक्ष्यांबुधरैर्विमुक्तं विमुक्तबर्हाभरणा वनेषु ।
प्रियास्वरक्ता विनिवृत्तशोभा गतोत्सवा ध्यानपरा मयूराः ॥

मनोज्ञगन्धैः प्रियकैरनल्पैः पुष्पातिभारावनताग्रशाखैः ।
सुवर्णगौरैर्नयनाभिरामैरुद्योतितानीव वनान्तराणि ॥

प्रियान्वितानां नलिनीप्रियाणां वने रतानां कुसुमोद्धतानाम् ।
मदोत्कटानां मदलालसानां गजोत्तमानां गतयोऽद्य मन्दाः ॥

अनेन शरदि गजानां मदोद्रेकः सूचितः । तथाच **कालिदासः** —

प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः । असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ इति ।

व्यभ्रं नभः शस्त्रविधौतवर्णं कृशप्रवाहानि नदीजलानि ।
कल्हारशीताः पवनाः प्रवान्ति तमोविमुक्ताश्च दिशः प्रकाशाः ॥

सूर्यातपक्रामणनष्टपङ्का भूमिस्समुत्पादितसान्द्ररेणुः ।

अन्योन्यवैरेण समायुतानामुद्योगकालोऽद्य नराधिपानाम् ॥

शरद्गुणाप्यायितरूपशोभाः प्रहर्षिताः पांसुसमुक्षितांगाः ।
मदोत्कटास्संप्रति युद्धलुब्धा वृषा गवां मध्यगता नदन्ति ॥

अनेन शरदि गवां मदोद्रेको भवतीति सूचितम्। तथाच शरद्वर्णनावसरे **कालिदासः —**

मदोदग्राः ककुद्मन्तः सरितां कुलमुद्रुजः। लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ इति।

समन्मथं तीव्रतरानुरागाः कुलान्विता मन्दगतिं करेण्वः ।
मदान्वितं सम्परिवार्य यान्तं वनेषु भर्तारमनुप्रयान्ति ॥

त्यक्त्वा वराण्यात्मविभूषणानि बर्हाणि तीरोपगता नदीनाम् ।
निर्भर्त्स्यमाना इव सारसौघैः प्रयान्ति दीना विमदा मयूराः ॥

चित्रास्यकारण्डवचक्रवाका महारवैर्भिन्नघटा गजेन्द्राः ।
सरस्सु बद्धांबुजभूषणेषु विक्षोभ्य विक्षोभ्य जलं पिबन्ति ॥

व्यपेतपङ्कासु सवालुकासु प्रसन्नतोयासु सगोकुलासु ।
ससारसारावविनादितासु नदीषु हृष्टा निपतन्ति हंसाः ॥

नदीघनप्रस्रवणोदकानां अतिप्रवृद्धानिलबर्हिणानाम् ।
प्लवङ्गमानां च गतोत्सवानां द्रुतं रवाः संप्रति संप्रनष्टाः ॥

अनेकवर्णासु विमृष्टकायाः नवोदितेष्वंबुधरेषु नष्टाः ।
क्षुधार्दिता घोरविषा बिलेभ्यश्चिरोदिता विप्रसरन्ति सर्पाः ॥

रात्रिः शशांकोदितसौम्यवक्त्रा तारागणोन्मीलितचारुनेत्रा ।
ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृतांगी ॥

विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता सारसचारुपंक्तिः ।
नभस्समाक्रामति शीघ्रवेगा वातावधूतग्रथितेव माला ॥

सुप्तैकहंसं कुमुदैरुपेतं महाह्रदस्थं सलिलं विभाति ।
घनैर्विमुक्तं निशि पूर्णचन्द्रं तारागणाकीर्णमिवान्तरिक्षम् ॥

प्रकीर्णहंसाकुलमेखलानां प्रबुद्धपद्मोत्पलमालिनीनाम् ।
वाप्युत्तमानामधिकाद्य लक्ष्मीर्वरांगनानामिव भूषितानाम् ॥

वेणुस्वनव्यञ्जिततूर्यमिश्रः प्रत्यूषकालेऽनिलसंप्रवृत्तः ।

संमूर्च्छितो घर्घरगोवृषाणामन्योन्यमापूरयतीव शब्दः ॥

नवैर्नदीनां कुसुमप्रहासैः व्याधूयमानैर्मृदुमारुतेन ।
धौतामलक्षौमपटप्रकाशैः कूलानि काशैरुपशोभितानि ॥

वनप्रचण्डा मधुपानशौण्डाः प्रियान्विताः षट्चरणाः प्रहृष्टाः ।
वनेषु मत्ताः पवनानुयात्रां कुर्वन्ति पद्माननरेणुगौराः ॥

जलं प्रसन्नं कुमुदं प्रभासं क्रौञ्चस्वनच्छालिवनं विपक्वम् ।
मृदुश्च वायुर्विमलश्च चन्द्रः शंसन्ति वर्षाव्यपनीतकालम् ॥

मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोऽद्य मन्दाः ।
कान्तोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनीनाम् ॥

अनेककान्तोपभुक्तानां कामिनीनां अलसभावेन मन्दगमनमिव शरन्नदीनामपि कार्श्येन मन्दगमनं शोभावहमिति गम्यते । तथाच **प्राचीनाः** —

मणिश्शाणोल्लीढः समरविजयी हेतिदलितः मदक्षीणो नागः शरदि सरिदाश्यानपुलिना ।
कलाशेषश्चन्द्रस्सुरतमृदिता बालवनिता तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नृपाः ॥ इति

सचक्रवाकानि सशैवलानि काशैर्दुकूलैरिव संवृतानि ।
सपत्रलेखानि सरोचनानि वधूमुखानीव नदीमुखानि ॥

प्रफुल्लबाणासनचित्रितेषु प्रहृष्टषट्पादनिकूजितेषु ।
गृहीतचापोद्यतचण्डदण्डः प्रचण्डचारोऽद्य वनेषु कामः ॥

लोकं सुवृष्ट्या परितोषयित्वा नदीस्तटाकानि च पूरयित्वा ।
निष्पन्नसस्यां वसुधां च कृत्वा त्यक्त्वा नभस्तोयधराः प्रनष्टाः ॥

प्रसन्नसलिलाः सौम्य कुररीभिर्विनादिताः ।
चक्रवाकगणाकीर्णाः विभान्ति सलिलाशयाः ॥

शरच्चन्द्रकरस्पर्शाद्धर्षोन्मीलिततारका ।
अहो रागवती सन्ध्या जहाति स्वयमम्बरम् ॥

अत्र प्रियस्य दर्शनजनितानन्देन अनुरागिणी सन्ध्या स्वयमंबरं जहातीति कथनात्प्रगल्भा नायिका सूचिता । तल्लक्षणं च **रससञ्जर्याम्** — पतिमात्रविषयकेलिकलापकोविदात्वं, सा च द्विविधा—रतिप्रीतिमती, आनन्दात्सम्मोहवती चेति—तत्र प्रथमा यथा—

संस्पृश्य स्तनमाकलय्य वदनं संश्लिष्य कण्ठस्थलं
निष्पीड्याधरबिंबमम्बरमपाकृष्य व्युदस्यालकम् ।
देवस्यांबुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसनाञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते ॥

द्वितीया यथा —

नखक्षतमुरःस्थलेऽधरदले रदस्य व्रणं
च्युता वकुलमालिका विगलिता च मुक्तावलिः ।
रतान्तसमये मया सकलमेतदालोकितं
स्मृतिः क्व च रतिः क्व च क्व च तवालि शिक्षविधिः ॥ इति ।

उभयविधाप्येकेन पद्येन प्रतिपादितामरुकविना —

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धना-
द्वासो विश्लथमेखलागुणधृतं किंचिन्नितम्बे स्थितम् ।
एतावत्सखि वेद्मि सांप्रतमहं तस्यांगसंगे पुनः
कोऽसौ कास्मि रतं तु कीदृशमभूत्स्वल्पापि मे न स्मृतिः ॥ इति ।

सूर्यातपक्रामणनष्टपङ्का भूमिस्समुत्पादितसान्द्ररेणुः ।
अन्योन्यवैरेण समायुतानामुद्योगकालोऽद्य नराधिपानाम् ॥

अन्योन्यं बद्धवैराणां जिगीषुणां नृपात्मज ।
नच पश्यामि सुग्रीवमुद्योगं वा तथाविधम् ॥

अनेन राज्ञां जयार्थमुद्योगकालः शरत्काल इत्युक्तम् । तथाच शरत्कालमधिकृत्य **हरिवंशे —**

नीराजयित्वा सैन्यानि प्रयान्ति विजिगीषवः ।
अन्योन्ययात्राभिमुखाः प्रयान्ति पृथिवीक्षितः ॥ इति ।

चत्वारो वार्षिका मासा गता वर्षशतोपमाः ।
मम शोकाभितप्तस्य सौम्य सीतामपश्यतः ॥

चक्रवाकीव भर्तारं पृष्ठतोऽनुगता वनम् ।

विषमं दण्डकारण्यमुद्यानमिव चांगना ॥

प्रियाविहीने दुःखार्ते वने सौम्य विवासिते ।
कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥

अनाथो हृतराज्योऽयं रावणेन च धर्षितः ।
दीनो दूरगृहः कामी मां चैवा शरणं गतः ॥

इत्येतैः कारणैस्सौम्य सुग्रीवस्य दुरात्मनः ।
अहं वानरराजस्य परिभूतः परंतप ॥

अनेन दुरात्मा पुरुषः समर्थमपि नरमेतैः कारणैः परिभूतं मन्यत इति प्रतिपादितम् । तथाच प्राचीनाः —

तुल्येऽपराधे स्वर्भानुः भानुमन्तं चिरेण तु । हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥

स कालं परिसंख्याय सीतायाः परिमार्गणे ।
कृतार्थः समयं कृत्वा दुर्मतिर्नाविबुध्यते ॥

त्वं प्रविश्य च किष्किन्धां ब्रूहि वानरपुङ्गवम् ।
मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥

अर्थिनामुपपन्नानां पूर्वं चाप्युपकारिणाम् ।
आशां संश्रुत्य यो हन्ति स लोके पुरुषाधमः ॥

शुभं वा यदि वा पापं यो हि वाक्यमुदीरितम् ।
सत्येन परिगृह्णाति स वीरः पुरुषोत्तमः ॥

कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥

नूनं काञ्चनपृष्ठस्य विकृष्टस्य मया रणे ।
द्रष्टुमिच्छति चापस्य रूपं विद्युद्गुणोपमम् ॥

घोरं ज्यातलनिर्घोषं क्रुद्धस्य मम संयुगे ।
निर्घोषमिव वज्रस्य पुनस्संश्रोतुमिच्छति ॥

काममेवंगतेऽप्यस्य परिज्ञाते पराक्रमे ।
त्वत्सहायस्य मे वीर नचिन्ता स्यान्नृपात्मज ॥

समयं नाभिजानाति कृतार्थः प्लवगेश्वरः ।
वर्षासमयकालं तु प्रतिज्ञाय हरीश्वरः ॥

व्यतीतांश्चतुरो मासान् विहरन्नावबुध्यते ।
सामात्यपरिषत्क्रीडन्मौनमेवोपसेवते ॥

शोकदीनेषु नास्मासु सुग्रीवः कुरुते दयाम् ।
उच्यतां गच्छ सुग्रीवस्त्वया वत्स महाबलः ॥

मम रोषस्य यद्रूपं ब्रूयाश्चैनमिदं वचः ।
न च संकुचितः पन्था येन वाली हतो गतः ।
समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥

एक एव रणे वाली शरेण निहतो मया ।
त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् ॥

तदेवं विहिते कार्ये यद्धितं पुरुषर्षभ ।
तत्तद्ब्रूहि नरश्रेष्ठ त्वर कालव्यतिक्रमः ॥

कुरुष्व सत्यं मम वानरेश्वर प्रतिश्रुतं धर्ममवेक्ष्य शाश्वतम् ।
मा वालिनं प्रेतगतो यमक्षयं त्वमद्य पश्येः मम चोदितैः शरैः ॥

स पूर्वजं तीव्रविवृद्धकोपं लालप्यमानं प्रसमीक्ष्य दीनम् ।
चकार तीव्रां मतिमुग्रतेजा हरीश्वरे मानववंशवर्धनः ॥ इति ।

एकत्रिंशस्सर्गः—तदनु भ्रातृक्लेशमसहमानो लक्ष्मणः तं रामभद्रमित्थमवोचत् – पानमदेन ग्राम्यसुखासक्तो दुर्वृत्तस्सुग्रीवः—

हतोऽग्रजं पश्यतु वीर वालिनं न राज्यमेवं विगुणस्य देयम् ।

अनेन गुणरहितस्य राज्यं न देयमिति सूचितम् । पुत्रश्चापि गुणरहितो राज्यानर्ह इत्ययमर्थ **अयोध्याकाण्डे** प्रतिपादितः ॥

तमसत्यसन्धं वानरेन्द्रं मच्छरनिकृत्तशिरसं अग्रजनिकटं प्रेषयिष्यामि, अभिषिक्तेन वालितनयेन जनकतनयान्वेषणं अचिरादेवास्माकं भवितेति कोपेन वदन्तं लक्ष्मणं श्रीरामभद्र इत्थमवोचत् —

नहि वै त्वद्विधो लोके पापमेवं समाचरेत् ।

पापमार्येण यो हंति स वीरः पुरुषोत्तमः ॥

अनेन महापुरुषैः पापाधायकः क्रोधः परिहर्तव्य इति सूचितम्। तथाचा-**नुशासनिके —**

यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते। तेजस्विनं तं विद्वांसं मन्यन्ते तद्विदो जनाः ॥
यश्च नित्यं जितक्रोधो विद्वानुत्तमपूरुषः। प्रभाववानपि नरस्तस्य लोकास्सनातनाः ॥

इच्छद्भिः परमं श्रेय इह चामुत्र चोत्तमम्।
तं क्रोधं वर्जितं धीरैः कथमस्मद्विधश्चरेत् ॥ इति।

अत एव पञ्चत्रिंशे रोषः परिहर्तव्य इति लक्ष्मणं प्रति रामवचनम् —

नच रोषवशं तात गन्तुमर्हसि लक्ष्मण। तां प्रीतिमनुवर्तस्व पूर्ववृत्तं च संगतम् ॥

अनेनाविचार्य मित्रपरित्यागो दण्डपातनं वा न कर्तव्यमिति सूचितम्। तथा च **कामन्दके —**

मित्रं विचार्य बहुशो ज्ञातदोषं विवर्जयेत्। त्यजन्नभूतदोषं हि धर्मार्थावुपहंति सः ॥
स्वयं ज्ञातेषु दण्डेषु शस्यते दण्डपातनम्। नह्यविज्ञाततत्वस्सन् कोपं कुर्यात्कथञ्चन ॥
भुजङ्गमिव मन्यन्ते निर्दोषक्रोधिनं जनाः। इति।

सामोपहितया वाचा रूक्षाणि परिवर्जयन्।
वक्तुमर्हसि सुग्रीवं व्यतीतं कालपर्यये ॥

अनेनानर्थमूलभूतं परुषवचनं परिहृत्य साम्नैव व्यवहर्तव्यमिति सूचितम्। तथा-**चोद्योगे** विदुरः —

अभ्यावहति कल्याणं विविधा वाक् सुभाषिता। सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥इति

कामन्दकेऽपि —

वाक्पारुष्यं परं लोके उद्वेजनमनर्थकम्। न कुर्यात्प्रियया वाचा प्रकुर्याज्जगदात्मसात् ॥
हृदये वागसिस्तीक्ष्णो मर्मछेदी पतन्मुहुः। तेजस्विनो दीपयति स दीप्तो याति वैरताम् ॥
नोद्वेजयेज्जगद्वाचा रूक्षया प्रियवाग्भवेत्। प्रायेण प्रियवाक्कर्मा कृपणोऽपि हि सेव्यते ॥
ह्लादिनी सर्वसत्वानां सम्यग्जनजिहीर्षया। भावयन्परमां मैत्रीं विसृजेल्लौकिकीं गिरम् ॥
नित्यं मनोऽपहारिण्या वाचा प्रह्लादयेज्जगत्। उद्वेजनीयो भवति क्रूरवाग्धनदोऽपि सन् ॥

हृदि विद्ध इवात्यर्थं यया सन्तप्यते जनः । पीडितोऽपि हि मेधावी न तां वाचमुदीरयेत् ॥
तीव्राण्युद्वेगकारीणि विमृष्टान्यशमात्मकैः । कृन्तन्ति देहिनां मर्म शास्त्राणि च वचांसि च ॥
प्रियमेवाभिधातव्यं नित्यं सत्सु द्विषत्सु च । शिखीव केकामधुरः प्रियवाक्कस्य न प्रियः ॥ इति।

इति रामसमाज्ञप्तो लक्ष्मणः परिगृह्य शरासनं किष्किन्धां गच्छन्नेव मध्येमार्गं स्वावलोकनेन करधृतशैलशृङ्गान् युद्धसन्नद्धावस्थितान् वानरानवलोक्य प्रवृद्धतरकोपेन अनल्पकल्पानलकल्पो निखिलमपि लोकं निर्दहन्निव वानरनिवासभूतां किष्किन्धां प्रविवेश। ततश्च वानराः

क्रोधमागमनं चैव लक्ष्मणस्य न्यवेदयन् ।
तारया सहितः कामे सक्तः कपिवरो रहः ॥

न तेषां कपिवीराणां शुश्राव वचनं तदा । इति ।

नन्वत्र सुग्रीवस्तारया सङ्गत इति प्रतीयते, तथा —

रामप्रसादात्कीर्तिं च कपिराज्यं च शाश्वतम् । प्राप्तवानेष सुग्रीवो रुमां मां च परंतप ॥

इति लक्ष्मणं प्रति तारावाक्येन, 'राज्यं च सुमहत्प्राप्तं तारा च रुमया सह' इति रामं प्रति सुग्रीववाक्येन च तथैव प्रतीयते। तदेतदयुक्तं, परपुरुषगमनस्य स्त्रीणां निषिद्धत्वाद्भर्त्रनतिक्रमणे महाफलश्रवणाच्च । तथा च परपुरुषगमनस्य निषिद्धत्वे **मनुः** —

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः । नच नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥
यस्मै दद्यात्पिता त्वेनां भ्राता वानुमते पितुः । तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत् ॥

व्यभिचारात्तु भर्तुः स्याल्लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥ इति ।

स्त्रीणां भर्त्रनतिक्रमणस्य महाफलत्वेऽपि **मनुः** —

पतिं या नाभिचरति मनोवाग्देहसंयता । सा भर्तृलोकानाप्नोति सद्भिः साध्वीति चोच्यते ॥
आसीतामरणात्क्षान्ता नियता ब्रह्मचारिणी । यो धर्म एकपत्नीनां कांक्षन्ती तमनुत्तमम् ॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्यव्रते स्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥
अनेन नारीवृत्तेन मनोवाग्देहसंयता । इहाग्र्यां कीर्तिमाप्नोति परलोकं परत्र च ॥ इति ।

तस्मात्ताराकृतं परपुरुषगमनमयुक्तमेव ॥

तथा सुग्रीवस्यापि तारया सहोपभोगो न युक्तः, तथाहि—स चोपभोगः केवलो

वा विवाहपूर्वको वा, तत्र नतावदाद्यः परदारोपभोगस्य निषिद्धत्वात्। तथा च **विष्णुपुराणे**—

परदारान्न गच्छेत मनसापि कदाचन। किमु वाचाक्षिबन्धोपि न तेष्वस्ति व्यवायिनाम्॥
मृतो नरकमभ्येति हीयतेत्रापि चायुषः। परदाररतिः पुंसामुभयत्रापि भीतिदा॥ इति॥

तथा **चापस्तम्बोऽपि**—सवर्णायामन्यपूर्वायां सकृन्निपाते पादः पततीत्युपदिशन्तीत्येवमभ्यासे पादः पादश्चतुर्थे सर्वमिति॥

न द्वितीयः अन्यपूर्वायास्तारायाः पुनर्भूत्वेन तद्विवाहस्य निन्दितत्वात्। तथाच **काश्यपः**—

सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः। वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला॥
उदकस्पर्शिता या च या च पाणीगृहीतिका। अग्निं परिगता या च पुनर्भूप्रसवा च या॥
इत्येताः काश्यपेनोक्ताः दहन्ति कुलमग्निवत्। इति।

बौधायनमपि—वाग्दत्ता च मनोदत्ता दत्ताग्निं च परीगता सप्तमं वा पदं नीता भुक्ता गृहीतभर्तृका चेति सप्तविधा पुनर्भूः तां गृहीत्वा न धर्मं विन्देदिति॥

याज्ञवल्क्योपि अन्यपरिगृहीताविवाहं पुनर्भूविवाहत्वेन निन्दितवान्—'अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनरिति'। **नारदोऽपि**—

कन्यैवाक्षतयोनिर्या पाणिग्रहणपूर्विका। पुनर्भूप्रतिमा ज्ञेया पुनस्संस्कारकर्मणि॥ इति।

तस्मात्पुनर्विवाहपूर्वकोपभोगोऽपि न युक्तः। किंच ज्येष्ठभ्रातृभार्यायाः तारायाः मातृतुल्यत्वेन तद्गमने गुरुतल्पगमनदोषप्रसङ्गः। तथा च **संवर्तः**—

पितृव्यदारगमने भ्रातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्यान्निष्कृतिर्नान्यथा भवेत्॥ इति।

मनुरपि—

अगम्यागमनं यस्तु व्रतैरेभिरपानुदेत्। गुरुतल्पव्रतं कुर्याद्रेतःसिक्त्वान्ययोनिषु॥
सख्युः पुत्रस्य च स्त्रीषु कुमारीष्वन्त्यजासु च। पैतृष्वसेयभगिनीं स्वस्रीयां मातुरेव च॥
भ्रातुश्च भ्रातुराप्तां च गत्वा चान्द्रायणं चरेत्।
एताः स्त्रियस्तु भार्यार्थे नोपयच्छेत बुद्धिमान्॥ इति।

आपस्तम्बोऽपि अथ पतनीयानीत्युपक्रम्याह—'गुर्वीं सखीं गुरुसखीं च गत्वा अन्यांश्च गुरुतल्पानीति'। **नारदोऽपि**—

माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसापि। तृव्यसखिशिष्यस्त्री भ्रातुस्सख्युश्च हि स्नुषा ॥
दुहिता चार्यभार्या च स्वगोत्रशरणागता। राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गत्वा गुरुतल्पग उच्यते ॥ इति।

तस्मान्मातृतुल्यायास्तारायाः विवाहपूर्वको वा केवलो वा सुग्रीवकृत उपभोगः ताराकृतपरपुरुषसङ्गमश्च अयुक्त इति चेत्, अत्रोच्यते—न तावत्तारायाः पुरुषान्तरपरिग्रहो दोषाय भर्तृमरणादिनिमित्ते सति स्त्रीणां पुरुषान्तरपरिग्रहस्य शास्त्रानुमतत्वात्। तथा च **मनुः**—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते तथा। पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ इति

आनुशासनिकेऽपि—

नारी तु पत्यभावे हि देवरं कुरुते पतिम् ॥ इति।

नारदोऽपि—

स तु यद्यन्यजातीयः पतितः क्लीब एव वा। विकर्मस्थस्सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढापि देया सान्यस्मै वराय वरभूषणा। इति।

नचोदाहृतवचनविरोध इति वाच्यम्, उदाहृत**मनुनारद**वचनयोः भर्तृमरणादिनिमित्ते सति भर्त्रन्तरपरिग्रहविधानावगमेनोदाहृतनिषेधवचनानां भर्तृमरणादिनिमित्तरहितस्त्रीविषयत्वात् भिन्नविषयत्वेन विरोधाभावात्, कलियुगविषयत्वाच्च। कलियुगविषयत्वे **पुराणम्**—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा। कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥इति

एवं च निषेधवचनानां कलियुगविषयत्वात् आसीतामरणात्क्षान्तेत्यादिफलप्रतिपादकवचनानां ब्रह्मलोकादिमानवद्विषयत्वात् त्रेतायुगादिषु भर्तृमरणादिनिमित्ते सति सत्यां भोगेच्छायां पुनर्विवाहस्य शास्त्रानुमतत्वात् तारासुग्रीवसंगमो युक्त एव। अत एवोक्तनिमित्ताभावात् जीवतः सुग्रीवस्य भार्यायां वालिनः संगं दोषत्वेनोद्भावितवान् रामः—

तस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः। रुमायां वर्तसे कामात् स्नुषायां पापकर्मकृत् ॥इति

धरमाणस्य प्राणान्धारयत इत्यर्थः।

नन्वेवमपि दुन्दुभेर्हननाय वालिनो बिलप्रवेशानन्तरं सुग्रीवः तारया कथं संगतः?, वालिनो विद्यमानत्वेन उक्तनिमित्ताभावात्। तथाचांगदवाक्यम्—

भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम्। धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः॥

इति। अत एतदयुक्तमिति चेन्न, वालिमरणं निश्चित्यैव सुग्रीवेण तारासंपर्कस्य कृतत्वात्। तथा च रामं प्रति सुग्रीवः —

अहं त्ववगतो बुध्या चिह्नैस्तैर्भ्रातरं हतम्। पिधाय च बिलद्वारं शिलया गिरिमात्रया॥

शोकार्तश्चोदकं दत्वा किष्किन्धामागतस्सखे॥ इति।

अतः पूर्वं वालिमरणनिश्चयेन कृतत्वान्न दोषः। अत एव जीवतः सुग्रीवस्य भार्यायां रुमायां वर्तमानं वालिनं हत्वा तमेव दोषं ख्यापितवान्रामः। सुग्रीवं च तादृशदोषाभावात् राज्याभिषेकादिना अनुगृहीतवान्। तस्मात्तारया सहितः कामे इत्यादिवचनं युक्तमेव॥

ततो लक्ष्मणेन मदागमनवृत्तान्तं सुग्रीवाय कथयेति समाज्ञप्तोंगदः प्रविश्यान्तःपुरं, अभिवाद्य च राजानं निखिलमप्युदन्तमाचचक्षे॥

स निद्राक्लान्तिसंवीतो वानरो नावबुद्धवान्।
बभूव मदमत्तश्च मदनेन च मोहितः॥

ततः किलकिलां चक्रुः लक्ष्मणं प्रेक्ष्य वानराः।
तेन शब्देन महता प्रत्यबुध्यत वानरः॥

मन्त्रिणौ वानरेन्द्रस्य संमतोदारदर्शिनौ।
प्लक्षश्चैव प्रभावश्च मन्त्रिणावर्थधर्मयोः॥

वक्तुमुच्चावचं प्राप्तं मन्त्रिणौ तौ शशंसतुः।

यत्प्रसादेन वानरराज्यमेतत्संप्राप्य रुमया सुखमनुभवति भवान् तदनुजो लक्ष्मणः कोपानलेनैव पुरीमिमां निर्दग्धुकाम इव दुराधर्षस्समागत्यास्ते द्वारि, तदधुनैव तमभिप्रसाद्य —

यदाह रामो धर्मात्मा तत्कुरुष्व समाहितः।
राजंस्तिष्ठस्व समये भव सत्यप्रतिश्रवः॥ इति।

अनेन व्यसनेषु प्रवृत्तस्य राज्ञस्तदुपजीविभिर्नानाविधोपायैरकार्यप्रवृत्तिनिरसनपूर्वकं सत्कार्ये प्रवृत्तिः कारयितव्येति सूचितम्॥

तथा च **कामन्दके** —

अकार्यात्प्रतिषेधं च कार्ये चैव प्रवर्तनम्। संक्षेपादिति सद्वृत्तं बन्धुमित्रादिजीविनाम्॥
पानस्त्रीद्यूतगोष्ठीषु राजानमभितश्चराः। बोधयेयुः प्रमाद्यन्तमुपायैर्नाडिकादिभिः॥ इति।

द्वात्रिंशे — ततस्सुग्रीवस्ससंभ्रमं परित्यज्य शय्यां समीपस्थितान्सचिवानित्थमाह— रामे लक्ष्मणे वा मत्कृतापराधं कोपकारणं किञ्चिन्न पश्यामि,

असुहृद्भिर्मम मित्रैर्नित्यमन्तरदर्शिभिः।
मम दोषानसंभूतान् श्रावितो राघवानुजः॥

अनेन खलाः मिथ्योपजापादिना मित्रभेदं कुर्वन्तीति सूचितम्। तथा च **राजधर्मे** पुत्रं प्रति व्याघ्री —

नोच्छ्रयं सहते कश्चित्प्रक्रिया वैरकारिका। शुचेरपीह युक्तस्य दोष एव निपात्यते॥
मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः। उत्पद्यन्ते त्रयः पक्षाः मित्रोदासीनशत्रवः॥
लुब्धानां शुचयो द्वेष्याः कातराणां तरस्विनः। मूर्खाणां पण्डिता द्वेष्या दरिद्राणां महाधनाः॥
अधार्मिकाणां धर्मिष्ठा विरूपाणां सुरूपिणः। बहवः पण्डिता मूर्खा लुब्धा मायोपजीविनः॥
कुर्युर्दोषमदोषस्य बृहस्पतिमतेरपि॥ इति।

मित्रं त्वस्थानकुपितं जनयत्येव संभ्रमम्।
सर्वथा सुकरं मित्रं दुष्करं परिपालनम्॥

अनित्यत्वात्तु चित्तानां प्रीतिरल्पेऽपि भिद्यते।

अनेन मनश्चापल्यात् अल्पेनापि हेतुना मित्रं भिद्यत इत्युक्तम्। मनश्चापल्यं च **गीतायाम्** —

'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।' इति।

प्राचीना अपि —

स्तोकेनानन्दमायाति स्तोकेनायाति खेदताम्।
नास्ति चित्तसमश्शोच्यो नीचो गुणविवर्जितः॥ इति।

अथवा प्रत्युपकारानाचरणप्रभवो वायं कोपो विचार्यतामिति वदति सुग्रीवे मंत्रिप्रवरो हनुमांस्तत्कालोचितमित्थमवोचत्। शत्रुनिबर्हणो रामभद्रो दिक्प्रसादगगननैर्मल्यादिभिः प्रवृत्तामुद्योगयोग्यां शरदं पानमदेन विस्मृतप्रतिज्ञं अनारब्धकार्यं भवन्तं चाभिवीक्ष्य प्रणयकोपेन स्वानुजं लक्ष्मणं प्रेषितवान्, तदिदानीं —

आर्तस्य हृतदारस्य परुषं पुरुषान्तरात् ।
वचनं मर्षणीयं ते राघवस्य महात्मनः ॥

कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम् ।

अनेन सापराधः पुरुषः निर्दुष्टस्य स्वविषये कुपितस्य आप्तजनस्योपालम्भमपि सोढ्वा प्रसादयेदिति सूचितं । तथा च भारते --

यः कोपयति निर्दोषं सदोषोऽभ्यन्तरं जनम् । येषु दुष्टेषु दोषस्स्याद्योगक्षेमस्य भारत ॥

सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ इति ।

अत एवाग्रे **पञ्चत्रिंशे** सुग्रीववाक्यम् —

यदा किञ्चिदतिक्रान्तं विश्वासात्प्रणयेन वा ।
प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति ॥ इति ।

तथा च परुषं पुरुषान्तरादित्यनेन जने निष्ठुरभाषणप्रसक्तौ पुरुषान्तरमुखादेव भाषेतेति सूचितम् ॥

नियुक्तैर्मन्त्रिभिर्वाच्यो ह्यवश्यं पार्थिवो हितम् ।
अतएव भयं त्यक्त्वा ब्रवीम्यवधृतं वचः ॥

अनेन मन्त्रिभिर्निर्भयं राजा समये अवश्यं प्रबोधनीय इति सूचितम् । तथा च **कामन्दके —**

नरेश्वरे जगत्सर्वं निमीलति निमीलति । सूर्योदये यथा पद्मं तत्प्रबोधे प्रबुध्यते ॥
तद्बोधयेज्जगन्नाथं संबुध्येत यथा तथा । धीसत्वोद्योगसम्पन्नैस्तत्कार्यं तदुपाश्रितैरिति ॥

स न क्षमः कोपयितुं यः प्रसाद्यः पुनर्भवेत् ।
पूर्वोपकारं स्मरता कृतज्ञेन विशेषतः ॥

अनेन पूर्वोपकारिणा कृतः क्रोधः सोढव्य इति सूचितम् । तथा च **वनपर्वणि द्रौपदी —**

पूर्वोपकारी यस्ते स्यादपराधे गरीयसि । उपकारेण तत्तस्य क्षन्तव्यमपराधिनः ॥ इति ।

तदधुना विज्ञातपराक्रमेण भवता दुरतिक्रमं रामशासनं शिरसा परिगृह्य पादप्रणामादिपूर्वकं प्रसाद्यो राघवः —

राजंस्तिष्ठस्व समये भर्तुर्भार्येव तद्वशे, इति।

अनेन भार्यायाः भर्त्रधीनत्वं सूचितम्। तच्चायोध्याकाण्डे प्रपञ्चितम्॥

त्रयस्त्रिंशे-अत्रान्तरे लक्ष्मणः अंगदहनुमद्दधिमुखमैन्दद्विविदप्रमुखानां वानरयूथमुख्यानां शारदाभ्रशुभ्राणि रम्याणि तत्र तत्र हर्म्याणि पश्यन्नेव कनकगिरिसन्निभं कपिराजभवनं प्रविश्य समतीत्य च विचित्रतरविनोदाः सप्त कक्ष्याः,

स्त्रियस्सुग्रीवभवने ददर्श स महाबलः।
कूजितं नूपुराणां च काञ्चीनां निनदं तथा॥

सन्निशम्य ततः श्रीमान् सौमित्रिर्लज्जितोऽभवत्।
ततः— रोषवेगप्रकुपितः श्रुत्वा चाभरणस्वनम्।
चकार ज्यास्वनं वीरो दिशः शब्देन पूरयन्॥

चारित्रेण महाबाहुरप्रकृष्टस्स लक्ष्मणः।
तस्थावेकान्तमाश्रित्य रामकोपसमन्वितः॥

अनेन परस्यान्तःपुरे सहसा न प्रवेष्टव्यमिति सूचितम्। तथाचोद्योगे संजयः—
संप्राप्य हस्तिनपुरं शीघ्रमेव प्रविश्य च। अन्तःपुरं समास्थाय द्वास्थं वचनमब्रवीत्॥

जागर्ति चेदभिवदेस्त्वं हि द्वास्थ प्रवेशय।
निवेद्यमत्रात्ययिकं ममास्ति द्वास्थोऽथ श्रुत्वा नृपतिं जगाद॥ इति।

ततो निर्घातसन्निभज्याघोषेण अतिक्रुद्धं सन्निहितं लक्ष्मणं निश्चित्य ससंभ्रमं परित्यज्यासनं विकीर्णवसनमाल्याभरणः सुग्रीवस्तारामित्थमवोचत्—

त्वद्दर्शनविशुद्धात्मा न स कोपं करिष्यति।
नहि स्त्रीषु महात्मानः किञ्चित्कुर्वन्ति दारुणम्॥

अनेन महापुरुषाः स्त्रीषु कोपं न कुर्वन्तीति सूचितम्। तथा च **राजधर्मे**—
दैवतेषु विशेषेण राजसु ब्राह्मणेषु च। नियन्तव्यः सदा क्रोधो वृद्धस्त्रीबालरोगिषु॥ इति।

उद्योगेऽपि विदुरः—
ब्राह्मणेषु च ये शूराः स्त्रीषु गोषु तपस्विषु। वृन्तादिव फलं पक्वं धृतराष्ट्र पतन्ति ते॥

अवध्या ब्राह्मणा गावः ज्ञातयः शिशवः स्त्रियः।
येषां चान्नानि भुञ्जीत येच स्युः शरणं गताः॥ इति।

अत एवाग्रेऽपि — 'स्त्रीसन्निकर्षाद्विनिवृत्तकोपः' इति ।

त्वया सान्त्वैरुपक्रान्तं प्रसन्नेन्द्रियमानसम् ।
ततः कमलपत्राक्षं द्रक्ष्याम्यहमरिन्दमम् , ॥ इति

सा प्रस्खलन्ती मदविह्वलाक्षी प्रलंबकाञ्चीगुणहेमसूत्रा ।
सलक्षणा लक्ष्मणसन्निधानं जगाम तारा नमिताङ्गयष्टिः ॥

स तां समीक्ष्यैव हरीशपत्नीं तस्थावुदासीनतया महात्मा ।
अवाङ्मुखोऽभून्मनुजेन्द्रपुत्रः स्त्रीसन्निकर्षाद्विनिवृत्तकोपः ॥

अनेन परांतःपुरेऽवाङ्मुखस्तिष्ठेत्, न परस्त्रियो द्रष्टव्या इति सूचितम् । तथा चावाङ्मुखविषये **उद्योगे** धृतराष्ट्रेण दौत्यार्थं प्रेषितः सञ्जयः —

पादांगुलीरभिप्रेक्ष्य प्रयातोऽहं कृताञ्जलिः । शुद्धान्तं प्राविशं राजन्नाख्यातुं नरदेवयोः ॥ इति ।

परस्त्रीविषये **भारते** —

उदर्कफलमिच्छद्भिस्सद्भिर्नच विलोक्यते । चतुर्थीचन्द्रलेखेव परस्त्रीफालपट्टिका ॥ इति ।

ततः कोऽयं संभ्रमः? किं वा कोपनिदानमस्मासु परिपाल्येष्विति तयाभिहितो लक्ष्मणः इत्थमकथयत् — अस्माभिरुपलब्धमनोरथं परित्यक्तमित्रकार्यं, अविगणय्य शोकपरायणानस्मानहर्निशं मधुपानमेव सेवमानं त्वत्प्राणेश्वरं किं न जानीषे?

नहि धर्मार्थसिध्यर्थं पानमेवं प्रशस्यते ।
पानादर्थश्च धर्मश्च कामश्च परिहीयते ॥

अनेन सर्वानर्थकरं पानं परिहर्तव्यमिति सूचितम् । तथा च **कामन्दके** —

वमनं निर्गुणत्वं च संज्ञानाशो विवस्त्रता । असंबद्धप्रलापित्वमकस्माद्व्यसनं मुहुः ॥
प्राणग्लानिः सुहृन्नाशः प्रज्ञाश्रुतिमतिभ्रमः । सद्भिर्वियोगोऽसद्भिश्च संयोगोऽनर्थसंगमः ॥
लेखनं वेपथुस्तन्द्रा नितान्तं स्त्रीनिषेवणम् । इत्यादि पानव्यसनमत्यन्तं सद्भिगर्हितम् ॥
श्रुतिशीलबलोपेताः पानदोषेण भूयसा । क्षयमक्षीणनामानो जग्मुरन्धकवृष्णयः ॥
योगीश्वरश्च भगवान्भार्गवो भृगुतल्पधीः । शुक्रः पानमदात्तीव्रं बुभुजे शिष्यमौरसम् ॥
पानाक्षिप्तो हि पुरुषो यत्र यत्र प्रवर्तते । यात्यसंव्यवहार्यत्वं तत्र तत्र प्रवर्तनात् ॥ इति ।

धर्मलोपो महांस्तावत्कृते ह्यप्रतिकुर्वतः ।

अर्थलोपो हि मित्रस्य नाशे गुणवतो महान् ॥

अनेन प्रत्युपकाराकरणे महान्प्रत्यवायो भवतीति सूचितम् । तथाच **रघुवंशे**—

सम्मोचितस्सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।
प्रतिप्रियं चेद्भवतो न कुर्यां व्यर्था हि मे स्यात्स्वपदोपलब्धिः ॥ इति ।

मित्रं ह्यर्थगुणं श्रेष्ठं सत्यधर्मपरायणम् ।
तद्द्वयं तु परित्यक्तं नतु धर्मे व्यवस्थितः ॥

इत्यभिहिता तारा—

न कोपकालः क्षितिपालपुत्र नचापि कोपः स्वजने विधेयः ।
त्वदर्थकामस्य नृपस्य तस्य प्रमादमप्यर्हसि वीर सोढुम् ॥ इति ।

अनेन स्वजनकृतापराधः सोढव्यः, तस्मिंश्च कोपो न कर्तव्य इति सूचितम् । तथा च **वनपर्वणि**—

अबुद्धिमाश्रितानां तु क्षन्तव्यमपराधिनाम् । सर्वस्यैकापराधस्ते क्षन्तव्यः प्राणिनो भवेत् ॥
द्वितीये सति वध्यस्तु स्वल्पेऽप्यपकृतो भवेत् । अजानता भवेत्कश्चिदपराधः कृतो यदि ॥
क्षन्तव्यमेव तस्याहुः सुपरीक्ष्य परीक्षया । तथा लोकभयाच्चैव क्षन्तव्यमपराधिनः ॥
एत एवंविधाः कालाः क्षमायाः परिकीर्तिताः ॥ इति ।

कोपं कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्वे ।
कस्त्वद्विधः कोपवशं हि गच्छेत् सत्वावरुद्धस्तपसः प्रसूतिः ॥

अनेनाल्पसत्वे कोपो न कर्तव्य इति सूचितं, तथा च **राजधर्मे** गृध्रगोमायुसंवादे—
न दुष्करमिदं पुत्र यः प्रभुर्घातयेत्कृशम् । श्लाघनीया यशस्या च लोके प्रभवतां क्षमा ॥ इति ।

न देशकालौ हि न चार्थधर्मावपेक्षते कामरतिर्मनुष्यः ।
तं कामवृत्तं मम सन्निकृष्टं कामाभियोगाच्च निवृत्तलज्जम् ॥

क्षमस्व तावत्परवीरहन्तस्त्वद्भ्रातरं वानरवंशनाथम् ॥

अनेनात्यन्तस्त्रीकामुको धर्मविभ्रष्टो भवतीति सूचितम् । तथा च **कामन्दके**—
कालातिपातः कार्याणां धमार्थपरिपीडनम् । नित्याभ्यन्तरवर्तित्वात्साधुप्रकृतिकोपनम् ॥

रहस्यभेदतत्पक्षादकार्येषु प्रवर्तनम् । ईर्ष्यामर्षस्तथा क्रोधो ह्यनुरोधश्च साहसम् ॥
इत्यादि च स्त्रीव्यसनं पूर्वं यच्च प्रकीर्तितम् । तस्मात्स्त्रीव्यसनं राजा राज्यकामः परित्यजेत् ॥
स्त्रीमुखालोकनतया व्यग्राणामल्पचेतसाम् । ईहितानीह गच्छन्ति यौवनेन सह क्षयम् ॥ इति ।

महर्षयो धर्मतपोभिकामाः कामानुकामाः प्रतिबुद्धमोहाः ।
अयं प्रकृत्या चपलः कपिस्तु कथं न सज्जेत सुखेषु राजा ॥

अनेन महर्षिभिरप्यपरिहार्यः कामः प्राकृतैः कथं परिहर्तुं शक्य इत्युक्तम् । तथा च **प्राचीनाः** ॥

विश्वामित्रपराशरप्रभृतयो वातांबुपर्णाशना-
स्तेऽपि स्त्रीमुखपङ्कजं सुललितं दृष्ट्वैव मोहं गताः ।
शाल्यन्नं सघृतं पयोदधियुतं ये भुञ्जते मानवा-
स्तेषामिन्द्रियनिग्रहो यदि भवेद्विन्ध्यः प्लवेत्सागरे ॥ इति ।

इत्यभिधाय कामपरवशेनापि कपीश्वरेण भवत्कृते तत्तद्देशवर्तिवानरानयनाय पूर्वमेव समाज्ञप्ताः वानरयूथपाः ॥

तदागच्छ महाबाहो चारित्रं रक्षितं त्वया ।
अच्छलं मित्रभावेन सतां दारावलोकनम् ॥

अनेन दुष्टबुध्या परदारावलोकनं वर्जयेदिति सूचितं। तथा च **गौतमः** — वर्जयेदित्युपक्रम्य 'स्त्रीप्रेक्षणालम्भने मैथुनशङ्कायामिति'। अत एव रावणान्तःपुरे निखिलतद्दारानवलोकितवतो हनूमतो वाक्यं **सुन्दरकाण्डे** —

परदारावरोधस्य प्रसुप्तस्य निरीक्षणम् । इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥
नहि मे परदाराणां दृष्टिर्विषयवर्तिनी । अयं चात्र मया दृष्टः परदारपरिग्रहः ॥
कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः । नहि मे मनसः किंचिद्वैकृत्यमुपपद्यते ॥
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने । शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥इति

एवं तारया सादरं प्रसाद्यमानो लक्ष्मणः प्रविश्य च कपिराजगृहाभ्यन्तरं कांचनासनासीनं वानरेन्द्रं ददर्श –

चतुस्त्रिंशे — ततः स्वदर्शनसञ्जातभयेन परिकंपितसर्वावयवं प्रमदाजनपरिवृतं वानरराजमवलोक्य —

अब्रवील्लक्ष्मणः क्रुद्धं सतारं शशिनं यथा ।
सत्वाभिजनसम्पन्नः सानुक्रोशो जितेन्द्रियः ॥

कृतज्ञः सत्यवादी च राजा लोके महीयते ।

अनेन सत्यवादी राजा श्रेष्ठ इत्युक्तम् । तथा च **मनुः** —

यस्य प्रियाण्हि वदतः क्षेत्रज्ञो नातिशंकते ।
तस्मान्न देवाः श्रेयांसं लोकेन्यं पुरुषं विदुः ॥ इति ।

यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणाम् ।
मिथ्याप्रतिज्ञां कुरुते को नृशंसतरस्ततः ॥

शतमश्वानृते हन्ति सहस्रं च गवानृते ।
आत्मानं पुरुषं हन्ति पुरुषः पुरुषानृते ॥

अत्राश्वविषयेऽनृतं वक्ता स्वपूर्वपुरुषाणां शतं हन्ति, स्वर्गात्प्रच्याव्य नरकं तिर्यग्योनिं वा प्रापयति । गवानृते सहस्रं स्वपूर्वपुरुषांस्तथा करोति । पुरुषविषयानृते सबान्धवः स्वयमेव तथा नरकं तिर्यग्योनिं वा प्राप्नोतीत्युक्तम् । **मानवे तु** —

यावतो बान्धवान्यस्मिन्हन्ति साक्ष्येनृतं वदन् । तावतः संख्यया तस्मिन् शृणु सौम्यानुपूर्वशः ॥
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते । शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् । सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतंवदी ॥
पशुवत्क्षीरघृतयोर्यच्चान्यत्पशुसंभवम् । गोवद्वसुहिरण्येषु धान्यपुष्पफलेषु च ॥
अश्ववत्सर्वयानेषु खराश्वाश्वतरादिषु । अप्सु भूमिवदित्याहुः स्त्रीणां भोगे च मैथुने ॥
अजेषु चैव रत्नेषु सर्वेष्वश्ममयेषु च । एतान्सर्वानवेक्ष्याथ दोषाननृतभाषणे ॥
यथाश्रुतं यथादृष्टं सत्यमेवांजसा वदेत् ॥ इति ।

उद्योगे च —

अथ यो नैव प्रब्रूयात्सत्यं वा यदि वानृतम् । एतत्सुधन्वन्पृच्छामि दुर्विवक्तास्य कां वसेत् ॥
इति प्रह्लादेन पृष्टस्सुधन्वा —

यां रात्रिमधिविन्ना स्त्री यां चैवाक्षैः पराजितः ।
यां च भाराभितप्तांगो दुर्विवक्ता स्म तां वसेत् ॥

नगरे प्रतिरुद्धस्सन् बहिर्द्वारं बुभुक्षितः । अमित्रीभूय सर्वस्य दुर्विवक्ता स्म तां वसेत् ॥

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते । शतमश्वानृते हंति सहस्रं पुरुषानृते ॥

हंति जातानजातांश्च हिरण्यार्थेऽनृतं वदेत् ॥ इति ।

पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति यः ।
कृतघ्नस्सर्वभूतानां स वध्यः प्लवगेश्वर ॥

गीतोऽयं ब्रह्मणा श्लोकः सर्वभूतनमस्कृतः ।
दृष्ट्वा कृतघ्नं क्रुद्धेन तन्निबोध प्लवङ्गम ॥

गोघ्ने चैव सुरापे च चोरे भग्नव्रते तथा ।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥

अनार्यस्त्वं कृतघ्नश्च मिथ्यावादी च वानर ।
पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत् ॥

रामवाक्यमपि —

कृतार्था ह्यकृतार्थानां मित्राणां न भवन्ति ये । तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ इति

अनेन कृतघ्नतादोषस्सर्वदोषादप्यधिक इत्युक्तम् । तथाच **द्रोणपर्वणि** कृष्णं प्रति युधिष्ठिरवचनम् —

विदिता मे महाबाहो धर्माणां परमा गतिः । ब्रह्महत्या फलं तस्य यः कृतं नावबुध्यते ॥ इति

उद्योगेऽपि — सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ इति ।

आपद्धर्मे कृतघ्नोपाख्यानेऽपि - गौतमो नाम मध्यदेशीयो ब्रह्मबन्धुर्वृत्त्यलाभेन शबरालये भिक्षामटन् तत्रत्येन केनचिद्व्याधेन वृत्तिकन्याप्रदानादिभिरतिसत्कृतस्तल्लोभेन तत्रैव वसन् तत्सहवासेन च स्वयमपि निखिलवनचरसत्वहननक्रौर्यादिभिर्व्याधतामगमत् । अथ कदाचित् वनोद्देशे निहत्य बहुपक्षिमृगगणान् तन्मांसभारावनतस्कन्धः स्वगृहद्वारमुपागतो गौतमो द्रागेत्र निशानिवासाय स्वगृहमुपागतेन परिचितस्वाभिजनेन विप्रवर्येण गौतम किमिदं क्रूरतरं कार्यमारब्धं यद्ब्राह्मणजातेरननुरूपं तदधुना परित्यज्य शबरालयं स्वदेशमेव झटिति गच्छेत्यभिहितो वृत्त्यलाभकृतोऽयं मम पक्कणप्रवेशः, श्वस्तथैव निजदेशं गन्तास्मि । त्वमप्यद्य रात्रावस्मद्गृह एव मत्कृतसपर्यां परिगृह्य सुखं वसेति ब्राह्मणोत्तममवदत् ।

स तत्र न्यवसद्विप्रो घृणी किंचिदसंस्पृशन् । क्षुधितः छन्द्यमानोऽपि भोजनं नाभ्यनन्दत ॥

ततः प्रभाते यथागतं गते विप्रवर्ये स्वयमपि समुद्रयानेन धनसंपादनाय प्रस्थितो मध्येमार्गं क्षुत्पिपासापरिपीडितः सुशीतलच्छायं श्रमापनोदनं न्यग्रोधवृक्षमासाद्य क्षुत्प्रतिक्षेपणाय पक्षिहननबद्धदृष्टिर्गौतमो ब्रह्मसभातः सन्ध्यासमयसमुपागतेन एतन्न्यग्रोधनिलयेन राजधर्माभिधेन बकेन स्वागतार्घ्यमधुपर्कस्वर्धुनीनीरसञ्चारिमीनाद्यामिषप्रदानेन सन्तर्पणपूर्वकं किं कारणं निर्जने वने भवदागमनमिति पृष्टः समुद्रयानेन धनार्जनाय प्रस्थितो बनमिदं प्राप्तोऽस्मीत्यवदत् । ततो दयार्द्रहृदयेन राजधर्मनाम्ना बकेन –

चतुर्विधा ह्यर्थसिद्धिर्बृहस्पतिमतं यथा । पारंपर्यं तथा दैवं कामं मैत्रमिति प्रभो ॥
प्रादुर्भूतोस्मि ते मित्रं सुहृत्त्वं च मम त्वयि । सोऽहं तथा यतिष्यामि भविष्यसि यथार्थवान् ॥

तदिदानीं मत्प्रियसखं व्रजपुरीनिलयं अर्थिजनाभीष्टदायिनं विरूपाक्षाभिधं राक्षसं गच्छ, तेन च भवदभीष्टसिद्धिर्भवितेति । गौतमस्तथैव बकसखं राक्षसमासाद्य तेन च पृष्टगोत्रचरणाभिजनः —

मध्यदेशप्रसूतोऽहं वासो मे शबरालये । शूद्रा पुनर्भूर्भार्या मे सत्यमेतद्ब्रवीमि ते ॥

इत्यभिहितवान् । ततो निर्णीतनिखिलनिगमसारो राक्षसः परित्यक्तशौचाचारायानाघ्रातविद्यागन्धायापात्रभूतायान्नवसुवासोदानमूषरप्रदेशे बीजारोपवन्निरर्थकं शास्त्रासम्मतं च; अथापि –

अयं हि जन्मना विप्रः सुहृत्तस्य महात्मनः । संप्रेषितश्च तेनायं काश्यपेन ममान्तिकम् ॥
तस्य प्रियं करिष्यामि स हि मामाश्रितस्सदा । भ्राता मे बान्धवश्चासौ सखा च हृदयंगमः ॥
कार्तिक्यामद्य भोक्तारः सहस्रं मे द्विजोत्तमाः । तत्रायमपि भोक्ता च देयमस्मै च मे धनम् ॥
स चाद्य दिवसः पुण्यो ह्यतिथिश्चायमागतः ।

तस्मादस्मै देयमेव धनजातमिति निश्चयमकरोत् –

ततः सहस्रं विप्राणां विदुषां समलंकृतम् । स्नातानामनुसंप्राप्तं सुमहत्क्षौमवाससाम् ॥
बृस्यस्तेषां तु सन्यस्ताः राक्षसेन्द्रस्य शासनात् । भूमौ वरकुशास्तीर्णाः प्रेष्यैर्भरतसत्तम ॥
तासु ते पूजिता राज्ञा निषण्णा द्विजसत्तमाः । तिलदर्भोदकेनाथ अर्चिता विधिवद्द्विजाः ॥
विश्वेदेवास्सपितरः साग्नयश्चोपकल्पिताः । विलिप्तपुष्पवन्तश्च सुप्रचाराः सुपूजिताः ॥
ततो जांबूनदीः पालीः बज्रांका विमलाश्शुभाः । वरान्नपूर्णा विप्रेभ्यः प्रादान्मधुघृताप्लुताः ॥

तस्य नित्यं सदाषाढ्यां माध्यां च बहवो द्विजाः । ईप्सितं भोजनवरं लभन्ते सत्कृतं सदा ॥
विशेषतस्तु कार्तिक्यां भोजनं संप्रयच्छति । शरद्व्यपाये रत्नानि पौर्णमास्यामिति श्रुतः ॥
सुवर्णं रजतं चैव मणीनथ च मौक्तिकान् । वज्रान्महाधनांश्चैव वैडूर्याजिनरांकवान् ॥
रत्नराशीन्विनिक्षिप्य दक्षिणार्थे स भारत । ततः प्राह द्विजश्रेष्ठान्विरूपाक्षो महामनाः ॥
गृह्णीत रत्नान्येतानि यथोत्साहं यथेष्टतः । येषु येषु च भाण्डेषु भुक्तं वो द्विजसत्तमाः ॥
तान्येवादाय गच्छध्वं स्ववेश्मानीव भारत । इत्युक्तवचने तस्मिन् राक्षसेन्द्रे महात्मनि ॥
यथेष्टं तानि रत्नानि जगृहुर्ब्राह्मणर्षभाः । ततो महार्हास्ते सर्वे रत्नैरभ्यर्चिताश्शुभैः ॥
ब्राह्मणा मृष्टवसनाः सुप्रीताः स्म ततोऽभवन् ।

गौतमोऽपि बकसखः राक्षसात्संप्राप्तबहुधनः तद्वहनजनितश्रमेण पुनरपि तमेव न्यग्रोधमासाद्य मित्रवत्सलेन तेनैव बकेन निरस्तसमस्तश्रमः गुरुतरभारनयनं पथ्यशनं विना न शक्यं विचिन्त्य पार्श्वत एव विस्रब्धं शयानं मित्रवत्सलं तमेव बकं निहत्य तदीयमांसेन कृतपथ्यशनो धनमादाय स्वदेशाभिमुखः प्रतस्थे । तदनु सन्ध्यासमये स्वसन्दर्शनायानागतं बकं मांसार्थिना दुरात्मना गौतमेन निहतं निश्चित्य विरूपाक्षस्तद्विचारणाय रक्षोगणपरिवृतं स्वतनयं प्रेषयामास । ततः स्वपुत्रेण मध्येमार्गं निरुध्य समानीतं सधनं सामिषं बकहन्तारमभिवीक्ष्य —

अथाब्रवीन्नृपः पुत्रं पापोऽयं वध्यतामिति । अस्य मांसैरिमे सर्वे विहरन्तु यथेष्टतः ॥
पापाचारः पापकर्मा पापात्मा पापसाधनः । हन्तव्योऽयं ममारातिर्भवद्भिरिति राक्षसाः ॥
इत्युक्ता राक्षसेन्द्रेण राक्षसा घोरविक्रमाः । नैच्छन्त तं भक्षयितुं पापकर्माणमित्युत ॥
दस्यूनां दीयतामेष साध्वद्य पुरुषाधमः । इत्यूचुस्ते महाराज राक्षसेन्द्रं निशाचराः ॥
शिरोभिः प्रणतास्सर्वे व्याहरन्राक्षसाधिपम् । न दातुमर्हसि त्वन्नो भक्षणायास्य किल्बिषम् ॥
एवमस्त्विति तानाह राक्षसेन्द्रो निशाचरान् । दस्यूनां दीयतामेष कृतघ्नोऽद्यैव राक्षसाः ॥
कृत्वा तं खण्डशः पापं दस्युभ्यः प्रददुस्तदा । दस्यवश्चापि नैच्छन्त तमत्तुं पापकारिणम् ॥
क्रव्यादा अपि राजेन्द्र कृतघ्नान्नोपभुञ्जते । गोघ्ने चैव सुरापे च चोरे भग्नव्रते तथा ॥

निष्कृतिर्विहिता राजन् कृतघ्ने नास्ति निष्कृतिः ।
मित्रद्रोही कृतघ्नश्च नृशंसश्च नराधमः ॥
क्रव्यादैः कृमिभिश्चान्यैर्न भुज्यन्ते हि तादृशाः । इति ।

तत्समये गगनतलसंचारिण्याः कामधेन्वाः मुखान्निर्गतफेनसेकवशाल्लब्धजीवनो बको यथापुरं राक्षसपार्श्वमाजगाम । तत्कालमुपागतेन देवराजेन ब्रह्मशापकृतो भवद्वधस्तत्प्रसादादेव जीवनं च, तदिदानीं निवृत्तशापो यथेष्टं विहरेत्यभिहितो बकः—

यदि तेऽनुग्रहकृता मयि बुद्धिस्सुरेश्वर। सखायं मे सुदयितं गौतमं जीवयेत्युत ॥

इत्यवदत् । तदनु पाकशासनकृतामृतवर्षेण संजीवितं गौतमम्—

सभाण्डोपस्करं राजन् तमासाद्य बकाधिपः । संपरिष्वज्य सुहृदं प्रीत्या परमया युतः ॥

अथ तं पापकर्माणं राजधर्मा बकाधिपः । विसर्जयित्वा सधनं प्रविवेश स्वमालयम् ॥

यथोचितं च स बको ययौ ब्रह्मसदस्तदा । ब्रह्मा चैनं महात्मानमातिथ्येनाभ्यपूजयत् ॥

गौतमोऽपि निजगृहमागत्य शूद्रायां स भार्यायां पुत्रान्बहूनुत्पाद्य सुरशापाभिहतो निरयं प्राप ॥

कुतः कृतघ्नस्य सुखं कुतः स्वस्ति कुतो धनम् ।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः ॥

मित्रद्रोहो न कर्तव्यः पुरुषेण विजानता । मित्रध्रुङ्नरकं घोरं पापकर्मा नराधमः ॥

एष धर्मभृतां श्रेष्ठ प्रोक्तः पापो मयानघ । इति ।

तदधुना रामेण संप्राप्तमनोरथः सन्दृष्टतदीयविक्रमोऽपि श्रीरामभार्यागवेषणमविचिन्तयन्नेव राज्यसंभोगमदमत्तः कालानलोपमैः श्रीरामबाणैरभिहतो वालिपथं मा गाः इति ॥

पञ्चत्रिंशप्रभृति एकोनचत्वारिंशपर्यन्तेषु—

ततस्तारा स्वभर्तृनिन्दनं सुमित्रानन्दनं परिसान्त्वयन्ती तमित्थमाचचक्षे—वालिना हृतराज्यो बहुधा दुःखमनुभवन् रघुनन्दनप्रसादेन लब्धराज्यश्रीः मित्रकार्यसिध्यै इतस्ततो विप्रकीर्णवानरयूथपमेलनाय प्रस्थाप्य वानरान्वानरचापल्येन महर्षीणामप्यपरिहार्यया कामासक्त्या च प्राप्तकालमपि मित्रकार्यं विस्मृतवानित्येतावतैवाविचार्य तदभिप्रायं कोपवशं मा गाः—

तथ्ययुक्ता हि पुरुषास्त्वद्विधाः पुरुषर्षभ ।
अविमृश्य न रोषस्य सहसा यान्ति वश्यताम् ॥

अनेन महद्भिरविचार्य कोपो न कर्तव्य इति सूचितं। तच्च प्राक् प्रपञ्चितम्। तदनु परिगलितमदवेगस्सुग्रीवः परिहृत्य माल्यजातं उदारतारावचसा सान्त्वितं लक्ष्मणमिदमवदत्—लीलयैव सकृत्प्रयुक्तैकेषुनिर्भिण्णसप्तसालशैलरसातलस्य महाबलस्य रामस्य शत्रुनिरसनेऽप्यनपेक्षितसहायस्य किमस्माभिरल्पसत्त्वैर्वानरैस्साहाय्यमाचरणीयमस्ति। अथापि रावणवधाय प्रस्थितं राघवं निखिलबलपरिवृतोऽहमनुयास्यामि —

यदि किञ्चिदतिक्रान्तं विश्वासात्प्रणयेन वा।
प्रेष्यस्य क्षमितव्यं मे न कश्चिन्नापराध्यति॥

अत्र स्वजनकृतापराधः सोढव्य इत्युक्तं। अयमर्थः प्राङ्निरूपितः। इति सुग्रीववचसा समाश्वासितस्सौमित्रिः सदृशविक्रममित्रलाभेन नूनं शत्रुजयो रामस्य, तदधुना कोपावेशेनाननुरूपमस्मद्भाषितमपि सोढ्वा भार्याहरणकर्शितं प्रियसखं रामभद्रं झटिति संप्रहर्षयेत्यवदत्। ततः सुग्रीवेण गिरिनदीसमुद्रनिलयवानरानयनाय प्राक् प्रेषितान्वानरांस्त्वरयितुं प्रेषिता दूताः नानादिग्देशवर्तिनो वानरांस्तथैव त्वरयित्वा हिमवत्प्रदेशे महेश्वरयज्ञीयान्नरससंभूतं सकृदास्वादनमात्रेण मासमात्रतृप्तिकरं दिव्यं फलमूलपुष्पौषधिजातं समानीय सुग्रीवाय राज्ञे निवेद्य —

सर्वे परिगतास्शैलास्समुद्राश्च वनानि च।
पृथिव्यां वानरास्सर्वे शासनादुपयान्ति ते॥

इत्यवोचन्। ततस्तादृशदूतवचनाकर्णनेन सन्तुष्टहृदयस्सुग्रीवो विसृत्यान्तःपुरं दिव्योपबर्हणास्तरणाद्युपेतं समलंकृतं चतुरन्तयानं सौमित्रिणा सह समास्थाय शंखदुन्दुभिभेरीपटहादिशब्दपरिपूरितदिङ्मण्डलः वानरयूथपैश्च परिवृतस्समागत्य रामभद्रनिकटमवरुह्य चतुरन्तयानाद्राघवस्य पादयोः प्रणनाम। ततः श्रीरामः पारावारसमानया वानरसेनया समागतं तमवनौ प्रणतमुत्थाप्य परिष्वङ्गपूर्वकं निर्दिश्यासनमित्थमाचचक्षे —

धर्ममर्थं च कामं च यस्तु काले निषेवते।
विभज्य सततं वीर स राजा हरिसत्तम॥

हित्वा धर्मं तथार्थं च कामं यस्तु निषेवते।
स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते॥

अनेन यथाकालं त्रिवर्गसेवी सुखमनुभवतीत्युक्तम्। तथाच **भारते** —
न धर्मपर एव स्यान्न चार्थपरमो नरः। न कामपरमो वा स्यात्सर्वान्सेवेत सर्वदा॥

धर्मं पूर्वं धनं मध्ये जघन्ये धर्ममाचरेत्। वयस्यनुचरेदेवमेष शास्त्रकृतो विधिः॥
धर्मं चार्थं च कामं च यथावद्वदतां वर। विभज्य काले कालज्ञ सर्वान्सेवेत पण्डितः॥ इति॥

अमित्राणां वधे युक्तो मित्राणां संग्रहे रतः।
त्रिवर्गफलभोक्ता तु राजा धर्मेण युज्यते॥

अनेनामित्रनिग्रहः मित्रसंग्रहश्च राज्ञां धर्मः विपरीतं दोषाधायकमिति सूचितं। तथाच **राजधर्मे**—

विवर्धयति मित्राणि तथारींश्चापकर्षति। संपूजयति साधूंश्च स राज्ञां धर्म उच्यते॥ इति॥

वैपरीत्ये दोषमाह **उद्योगे** विदुरः—

अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च। कर्म चारभते दुष्टं तमाहुर्मूढचेतसम्॥ इति

तथाच संकेतितकाले अवश्यकर्तव्यकार्यविस्मरणेन प्रत्यक्षतो निन्द्यस्यापि सुग्रीवस्य रामेण धर्ममर्थं च कामं चेत्यादि धर्मोपदेशव्याजेनोपालम्भकरणात् स्वयमार्तेनापि महापुरुषेण परस्योद्वेगकरं वाक्यं न कर्तव्यमिति सूचितम्। तथाच **मनुः**—

नारुन्तुदः स्यादार्तोऽपि न परद्रोहकर्मधीः। यया चोद्विजते वाचा नालोक्यां तामुदीरयेत्॥ इति। **उद्योगेऽपि**—

मर्माण्यस्थीनि हृदयं तथासून् घोरा वाचो निर्दहन्तीव पुंसाम्।
तस्माद्वाचं रुशतीं तीक्ष्णरूपां धर्मारामो नित्यशो वर्जयीत॥ इति।

तदिदानीं कालोऽयमुद्योगानुकूलः सचिवैस्सह विचिन्त्यतामित्युवाच। ततो रामसमुदीरितवचनाकर्णनेन सन्तुष्टस्सुग्रीवो रामभद्रमित्थमाचचक्षे—भवदनुग्रहेण राज्यश्रीः कीर्तिश्च संप्राप्ता। चिरप्राप्तमस्मदर्थं साधितवतो भवतः किमहं प्रत्युपकुर्यामिति। ततः—

शतैश्शतसहस्रैश्च कोटिभिश्च प्लवङ्गमाः।
अयुतैश्चावृता वीरा शंकुभिश्च परंतपः॥

अर्बुदैरर्बुदशतैर्मध्यैश्चान्त्यैश्च वानराः।
समुद्रैश्च परार्धैश्च हरयो हरियूथपाः॥

अनेन संख्या एकत्वादिपरार्धपर्यन्तेत्युक्तम्। तथा च **तैत्तिरीयश्रुतिः**—
एका च दशशतं च सहस्रं चायुतं च प्रयुतं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेति। लीलावत्यां **सिद्धान्तशिरोमणावपि**—

एकदशशतसहस्रायुतलक्षप्रयुतकोट्यः क्रमशः ।
अर्बुदमब्दं खर्वनिखर्वं महापद्मशङ्खवस्तस्मात् ॥
निधिश्चान्तं मध्यं परार्धमिति दशगुणोत्तरं संज्ञाः ।
संख्यायाः स्थानानां व्यवहारार्थंकृताः पूर्वैरिति ॥

विशेषेण शतबलिसुषेणकेसरिविनतगजगवाक्षगवयगन्धमादनाः नीलदधिमुखमैन्द-द्विविदांगदजांबवद्धनूमद्रुमण्वन्मुखप्रमुखदधिमुखमुखा वानरप्रमुखा महाप्रभावाः दशसहस्र-कोटिबृन्दखर्वनिखर्वान्तमध्यपरार्धानेकपरार्धसंख्याकैः अप्रमेयपराक्रमैर्वानरैः परिवृतास्समागताः सुग्रीवेण च यथासुखं विनिवेशिताश्च ॥

चत्वारिंशे —

अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः ।
उवाच नरशार्दूलं रामं परबलार्दनम् ॥

आगता विनिविष्टाश्च बलिनः कामरूपिणः ।
वानरा वारणेन्द्राभा ये मद्विषयवासिनः ॥

त इमे बहुविक्रान्तैर्हरिभिर्भीमविक्रमैः ।
आगता वानरा घोरा दैत्यदानवसन्निभाः ॥

ख्यातकर्मापदानाश्च बलवन्तो जितक्लमाः ।
पृथिव्यंबुचरा राम नानानगनिवासिनः ॥

कोट्यग्रश इमे प्राप्ताः वानरास्तव किंकराः ।
निदेशवर्तिनस्सर्वे सर्वे गुरुहिते रताः ॥

अभिप्रेतमनुष्ठातुं तव शक्यमरिन्दम ।
त इमे बहुसाहस्रैरनीकैर्भीमविक्रमैः ॥

यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यताम् ।
त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि ॥

काममेषामिदं कार्यं विदितं वीर तत्त्वतः ।
तथापि तु यथातत्त्वमाज्ञापयितुमर्हति ॥

अनेन प्रभुसन्निधौ स्वेन स्वातन्त्र्यं नावलंबनीयम् । किंतु तदुक्तमेव श्रोतव्यमिति सूचितम् । तथाच विराटपर्वणि धर्मपुत्रं प्रति धौम्यः —

यद्यद्भर्तानुयुंजीत तदेवास्यानुवर्तयेत् । समर्थनासु सर्वासु हितं च प्रियमेव च ॥ इति ॥

कामन्दकेऽपि —

आज्ञामस्य प्रतीच्छन्तो भृत्याः कुर्युरुपासनम् ।
भर्तृचित्तानुवृत्तित्वं सद्वृत्तमनुजीविनाम् ॥ इति ।

इति ब्रुवाणं सुग्रीवं रामो दशरथात्मजः ।
बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥

ज्ञायतां सौम्य वैदेही यदि जीवति वा नवा ।
स च देशो महाप्राज्ञ यस्मिन्वसति रावणः ॥

अधिगम्य तु वैदेहीं निलयं रावणस्य च ।
प्राप्तकालं विधास्यामि तस्मिन् काले सह त्वया ॥

अनेन चारमुखेन शत्रोः स्थित्यादिकं विचार्यैव कर्म आरंभणीयमिति सूचितम् ॥

तथाच **कामन्दके —**

सर्वसंपत्समुदयं सर्वावस्थाविचेष्टितम् । चारेण द्विषतां विद्यात् इति ।

आश्रमवासिकेऽपि —

आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ।
उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत ॥
उपलभ्य नृपो यायाद्विपरीतं च वर्जयेत् ॥ इति च ।

नाहमस्मिन्प्रभुः कार्ये वानरेश न लक्ष्मणः ।
त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥

त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम् ।
त्वं हि जानासि यत्कार्यं मम वीर न संशयः ॥

सुहृद्द्वितीयो विक्रान्तः प्राज्ञः कालविशेषवित् ।
भवानस्मद्धिते युक्तः सदाप्तोऽर्थार्थवित्तमः ॥

अनेन प्रभुणापि आप्ततमे अभिज्ञे अर्थसाधके स्वातन्त्र्यमाधाय कार्यं साधनीयमिति सूचितम्। अत एव दुर्योधनेन कार्यसाधनाय कर्णे सर्वोऽपि भारः प्रक्षिप्त इत्युक्त**मादिपर्वणि–**
अहं च कुरुराज्यं च यथेष्टमुपभुज्यताम् । भुंक्ष्व भोगान्मया सार्धं बन्धूनां प्रियकृद्भव ।

दुर्हृदां कुरु सर्वेषां मूर्ध्नि पादमरिन्दम इति।

वनपर्वण्यपि कर्णं प्रति दुर्योधनः –

धन्योऽस्म्यनुगृहीतोऽस्मि यस्य मे त्वं महाबलः। हितेषु वर्तसे नित्यं सफलं जन्म चाद्य मे॥
यदा च मन्यसे वीर सर्वशत्रुनिबर्हण। तदा निर्गच्छ भद्रं ते अनुशाधि च मामिति॥
न किंचिद्दुर्लभं तस्य यस्य त्वं पुरुषर्षभ। सहायश्चानुरक्तश्च मदर्थं च समुद्यतः॥ इति।

एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपम्।
अब्रवीद्रामसान्निध्ये लक्ष्मणस्य च धीमतः॥

शैलाभं मेघनिर्घोषमूर्जितं प्लवगेश्वरः।
सोमसूर्यात्मजैस्सार्धं वानरैर्वानरोत्तमम्॥

देशकालनयैर्युक्तः कार्याकार्यविनिश्चये।
वृतश्शतसहस्रेण वानराणां तरस्विनाम्॥

अधिगच्छ दिशं पूर्वां सशैलवनकाननाम्।
तत्र सीतां च वैदेहीं निलयं रावणस्य च॥

मार्गध्वं गिरिदुर्गेषु वनेषु च नदीषु च।
नदीं भागीरथीं रम्यां सरयूं कैशिकीं तथा॥

कालिन्दीं यमुनां रम्यां यामुनं च महागिरिम्।
सरस्वतीं च सिन्धुं च शोणं मणिनिभोदकम्॥

महीं कालमहीं चापि शैलकाननशोभिताम्।
ब्रह्ममालान्विदेहांश्च मालकान्काशिकोसलान्॥

मागधांश्च महाग्रामान् पुण्ड्रान्वंकांस्तथैव च।
पत्तणं कोशकाराणां भूमिं च रजताकरम्॥

सर्वमेतद्विचेतव्यं मृगयद्भिस्ततस्ततः।
रामस्य दयितां भार्यां सीतां दशरथस्नुषाम्॥

समुद्रमवगाढांश्च पर्वतान्पत्तनानि च।
मन्दरस्य च ये कोटिं संश्रिताः केचिदायताः॥

कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णिकाः।

घोरा लोहमुखाश्चैव यवनाश्चैव पावकाः ॥

अक्षया बलवन्तश्च पुरुषाः पुरुषादकाः ।
किराताः कर्णचूलाश्च हेमांगाः प्रियदर्शनाः ॥

आममीनाशनास्तत्र किराता द्वीपवासिनः ।
अन्तर्जलचरा घोरा नरव्याघ्रा इति श्रुताः ॥

एतेषामालयास्सर्वे विचेष्टाः कामरूपिणः ।
गिरिभिर्येन गम्यन्ते प्लवनेन प्लवेन च ॥

रत्नवन्तं यवद्वीपं सप्तराज्योपशोभितम् ।
सुवर्णं रूप्यकं चैव सुवर्णाकरमण्डितम् ॥

यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः ।
दिवं स्पृशति शृंगेण देवदानवसेवितः ॥

एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च ।
मार्गध्वं सहितास्सर्वे रामपत्नीं यशस्विनीम् ॥

ततो रक्तजलं भीममगाधं शीघ्रगामिनम् ।
गत्वा पारं समुद्रस्य सिद्धचारणसेवितम् ॥

तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च ।
रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ॥

पर्वतप्रभवा नद्यः सुरम्या बहुनिष्कुटाः ।
मार्गितव्या दरीमन्तः पर्वताश्च वनानि च ॥

ततस्समुद्रं द्वीपांश्च सुभीमान्द्रष्टुमर्हथ ।
ऊर्मिमन्तं महारौद्रं क्रोशन्तमनिलोद्धतम् ॥

तत्रासुरा महाकायाः छायां गृह्णन्ति नित्यशः ।
ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः ॥

तं कालमेघप्रतिमं महोरगनिषेवितम् ।
अधिगम्य महानादं तीर्थेनैव महोदधिम् ॥

ततो रक्तजलं भीमं लोहितं नाम सागरम् ।
गत्वा द्रक्ष्यथ तां चैव बृहतीं कूटशाल्मलीम् ॥

गृहं च वैनतेयस्य नानारत्नविभूषितम् ।

तत्र कैलाससंकाशं विहितं विश्वकर्मणा ॥

तत्र शैलनिभा भीमा मन्देहा नाम राक्षसाः ।
शैलशृङ्गेषु लंबन्ते नानारूपा भयावहाः ॥

ते पतन्ति जले नित्यं सूर्यस्योदयनं प्रति ।
निहता ब्रह्मतेजोभिरहन्यहनि राक्षसाः ॥

अभितप्ताश्च सूर्येण लंबन्ते स्म पुनः पुनः ।

अत्र ब्रह्मदत्तवराः सूर्येण योद्धुमुद्युक्ता मन्देहा राक्षसाः गायत्र्यभिमंत्रिताभिरद्भिः सूर्यतेजसा च निहताः पुनः पुनः लंबन्ते इत्युक्तम् । तथा च तैत्तिरीयश्रुतिः—'रक्षाँसि ह वा पुरोनुवाके तपोग्रमतिष्ठंत तान्प्रजापतिर्वरेणोपामन्त्रयत, तानि वरमवृणीतादित्यो नो योद्धा इति, तान्प्रजापतिरब्रवीत् योधयध्वमिति, तस्मादुत्तिष्ठन्तं ह वा तानि रक्षांस्यादित्यं योधयन्ति यावदस्तमन्वगात्तानि ह वा एतानि रक्षांसि गायत्र्याभिमन्त्रितेनांभसा शाम्यन्ति, तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखास्सन्ध्यायां गायत्रिया अभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति, ता एता आपो वज्रीभूत्वा तानि रक्षांसि मन्देहारुणे द्वीपे प्रक्षिपन्ति' इति ।

ततः पाण्डरमेघाभं क्षीरोदं नाम सागरम् ।
गत्वा द्रक्ष्यथ दुर्धर्षा मुक्ताहारमिवोर्मिभिः ॥

तस्य मध्ये महान् श्वेतः ऋषभो नाम पर्वतः ।
दिव्यगन्धैः कुसुमितै राजतैश्च नगैर्वृतः ॥

सरश्च राजतैः पद्मैः ज्वलितैर्हेमकेसरैः ।
नाम्ना सुदर्शनं नाम राजहंसैः समाकुलम् ॥

विबुधाश्चारणा यक्षाः किन्नरास्साप्सरोगणाः ।
हृष्टास्समभिगच्छन्ति नलिनीं तां रिरंसवः ॥

क्षीरोदं समतिक्रम्य ततो द्रक्ष्यथ वानराः ।
जलोदं सागरं श्रेष्ठं सर्वभूतभयावहम् ॥

तत्र तत्कोपजं तेजः कृतं हयमुखं महत् ।
अथाद्भुतं महावेगं रोदनं सचराचरम् ॥

तत्र विक्रोशतां नादो भूतानां सागरौकसाम् ।
श्रूयते च समर्थानां दृष्ट्वा तद्वडबामुखम् ॥

अनेन और्वाभिधस्य महर्षेः निमित्तविशेषजनितः कोपाग्निरेव हयशिरो भूत्वा सर्वसत्वसहितं समुद्रं दहतीत्युक्तम्। तथाचादिपर्वणि—

पुरा किल हैहयवंशप्रभवः यायजूकः कार्तवीर्यो नाम राजा सोमावसानसमयसन्तुष्टः स्वयाजकान् भार्गवान् अदभ्रधनधान्यरत्ननिचयैः सन्तर्प्य त्रिदिवं जगाम। ततः कार्यविशेषाय तत्कुलीनैः याचितधनाः भार्गवाः निधिनिधानादिना धनं गुप्तं विधाय नास्माकं धनमिति वञ्चयामासुः। ततस्तद्गृहेष्वेव प्रसह्य खननाद्युपायेन लब्धधना राजानः शरणागतानपि भार्गवान् समूलघातमागर्भं निघ्नन्तः कयाचिद्भृगुपत्न्या कुलसंरक्षणाय वर्षशतमूरुधृतं गर्भं कस्याश्चित्स्त्रियो वचनादवगत्य तद्धननाय प्रवृत्ताः स्वत एवोरुभेदनपूर्वकं बहिरागतेनौर्वाभिधेन दुस्सहतेजसा महर्षिणा परिमुषितलोचना जात्यन्धाः इव बभूवुः। ततो नष्टदृष्टयस्ते राजानः तामेव भृगुपत्नीं शरणं गताः, तया च और्वो बालक एव भवतां शरण्यः, तमेव शरणं गच्छतेत्यभिहिताः तमेवौर्वं शरणं प्राप्य तत्प्रसादेन लब्धलोचनाः स्वभवनमाजग्मुः। ततः स्वपूर्वपुरुषहननमुपेक्षितवतामखिललोकानां हननाय प्रवृत्तमौर्वमवलोक्य स्वर्गादभ्येत्य तत्पितर इत्थमवोचन्॥

और्व दृष्टः प्रभावस्ते तपसोग्रस्य पुत्रक। प्रसादं कुरु लोकानां नियच्छ क्रोधमात्मनः॥
आयुषा विप्रकृष्टेन यदा नः खेद आविशत्। तदास्माभिर्वधस्तात क्षत्रियैरीप्सितः स्वयम्॥
आत्महा पुरुषस्तात न लोकाल्लंभते शुभान्। ततोऽस्माभिस्समीक्ष्यैव नात्मनात्मा निपातितः॥
न चैव नः प्रियं तात यदिदं कर्तुमिछसि। नियछेदं मनः पापात् सर्वलोकपराभवात्॥ इति।

और्वोऽपि स्वपितृवचनेन सर्वलोकसंहरणान्निवृत्तबुद्धिस्तानिदमभाषत—

उक्तवानस्मि यत्क्रोधात्प्रतिज्ञां पितरस्तदा। सर्वलोकविनाशाय न सा मे वितथा भवेत्॥
वृथा रोषप्रतिज्ञो वै नाहं भवितुमुत्सहे। अनिस्तीर्णो हि मां रोषो दहेदग्निरिवारणिम्॥
यो हि कारणतः क्रोधं सञ्जातं क्षन्तुमर्हति। नालं समभुजस्सम्यक्त्रिवर्गं परिरक्षितुम्॥

समर्थेन च मया पापिष्ठाः पितृहन्तारः कथमुपेक्षणीयाः,

प्रतिषेद्धा हि पापस्य यदा लोकेषु विद्यते। तदा सर्वेषु लोकेषु पापकृन्नोपपद्यते॥
यदा तु प्रतिषेद्धारं पापो न लभते क्वचित्। तिष्ठन्ति बहवो लोके तदा पापेषु कर्मसु॥

जानन्नपि च यः पापं शक्तिमान्न नियच्छति । ईशः सन्सोऽपि तेनैव कर्मणा संप्रयुज्यते ॥
राजभिश्चेश्वरैश्चैव यदि वै पितरो मम । शक्तैर्न शकितास्त्रातुमिष्टं मत्वेह जीवितम् ॥
अत एवमहं क्रुद्धो लोकानामीश्वरोह्यहम् । भवतां च वचो नालमहं समतिवर्तितुम् ॥

तदिदानीं अखिललोकसंहरणाय संभूतोऽयं कोपाग्निः क्व वा विमोक्तव्य इति । ततः—

य एष मन्युजस्तेऽग्निर्लोकानादातुमिच्छति । अप्सु तम्मुञ्च भद्रं ते लोका ह्यप्सु प्रतिष्ठिताः ॥
आपोमयास्सर्वरसाः सर्वमापोमयं जगत् । तस्मादप्सु विमुञ्चेमं क्रोधाग्निं द्विजसत्तम ॥
एवं प्रतिज्ञा सत्यैव तवानघ भविष्यति । नचैवं सामरा लोका गमिष्यन्ति पराभवम् ॥
इति पितृभिरभिहितः—
ततस्तं क्रोधजं तात और्वोऽग्निं वरुणालये । उत्ससर्ज सचैवायमुपयुक्तो महोदधौ ॥
महद्धयशिरो भूत्वा यं तं वेदविदो विदुः । तमग्निमुद्वमन्वक्त्रात्पिबत्यम्भो महोदधौ ॥ इति ।

स्वादूदस्योत्तरे तीरे योजनानि त्रयोदश ।
जातरूपशिलो नाम महान्कनकपर्वतः ॥

तत्र चन्द्रप्रतीकाशं पन्नगं धरणीधरम् ।
पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः ॥

आसीनं पर्वतस्याग्रे सर्वभूतनमस्कृतम् ।
सहस्रशिरसं देवमनन्तं नीलवाससम् ॥

त्रिशिराः काञ्चनः केतुस्तालस्तस्य महात्मनः ।
स्थापितः पर्वतस्याग्रे विराजति सवेदिकः ॥

पूर्वस्यां दिशि निर्माणं कृतं तत्त्रिदशेश्वरैः ।
ततः परं हेममयः श्रीमानुदयपर्वतः ॥

तस्य कोटिर्दिवं स्पृष्ट्वा शतयोजनमायता ।
जातरूपमया दिव्या विराजति सवेदिका ॥

सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः ।
जातरूपमयैर्दिव्यैश्शोभते सूर्यसन्निभैः ॥

तत्र योजनविस्तारमुच्छ्रितं शतयोजनम् ।
शृंगं सौमनसं नाम जातरूपमयं ध्रुवम् ॥

तत्र पूर्वं पदं कृत्वा पुरा विष्णुस्त्रिविक्रमे ।
द्वितीयं शिखरं मेरोश्चकार पुरुषोत्तमः ॥

उत्तरेण परिक्रम्य जम्बूद्वीपे दिवाकरः।
दृश्यो भवति भूयिष्ठंशिखरं तन्महोच्छ्रितम् ॥

तत्र वैखानसा नाम वालखिल्या महर्षयः ।
प्रकाशमाना दृश्यन्ते सूर्यवर्णास्तपस्विनः ॥

अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते ।
यस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥

तस्य शैलस्य कुंजेषु कन्दरेषु वनेषु च ।
रावणस्स हि वैदेह्या मार्गितव्यस्ततस्ततः ॥

काञ्चनस्य च शैलस्य सूर्यस्य च महात्मनः।
आविष्टा तेजसा सन्ध्या पूर्वा रक्ता प्रकाशते ॥

पूर्वमेतत्कृतं द्वीपं पृथिव्या भुवनस्य च ।
सूर्यस्योदयनं चैव पूर्वा ह्येषा दिगुच्यते ॥

अनेन पूर्वनिर्मितद्वीपयोगाद्वा पूर्वं सूर्यस्य तत्र दर्शनाद्वा इयं दिक् पूर्वेत्युच्यत इत्युक्तम् । इत्थं च पूर्वस्या दिशः इतरासां च दिशां निर्वचनमुद्योगे—

यस्मात्पूर्वतरे काले पूर्वमेषा वृता सुरैः । अत एव च पूर्वेषां पूर्वामाशां प्रचक्षते ॥
पूर्वकार्याणि कार्याणि दैवानि सुखमीप्सता । यस्यामुदयते पूर्वं सर्वलोकप्रदीपकः ॥
सविता यत्र साध्यानां प्रथमं वर्तते तपः । यस्यां पूर्वमतिर्जाता यया व्याप्तमिदं जगत् ॥
चक्षुषी यत्र धर्मश्च यत्र चैव प्रतिष्ठित, इति ।
इयं विवस्वता पूर्वं स्रौवेण विधिना किल ।
गुरवे दक्षिणा दत्ता दक्षिणेत्युच्यते च दिक् ॥ इति ।
अत्र पश्चादहः सूर्यो विसर्जयति गाः स्वयम् । पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तमैः ॥
यस्मादुत्तीर्यते पापाद्यस्मान्निश्रेयसोऽश्नुते । तस्मादुत्तारणबलादुत्तरेत्युच्यते द्विज ॥ इति ।

तस्य पर्वतपृष्ठेषु निर्झरेषु गुहासु च ।
रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ॥

ततः परमगम्या स्यत्पूर्वा दिक् त्रिदशावृता ।
रहिता चन्द्रसूर्याभ्यामदृश्या तिमिरावृता ॥

शैलेषु तेषु रम्येषु कन्दरेषु वनेषु च ।
ये च देशा मया नोक्ता विचेया तत्र जानकी ॥

एतावद्वानरैः शक्यं गन्तुं वानरपुंगवाः ।
अभास्करममर्यादं न जानीमस्ततः परम् ॥

अधिगम्य तु वैदेहीं निलयं रावणस्य च ।
मासे पूर्वे निवर्तध्वमुदयं प्राप्य पर्वतम् ॥

ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम ।
सिद्धार्थास्सन्निवर्तध्वमधिगम्य च मैथिलीम् ॥

महेन्द्रकान्तां वनषण्डमण्डितां दिशं चरित्वा निपुणेन वानराः ।
अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्तास्सुखिनो भविष्यथ ॥

एकचत्वारिंशे

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलम् ।
दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥

नीलमग्निसुतं चैव हनूमन्तं च वानरम् ।
पितामहसुतं चैव जाम्बवन्तं महाकपिम् ॥

सुहोत्रं च शरारिं च शरगुल्मं तथैव च ।
गजं गवाक्षं गवयं सुषेणं वृषभं तथा ॥

मैन्दं च द्विविदं चैव विजयं गन्धमादनम् ।
उल्कामुखमसंगं च हुताशनसुतावुभौ ॥

अंगदप्रमुखान्वीरान्वीरः कपिगणेश्वरः ।
वेगविक्रमसम्पन्नान् सन्दिदेश विशेषवित् ॥

तेषामग्रेसरं चैव महाबलमथांगदम् ।
विधाय हरिवीराणामादिशद्दक्षिणां दिशम् ।

ये केचन समुद्देशाः तस्यां दिशि सुदुर्गमाः ।
कपीशः कपिमुख्यानां स तेषां तानुदाहरत् ॥

सहस्रशिरसं विन्ध्यं नानाद्रुमलतायुतम् ।
नर्मदां च नदीं दुर्गां महोरगनिषेविताम् ॥

ततो भोगवतीं रम्यां कृष्णवेणीं महानदीम् ।
वरदां च महाभागां महोरगनिषेविताम् ॥

मेखलामुत्कलां चैव दशार्णनगराण्यपि ।
अश्ववन्तीं अवन्तीं च सर्वमेवानुपश्यत ॥

विदर्भान्नृषिकांश्चैव रम्यान्महिषकानपि ।
तथा वत्सकलिङ्गांश्च काशिकांश्च समन्ततः ॥

अन्विष्य दण्डकारण्यं सपर्वतनदीगुहम् ।
नदीं गोदावरीं चैव सर्वमेवानुपश्यत ॥

तथैवान्ध्रांश्च पुण्ड्रांश्च चोलान्पाण्ड्यान्सकेरलान् ।
अयोमुखश्च गन्तव्यः पर्वतो धातुमण्डितः ॥

विचित्रशिखरश्श्रीमान् चित्रपुष्पितकाननः ।
सचन्दनवनोद्देशो मार्गितव्यो महागिरिः ॥

ततस्तामापगां दिव्यां प्रसन्नसलिलां शिवाम् ।
तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः ॥

तस्यासीनं नगस्याग्रे मलयस्य महौजसम् ।
द्रक्ष्यथादित्यसंकाशमगस्त्यमृषिसत्तमम् ॥

ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ।
ताम्रपर्णीं ग्राहजुष्टां तरिष्यथ महानदीम् ॥

सा चन्दनवनैर्दिव्यैः प्रच्छन्ना द्वीपशालिनी ।

कान्तेव युवतिः कान्तं समुद्रमवगाहते ॥

ततो हेममयं दिव्यं मुक्तामणिविभूषितम् ।
युक्तं कवाटं पाण्ड्यानां गता द्रक्ष्यथ वानराः ॥

ततस्समुद्रमासाद्य संप्रधार्यार्थनिश्चयम् ।
अगस्त्येनान्तरे तत्र समुद्रे विनिवेशितः ॥

चित्रसानुर्गतः श्रीमान् महेन्द्रः पर्वतोत्तमः ।
जातरूपमयः श्रीमानवगाढो महार्णवम् ॥

नानाविधैर्नगैः फुल्लैर्लताभिश्चोपशोभितम् ।
देवर्षियक्षप्रवरैरप्सरोभिश्च सेवितम् ॥

सिद्धचारणसंघैश्च प्रकीर्णं सुमनोहरम् ।
तमुपैति सहस्राक्षः सदा पर्वसु पर्वसु ॥

द्वीपस्तस्यापरे पारे शतयोजनमायतः ।
अगम्यो मानुषैर्दीप्तः तं मार्गध्वं समन्ततः ॥

तत्र सर्वात्मना सीता मार्गितव्या विशेषतः ।
स हि देशस्तु वध्यस्य रावणस्य दुरात्मनः ॥

राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ।
दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी ॥

अंगारकेति विख्याता छायामाक्षिप्य भोजनी ।
एवं निस्संशयान्कृत्वा संशयान्नष्टसंशयाः ॥

मृगयध्वं नरेन्द्रस्य पत्नीममिततेजसः ।
तमतिक्रम्य लक्ष्मीवान् समुद्रे शतयोजने ॥

गिरिः पुष्पितको नाम सिद्धचारणसेवितः ।
चन्द्रसूर्यांशुसंकाशः सागरांबुसमावृतः ॥

भ्राजते विपुलैश्शृङ्गैरंबरं विलिखन्निव ।
तस्यैकं काञ्चनं शृङ्गं सेवते यं दिवाकरः ॥

श्वेतं रजतमेकं च सेवते यं निशाकरः।
तमतिक्रम्य दुर्धर्षः सूर्यवान्नाम पर्वतः॥

अध्वना दुर्विगाहेन योजनानि चतुर्दश।
ततस्तमप्यतिक्रम्य वैद्युतो नाम पर्वतः॥

सर्वकामफलैर्वृक्षैः सर्वकालमनोहरैः।
तत्र भुक्त्वा महार्हाणि मूलानि च फलानि च॥

मधूनि पीत्वा मुख्यानि परं गच्छत वानराः।
तत्र नेत्रमनःकान्तः कुञ्जरो नाम पर्वतः॥

अगस्त्यभवनं यत्र निर्मितं विश्वकर्मणा।
तत्र योजनविस्तारमुच्छ्रितं दशयोजनम्॥

शरणं काञ्चनं दिव्यं नानारत्नविभूषितम्।
तत्र भोगवती नाम सर्पाणामालयः पुरी॥

विशालकक्ष्या दुर्धर्षा सर्वतः परिरक्षिता।
रक्षिता पन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्महाविषैः॥

सर्पराजो महाघोरो यस्यां वसति वासुकिः।
निर्याय मार्गितव्या च सा च भोगवती पुरी॥

तत्र चानन्तरं देशा ये केचन सुसंवृताः।
तं च देशमतिक्रम्य महानृषभसंस्थितः॥

सर्वरत्नमयः श्रीमानृषभो नाम पर्वतः।
गोशीर्षकं च पद्मं च हरिश्यामं च चन्दनम्॥

दिव्यमुत्पद्यते यत्र तच्चैवाग्निसमप्रभम्।
न तु तच्चन्दनं दृष्ट्वा स्प्रष्टव्यं वै कदाचन॥

रोहिता नाम गन्धर्वा घोरा रक्षन्ति तद्वनम्।
तत्र गन्धर्वपतयः पञ्च सूर्यसमप्रभाः॥

शैलूषो ग्रामणीर्भिक्षुः शुक्रो बभ्रुस्तथैव च।

रविसोमाग्निवपुषां निवासः पुण्यकर्मणाम् ॥

अन्ते पृथिव्या दुर्धर्षास्तत्र स्वर्गजितः स्थिताः ।
ततः परं न गन्तव्यः पितृलोकस्सुदारुणः ॥

राजधानी यमस्यैषा कष्टेन तमसा वृता ।

अनेन अतिपीडाकरः यमलोक उक्तः । तथाच **विष्णुपुराणे —**

यमस्य विषये घोराः शस्त्राग्निविषदायिनः । पतन्ति येषु पुरुषाः पापकर्मरतास्तु ये ॥
कूटसाक्षी तथा साक्ष्यपक्षपातेन यो वदेत् । यश्चान्यदनृतं वक्ति स नरो याति रौरवम् ॥
भ्रूणहा गुरुहन्ता च गोघ्नश्च मुनिसत्तम । यान्ति ते नरकं योधं यश्चोच्छ्वासनिरोधकः ॥
सुरापो ब्रह्महा हर्ता सुवर्णस्य च सूकरे । प्रयाति नरके यश्च तैस्संसर्गमुपैति वै ॥
राजन्यवैश्यहन्ता च तथैव गुरुतल्पगः । तप्तकुम्भे स्वसागामी हन्ति राजभटं च यः ॥
माध्वीविक्रयकृद्बन्धपालः केसरिविक्रयी । तप्तलोहे पतन्त्येते यश्च भक्तं परित्यजेत् ॥
स्नुषां सुतां वापि गत्वा महाज्वाले निपात्यते । अवमन्ता गुरूणां यो पश्चाक्रोष्टा नराधमः ॥
वेददूषयिता यश्च वेदविक्रयिकश्च यः । अगम्यगामी यश्च स्यात्ते यान्ति लवनं द्विज ॥
घोरे विमोहे पतति मर्यादादूषकस्तथा । देवद्विजपितृद्वेष्टा रत्नदूषयिता च यः ॥
स याति कृमिभक्ष्ये वै कृमिशे च दुरिष्टकृत् । पितृदेवातिथीन्यस्तु पर्यश्नाति नराधमः ॥
लालाभक्षेऽथ यात्युग्रे शरकर्ता च वेधके । करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः ॥
प्रयान्त्येते विशसने नरके भृशदारुणे । असत्प्रतिग्रहीता तु नरके यात्यधोमुखे ॥
अयाज्ययाजकस्तत्र तथा नक्षत्रसूचकः । वेगी पूयवहे चैको यतिमृष्टान्नभुङ्नरः ॥
लाक्षामांसरसानां च तिलानां लवणस्य च । विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ॥
मार्जारकुक्कुटछागश्वराहविहंगमान् । लालयन्नरकं याति तमेव द्विजसत्तम ॥
रंगोपजीवी कैवर्तः कुण्डाशी गरलस्तथा । सूची माहिषगश्चैव पर्वगामी च यो द्विज ॥
अंगारदाही मित्रघ्नः शंकुभिर्ग्रामयाजकः । रुधिरांभसि यान्त्येते सोमं विक्रीणते च ये ॥
मखहा ग्रामहन्ता च याति वैतरणीं नरः । धनयौवनमत्तास्तु मर्यादाभेदिनोऽपि ये ॥
ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये । असिपत्रवनं याति वनछेदी वृथैव यः ॥
औरभ्रका मृगव्याधा वह्निज्वाले पतन्ति वै । यान्त्येते द्विज तत्रैव ये च पाकेषु वह्निदाः ॥

व्रतेषु लोपको यश्च स्वश्रमात्प्रच्युतश्च यः। सन्दंशयातनामध्ये पततस्तावुभावपि ॥
दिवा स्वप्नेषु स्कन्दन्ति ये नरा ब्रह्मचारिणः। पुत्रैरध्यापिता यश्च ते पतन्ति श्वभोजने ॥
एते चान्ये च नरकाः शतशोऽथ सहस्रशः। येषु दुष्कृतकर्माणः पात्यन्ते यातनागताः ॥
तथैव पापान्येतानि तथान्यानि सहस्रशः। भुज्यन्ते यानि पुरुषैर्नरकान्तरगोचरैः ॥
वर्णाश्रमविरुद्धं च कर्म कुर्वन्ति ये नराः। कर्मणा मनसा वाचा निरयेषु पतन्ति ते ॥ इति।

एतावदेव युष्माभिर्वीरा वानरपुङ्गवाः।
शक्यं विचेतुं गन्तुं वा नातो गतिमतां गतिः ॥

सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते।
गतिं विदित्वा वैदेह्याः सन्निवर्तितुमर्हथ ॥

यस्तु मासान्निवृत्तोऽग्रे दृष्टा सीतेति वक्ष्यति।
मत्तुल्यविभवो भोगैस्सुखं स विहरिष्यति ॥

ततः प्रियतमो नास्ति मम प्राणाद्विशेषतः।
कृतापराधो बहुशो मम बन्धुर्भविष्यति ॥

अमितबलपराक्रमा भवन्तो विपुलगुणेषु कुलेषु च प्रसूताः।
मनुजपतिसुतां यथा लभध्वं तदधिगुणं पुरुषार्थमारभध्वम् ॥

द्विचत्वारिंशे

अथ प्रस्थाप्य सुग्रीवस्तान् हरीन्दक्षिणां दिशम्।
अब्रवीन्मेघसंकाशं सुषेणं नाम यूथपम् ॥

तारायाः पितरं राजा श्वशुरं भीमविक्रमम्।
अब्रवीत्प्राञ्जलिर्वाक्यं अभिगम्य प्रणम्य च ॥

अनेन राज्ञा सेवकोऽपि गुरुजनः प्रार्थनयैव कार्येषु नियोजनीय इति सूचितम्। अत एव **शल्यपर्वणि** —

ततो दुर्योधनः शल्यं भूमौ स्थित्वा रथे स्थितम्। उवाच प्राञ्जलिर्भूत्वा रामभीष्मसमं रणे ॥
स भवानस्तु नश्शूरः प्रणेता वाहिनीमुखे ॥ इति।

महर्षिपुत्रं मारीचमर्चिष्मन्तं महाकपिम्।

वृतं कपिवरैः शूरैः महेन्द्रसदृशद्युतिम् ॥

मरीचपुत्रान्मारीचानर्चिर्माल्यान्महाबलान् ।
ऋषिपुत्रांश्च तान्सर्वान्प्रतीचीमादिशद्दिशम् ॥

द्वाभ्यां शतसहस्राभ्यां कपीनां कपिसत्तमाः ।
सुषेणप्रमुखा यूयं वैदेहीं परिमार्गथ ॥

सुराष्ट्रान्सह बल्हीकान् शूरान्भीमांस्तथैव च ।
स्फीताञ्जनपदान्रम्यान् विपुलानि पुराणि च ॥

पुन्नागगहनं कुक्षिं बकुलोद्दालकाकुलम् ।
तथा केतकषण्डांश्च मार्गध्वं हरियूथपाः ॥

प्रत्यक्स्रोतोवहाश्चैव नद्यश्शीतजलाश्शिवाः ।
तापसानामरण्यानि कान्तारगिरयश्च ये ॥

ततः स्थलीं मरुप्रायामत्युच्चशिरसश्शिलाः ।
गिरिजालावृतां दुर्गां मार्गित्वा पश्चिमां दिशम् ॥

ततः पश्चिममासाद्य समुद्रं द्रष्टुमर्हथ ।
तिमिनक्रायुतजलमक्षोभ्यमथ वानराः ॥

ततः केतकषण्डेषु तमालगहनेषु च ।
कपयो विहरिष्यन्ति नारिकेलवनेषु च ॥

तत्र सीतां च मार्गध्वं निलयं रावणस्य च ।
वेलातटनिविष्टेषु पर्वतेषु वनेषु च ॥

मुरलीपत्तणं चैव रम्यं चैव जटीपुरम् ।
आवन्तीमङ्गलोपां च तथा चालक्षितं वनम् ॥

राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ।
सिन्धुसागरयोश्चैव संगमे तत्र पर्वतः ॥

महान्हेमगिरिर्नाम शतशृंगो महाद्युतिः ।
तत्र प्रस्थेषु रम्येषु सिंहाः पक्षिमृगाः स्थिताः ॥

तिमिमत्स्यांगजाश्चैव नीडान्यारोपयन्ति ते ।
तारा निनादास्सिंहानां गिरिश्रृंगगताश्च ये ॥

दृप्तास्तृप्ताश्च मातंगास्तोयदस्वननिस्वनाः ।
निवसन्ति विशालेऽस्मिन् तोयपूर्णे समन्ततः ॥

तस्य श्रृंगं दिवस्पर्शं कांचनं चित्रपादपम् ।
सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥

कोटिं तत्र समुद्रेऽथ कांचनीं शतयोजनाम् ।
दुर्दर्शां पारियात्रस्य गता द्रक्ष्यथ वानराः ॥

कोट्यस्तत्र चतुर्विंशद्गन्धर्वाणां तरस्विनाम् ।
वसन्त्यग्निनिकाशानां घोराणां कामरूपिणाम् ॥

पावकार्चिःप्रतीकाशाः समवेतास्सहस्रशः ।
नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः ॥

नादेयं च फलं तस्माद्देशात्किंचित्प्लवंगमैः ।
दुरासदा हि ते वीरास्सत्वन्तो महाबलाः ॥

फलमूलानि ते तत्र रक्षन्ते भीमविक्रमाः ।
तत्र यत्नश्च कर्तव्यो मार्गितव्या च जानकी ॥

नहि तेभ्यो भयं किंचित्कपित्वमनुवर्तताम् ।
तत्र वैडूर्यवर्णाभो वज्रसंस्थानसंस्थितः ॥

नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः ।
श्रीमान्समुदितस्तत्र योजनानां शतं समम् ॥

गुहास्तत्र विचेतव्याः प्रयत्नेन प्लवङ्गमाः ।
चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः ॥

तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा ।
तत्र पंचजनं हत्वा हयग्रीवं च दानवम् ॥

आजहार ततश्चक्रं शंखं च पुरुषोत्तमः ।

अनेन विष्णोश्शंखचक्रस्थानमुक्तम् । तत्र शंखलाभस्थानमुक्तं **हरिवंशे** —

गत्वा समुद्रं तेजस्वी विवेशान्तर्जलं हरिः । स तु पञ्चजनं हत्वा शंखं लेभे जनार्दनः ॥
यस्स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ॥ इति ।

विष्णुपुराणेऽपि —

सान्दीपिनेरधिगतविद्यः बलभद्रसहितः कृष्णः तेन गुरुणा समुद्रं प्रविष्टं मत्पुत्रं दक्षिणात्वेन देहीत्युक्तोन्तर्जलं गत्वा पञ्चजनं च तम् —

कृष्णो जग्राह तस्यास्थिप्रभवं शंखमुत्तमम् । यस्य नादेन दैत्यानां बलहानिरजायत ॥
देवानां ववृधे तेजो यात्यधर्मश्च संक्षयम् ॥ इति ।

तत्र सानुषु चित्रेषु विशालासु गुहासु च ।
रावणस्सहि वैदेह्या मार्गितव्यस्ततस्ततः ॥

योजनानि चतुष्षष्टिर्वराहो नाम पर्वतः ।
सुवर्णश्टङ्गस्सुश्रीमान् अगाधे वरुणालये ॥

तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरम् ।
तस्मिन्वसति दुष्टात्मा नरको नाम दानवः ॥

तत्र सानुषु चित्रेषु विशालासु गुहासु च ।
रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ॥

तमतिक्रम्य शैलेन्द्रं काञ्चनान्तरनिर्दरः ।
पर्वतस्सर्वसौवर्णो नानाप्रस्रवणायुतः ॥

तं गजाश्च वराहाश्च सिंहव्याघ्राश्च सर्वतः ।
अभिगर्जन्ति सततं तेन शब्देन दर्पिताः ॥

तस्मिन्हरिहयश्श्रीमान् महेन्द्रः पाकशासनः ।
अभिषिक्तः सुरै राजा मेघवान्नाम पर्वतः ॥

तमतिक्रम्य शैलेन्द्रं महेन्द्रपरिपालितम् ।
षष्टिं गिरिसहस्राणि काञ्चनानि गमिष्यथ ॥

तरुणादित्यवर्णानि भ्राजमानानि सर्वशः ।

जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः ॥

तेषां मध्ये स्थितो राजा मेरुरुत्तरपर्वतः ।
आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥

तेनैवमुक्तश्शैलेन्द्रः सर्व एव त्वदाश्रयाः ।
मत्प्रसादाद्भविष्यन्ति दिवा रात्रौ च काञ्चनाः ॥

त्वयि ये वापि वत्स्यन्ति देवगन्धर्वदानवाः ।
ते भविष्यन्ति रक्ताश्च प्रभया काञ्चनप्रभाः ॥

विश्वेदेवाश्च वसवो मरुतश्च दिवौकसः ।
आगम्य पश्चिमां सन्ध्यां मेरुमुत्तरपर्वतम् ॥

आदित्यमुपतिष्ठन्ति तैश्च सूर्योऽभिपूजितः ।
अदृश्यस्सर्वभूतानामस्तं गच्छति पर्वतम् ॥

योजनानां सहस्राणि दश तानि दिवाकरः ।
मुहूर्तार्धेन तं शीघ्रमभियाति शिलोच्चयम् ॥

शृङ्गे तस्य महद्दिव्यं भवनं सूर्यसन्निभम् ।
प्रासादगणसंबाधं विहितं विश्वकर्मणा ॥

शोभितं तरुभिश्चित्रैः नानापक्षिसमाकुलैः ।
निकेतः पाशहस्तस्य वरुणस्य महात्मनः ॥

अन्तरा मेरुमस्तं च तालो दशशिरो महान् ।
जातरूपमयश्श्रीमान् भ्राजते चित्रवेदिकः ।
तेषु सर्वेषु दुर्गेषु सरस्सु च सरित्सु च ॥

रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ।
यत्र तिष्ठति धर्मज्ञः तपसा स्वेन भावितः ॥

मेरुसावर्णिरित्येवं ख्यातो वै ब्रह्मणा समः ।
प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसन्निभः ॥

प्रणम्य शिरसा भूमौ प्रवृत्तिं मैथिलीं प्रति ।

एतावज्जीवलोकस्य भास्करो रजनीक्षये ॥

कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतम् ।
एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ॥

अभास्करममर्यादं न जानीमस्तः परम् ।
अधिगम्य तु वैदेहीं निलयं रावणस्य च ॥

अस्तपर्वतमासाद्य पूर्णे मासे निवर्तत ।
ऊर्ध्वं मासन्न वस्तव्यं वसन्वध्यो भवेन्मम ॥

सहैव शूरो युष्माभिः श्वशुरो मे गमिष्यति ।
श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः ॥

गुरुरेष महाबाहुः श्वशुरो मे महाबलः ।
भवन्तश्चापि विक्रान्ताः प्रमाणं सर्वकर्मसु ॥

प्रमाणमेनं संस्थाप्य पश्यध्वं दक्षिणां दिशाम् ।
भवन्तः परिपश्यन्तु यथा दृश्येत जानकी ॥

दृष्टायां तु नरेन्द्रस्य पत्न्याममिततेजसः ।
कृतकृत्या भविष्यामः कृतस्य प्रतिकर्मणा ॥

अतोऽन्यदपि यत्किंचित्कार्यस्यास्य हितं भवेत् ।
संप्रधार्य भवद्भिश्च देशकालार्थसंहितम् ॥

ततस्सुषेणप्रमुखाः प्लवङ्गमाः सुग्रीववाक्यं निपुणं निशम्य ।
आमन्त्र्य सर्वे प्लवगाधिपास्ते जग्मुर्दिशं तां वरुणाभिगुप्ताम् ॥

त्रिचत्वारिंशे

ततः सन्दिश्य सुग्रीवः श्वशुरं पश्चिमां दिशाम् ।
वीरं शतबलिं नाम वानरं वानराधिपः ॥

उवाच राजा सर्वज्ञः सर्ववानरसत्तमः ।
वाक्यमात्महितं चैव रामस्य च हितं तथा ॥

वृतश्शतसहस्रेण त्वद्विधानां वनौकसाम् ।

वैवस्वतसुतैः सार्धं प्रतिष्ठस्व स्वमन्त्रिभिः ॥

दिशं ह्युदीचीं विक्रान्तां हेमशैलवतंसकाम् ।
सर्वतः परिमार्गध्वं रामपत्नीमनिन्दिताम् ॥

अस्मिन्कार्ये विनिर्वृत्ते कृते दाशरथेः प्रिये ।
एकां बुद्धिं समास्थाय दृश्यते जानकी यथा ॥

तथा भवद्भिः कर्तव्यमस्मत्प्रियहितैषिभिः ।
अयं हि सर्वभूतानामाप्तस्तु नरसत्तमः ॥

अस्मासु चागतप्रीती रामः परपुरंजयः ।
इमानि वनदुर्गाणि नद्यः शैलान्तराणि च ॥

भवन्तः परिमार्गन्तु बुद्धिविक्रमसंपदा ।
तत्र म्लेच्छान्पुलिन्दांश्च शूरसेनांस्तथैव च ॥

प्रस्थलान्भरतांश्चैव कुरूंश्च सह मण्डलैः ।
कांबोजान्यवनांश्चैव शकानारट्टकानपि ॥

बाल्हीकानृषिकांश्चैव पौरवानथ कङ्कणान् ।
चीनान्परमचीनांश्च नीहारांश्च पुनः पुनः ॥

अन्विष्य दण्डकांश्चैव हिमवन्तं तथैव च ।
लोध्रपद्मकषण्डेषु देवदारुवनेषु च ॥

रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ।
ततः सोमाश्रमं गत्वा देवगन्धर्वसेवितम् ॥

कालं नाम महासानुं पर्वतं तं गमिष्यथ ।
ततो देवसखो नाम पर्वतः पतगालयम् ॥

नानापक्षिगणाकीर्णो विविधद्रुमभूषितः ।
तस्य कांचनषण्डेषु निर्जरेषु गुहासु च ॥

रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ।
तमतिक्रम्य चाकाशं सर्वतः शतयोजनम् ॥

अपर्वतनदीवृक्षं सर्वसत्वविवर्जितम् ।
तं तु शीघ्रमतिक्रम्य कान्तारं रोमहर्षणम् ॥

कैलासं पाण्डरं शैलं प्राप्य हृष्टा भविष्यथ ।
तत्र पाण्डरमेघाभं जांबूनदपरिष्कृतम् ॥

कुबेरभवनं रम्यं निर्मितं विश्वकर्मणा ।
विशाला नलिनी यत्र प्रभूतकमलोत्पला ॥

हंसकारण्डवाकीर्णा ह्यप्सरोगणसेविता ।
तत्र वैश्रवणो राजा सर्वभूतनमस्कृतः ॥

धनदो नाम रमते गुह्यकैस्सह यक्षराट् ।
तत्र चन्द्रनिकाशेषु पर्वतेषु गुहासु च ॥

रावणस्सह वैदेह्या मार्गितव्यस्ततस्ततः ।
क्रौञ्चं तु गिरिमासाद्य बिलं तस्य सुदुर्गमम् ॥

अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत्स्मृतम् ।
वसन्ति हि महात्मानस्तत्र सूर्यसमप्रभाः ॥

देवैरप्यर्चितास्सम्यक् देवरूपा महर्षयः ।
क्रौञ्चस्यास्य गुहाश्चान्या सानूनि शिखराणि च ॥

निर्दरश्च नितम्बाश्च विचेतव्यास्ततस्ततः ।
क्रौञ्चस्य शिखरं चापि निरीक्ष्य च ततस्ततः ।
अवृक्षं कामशैलं च मानसं विहगालयम् ॥

न गतिस्तत्र भूतानां देवदानवरक्षसाम् ।
स च सर्वैर्विचेतव्यः पर्वतो बहुकन्दरः ॥

क्रौञ्चं गिरिमतिक्रम्य मैनाको नाम पर्वतः ।
मयस्य भवनं तत्र दानवस्य स्वयं कृतम् ॥

मैनाकस्तु विचेतव्यः ससानुप्रस्थभूतलः ।
स्त्रीणामश्वमुखीनां तु निकेतास्तत्र तत्र तु ॥

तं देशं समतिक्रम्य आश्रमं सिद्धसेवितम् ।
सिद्धा वैखानसास्तत्र वालखिल्याश्च तापसाः ॥

वन्द्यास्तु ते तपस्सिद्धाः तपसा वीतकल्मषाः ।
प्रष्टव्याश्चैव सीतायाः प्रवृत्तिं विनयान्वितैः ॥

हेमपुष्करसंछन्नं तत्र वैखानसं सरः ।
तरुणादित्यसंकाशैर्हंसैर्विचरितं शुभैः ॥

औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः ।
गजः पर्येति तं देशं सदा सह करेणुभिः ॥

तत्सरस्समतिक्रम्य नष्टचन्द्रदिवाकरम् ।
अनक्षत्रगणव्योम निष्पयोदमनादिमत् ॥

गभस्तिभिरिवार्कस्य स तु देशः प्रकाशते ।
विश्राम्यद्भिस्तपस्सिद्धैर्देवकल्पैस्स्वयंप्रभैः ॥

तं तु देशमतिक्रम्य शैलोदा नाम निम्नगा ।
उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः ॥

तेन यान्ति परं तीरं सिद्धान्प्रत्यानयन्ति च ।
उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः ॥

ते च काञ्चनपद्माभिः पद्मिनीभिः कृतोदकाः ।
नीलवैडूर्यपत्राढ्या नद्यस्तत्र सहस्रशः ॥

रक्तोत्पलवनैश्चारुमण्डिताश्च हिरण्मयैः ।
तरुणादित्यसंकाशैः भान्ति तत्र जलाशयाः ॥

महार्हमणिपत्रैश्च कांचनप्रभकेसरैः ।
नीलोत्पलवनैश्चित्रैः स देशस्सर्वतो वृतः ॥

निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः ।
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥

सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः ।

जातरूपमयैश्चापि हुताशनसमप्रभैः ॥

नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
दिव्यगन्धरसस्पर्शाः सर्वान्कामान्स्रवन्ति च ॥

नानाकाराणि वासांसि फलन्त्यन्ये नगोत्तमाः ।
मुक्तावैडूर्यचित्राणि भूषणानि तथैव च ॥

स्त्रीणां चाप्यनुरूपाणि पुरुषाणां तथैव च ।
महार्हाणि विचित्राणि हैमान्यन्ये नगोत्तमाः ॥

फलन्ति शयनीयानि चित्रास्तरणवन्ति च ।
मनःकान्तानि माल्यानि फलन्त्यत्र परे द्रुमाः ॥

पानानि च महार्हाणि भक्ष्याणि विविधानि च ।
स्त्रियश्च गुणसंपन्ना रूपयौवनलक्षिताः ॥

गन्धर्वाः किन्नरास्सिद्धा नानाविद्याधरास्तथा ।
रमन्ते सहितास्तत्र नारीभिर्भास्करप्रभाः ॥

सर्वे सुकृतकर्माणः सर्वे रतिपरायणाः ।
सर्वे कामार्थसहिताः वसन्ति सहयोषितः ॥

गीतवादित्रनिर्घोषः सोद्घुष्टहसितस्वनः ।
श्रूयते सततं तत्र सर्वभूतमनोहरः ॥

तत्र नामुदितः कश्चिन्नास्ति कश्चिदसत्प्रियः ।
अहन्यहनि वर्धन्ते गुणास्तत्र मनोरमाः ॥

अनेन उत्तरकुरुमाहात्म्यमुक्तम् । एतन्माहात्म्यं च **भीष्मपर्वणि** धृतराष्ट्रं प्रति संजयेन विस्तरेण प्रतिपादितम् । **धृतराष्ट्रः**—

मनोरथोत्तरं पार्श्वं पूर्वं चाचक्ष्व सञ्जय । निखिलेन महाबुद्धे माल्यवन्तं च पर्वतम् ॥
दक्षिणेन तु नीलस्य मेरोः पार्श्वे तथोत्तरे । उत्तराः कुरवो राजन्पुण्यास्सिद्धनिषेविताः ॥
तत्र वृक्षा मधुफलाः नित्यपुष्पफलोपगाः । पुष्पाणि च सुगन्धीनि रसवन्ति फलानि च ॥
सर्वकामफलास्तत्र केचिद्वृक्षा निषेवताम् । अपरे क्षीरिणो नाम वृक्षास्तत्र नराधिप ॥

ये क्षरन्ति सदा क्षीरं षड्रसं चामृतोपमम् । वस्त्राणि च प्रसूयन्ते फलेष्वाभरणानि च ॥
सर्वा मणिमयी भूमिः सूक्ष्मकाञ्चनवालुका । सर्वर्तुसुखसंस्पर्शा निष्पङ्का च नराधिप ॥
देवलोकच्युतास्सर्वे जायन्ते तत्र मानवाः । शुक्लाभिजनसंपन्नास्सर्वे सुप्रियदर्शनाः ॥
मिथुनानि च जायन्ते स्त्रियश्चाप्सरसोपमाः । तेषां ते क्षीरिणां क्षीरं पिबन्त्यमृतसन्निभम् ॥
मिथुनं जायते काले समं तच्च प्रवर्धते । तुल्यरूपगुणोपेतं समवेशं तथैव च ॥
एवमेवानुरूपं च चक्रवाकसमं विभो । निरामयाश्च ते लोका नित्यं मुदितमानसाः ॥
दशवर्षसहस्राणि दशवर्षशतानि च । जीवन्ति ते महाराज न चान्योन्यं जहत्युत ॥
भारुण्डा नाम शकुनास्तीक्ष्णतुण्डा महाबलाः । तान्निर्हरन्तीह मृतान्दरीषु प्रक्षिपन्ति च ॥
उत्तराः कुरवो राजन्व्याख्यातास्ते समासतः ॥ इति ।

समतिक्रम्य तं देशमुत्तरं तोयसन्निधिम् ।
तत्र हेमगिरिर्नाम मध्ये हेममयो महान् ॥

इन्द्रलोकगता ये च ब्रह्मलोकगताश्च ये ।
देवास्तं समवेक्षन्ते गिरिराजं दिवंगतम् ॥

स तु देशो विसूर्योऽपि तस्य भासा प्रकाशते ।
सूर्यलक्ष्म्याभिविज्ञेयस्तपतेव विवस्वता ॥

भगवानपि विश्वात्मा शंभुरेकादशात्मकः ।
ब्रह्मा वसति देवेशो ब्रह्मर्षिपरिवारितः ॥

कथंचन न गन्तव्यं कुरूणामुत्तरेण वः ।
अन्येषामपि भूतानां नातिक्रामति वै गतिः ॥

स हि हेमगिरिर्नाम देवानामपि दुर्गमः ।
तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ ॥

एतावद्वानरैः शक्यं गन्तुं वानरपुङ्गवाः ।
अभास्करममर्यादं न जानीमस्ततः परम् ॥

सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितम् ।
यदन्यदपि नोक्तं च तत्रापि क्रियतां मतिः ॥

ततः कृतं दाशरथेर्महत्प्रियं महत्तरं चापि ततो मम प्रियम् ।
कृतं भविष्यत्यनिलानलोपमा विदेहजादर्शनजेन कर्मणा ॥

ततः कृतार्थास्सहितास्सबान्धवा मयार्चितास्सर्वगुणैर्मनोरमैः ।
चरिष्यथोर्वीं प्रतिशान्तशत्रवः सह प्रियाभिर्मुदिताः प्लवंगमाः ॥

चतुश्चत्वारिंशे

विशेषेण तु सुग्रीवो हनूमत्यर्थमुक्तवान् ।
स हि तस्मिन्हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥

अब्रवीच्च हनूमन्तं विक्रान्तमनिलात्मजम् ।
सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसाम् ॥

न भूमौ नान्तरिक्षे वा नांबरे नामरालये ।
नाप्सु वा गतिसंगं ते पश्यामि हरिपुंगव ॥

सासुरास्सहगन्धर्वास्सनागनरदेवताः ।
विदितास्सर्वलोकास्ते ससागरधराधराः ॥

गतिर्वेगश्च तेजश्च लाघवं च महाकपे ।
पितुस्ते सदृशं वीर मारुतस्य महौजसः ॥

तेजसा वापि ते भूतं समं भुवि न विद्यते ।
तद्यथा लभ्यते सीता तत्त्वमेवोपपादय ॥

त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः ।
देशकालानुवृत्तिश्च नयश्च नयपण्डित ॥

अनेन राज्ञा प्रबलतरकार्यसाधनाय भृत्यानां नियोजनावसरे सम्माननादिभिः प्रोत्साहनं कर्तव्यमिति सूचितम् । अत एव सैनापत्ये दुर्योधनेन प्रार्थनापूर्वकं नियोजितो भीष्म इति प्रतिपादितमुद्योगे —

भवानुशनसा तुल्यो हितैषी च सदा मम । असंहार्यः स्थितो धर्मे स नस्सेनापतिर्भव ॥
रश्मिवत्तामिवादित्यो वीरुधामिव चन्द्रमाः । कुबेर इव यक्षाणां मरुतामिव वासवः ॥
पर्वतानां यथा मेरुः सुपर्णः पततामिव । कुमार इव भूतानां वसूनामिव हव्यवाट् ॥

भवता हि वयं गुप्ताः शक्रेण त्रिदिवौकसः। अनाधृष्या भविष्यामः त्रिदशानामपि ध्रुवम् ॥
प्रयातु वो भवानग्रे देवानामिव पावकिः। वयं त्वामनुयास्यामः सौरभेया इवर्षभम् ॥ इति।

ततः कार्यसमारम्भमवगत्य हनूमति।
विदित्वा हनुमन्तं च चिन्तयामास राघवः ॥

सर्वथा निश्चितार्थोऽयं हनूमति हरीश्वरः।
निश्चितार्थकरश्चापि हनूमान्कार्यसाधने ॥

तदेवं प्रस्थितस्यास्य परिज्ञातस्य कर्मभिः।
भर्त्रा परिगृहीतस्य ध्रुवः कार्यफलोदयः ॥

अनेन गुणाढ्योऽपि भर्त्रा परिगृहीतश्चेत्कार्यसाधको भवतीति सूचितम्। तथाच प्राचीनाः 'न तत्र हेतुर्न कलिर्न चाप्यहं प्रभुप्रसादो हि तनोति पौरुषम्'। इति।

यस्मिन् सर्वाधिकं चक्षुरारोपयति पार्थिवः।
सुते वा स्वकुलीने वा स लक्ष्म्या हरते मनः ॥ इति च।

परिगृहीतोऽपि गुणाढ्य इति विशेषणेन निर्गुणः कार्यसाधको न भवतीति सूचितम्। तथाच प्राचीनाः —

'अवस्तु वस्तु न भवेत्स्तुतमप्यतिगौरवात्। फलन्त्यमृतसेकेन न भद्राणि विषद्रुमाः ॥ इति।

तं समीक्ष्य महातेजाः व्यवसायोत्तरं हरिम्।
कृतार्थ इव संवृत्तः प्रहृष्टेन्द्रियमानसः ॥

ददौ तस्य ततः प्रीतः स्वनामांकोपशोभितम्।
अंगुलीयमभिज्ञानं राजपुत्र्याः परंतपः ॥

अनेन त्वां हरिश्रेष्ठ चिह्नेन जनकात्मजा।
मत्सकाशादनुप्राप्तमनुद्विग्नानुपश्यति ॥

व्यवसायश्च ते वीर सत्वयुक्तिश्च विक्रमः।
सुग्रीवस्य च सन्देशः सिद्धिं कथयतीव मे ॥

स तं गृह्य हरिश्रेष्ठः स्थाप्य मूर्ध्नि कृताञ्जलिः।
वन्दित्वा चरणौ चैव प्रस्थितः प्लवगोत्तमः ॥

स तत्प्रकर्षन् हरिणां बलं महत् बभूव वीरः पवनात्मजः कपिः ।
गतांबुदे व्योम्नि विशुद्धमण्डलः शशीव नक्षत्रगणोपशोभितः ॥

अतिबल बलमाश्रितस्तवाहं हरिवरविक्रम विक्रमैरनल्पैः ।
पवनसुत यथाधिगम्यते सा जनकसुता हनुमंस्तथा कुरुष्व ॥

नन्वत्र युवराजे बलाध्यक्षे अंगदे सति हनुमतः स्वतन्त्रतया पुरस्कारः अभिज्ञान-प्रदानादिकं चानुचितं । तथाहि अंगदस्तावद्युवराजः प्रागेव रामाज्ञया यौवराज्येऽभिषेचनात्, दक्षिणस्यां दिशि प्रस्थापितानामधिपतिश्चायं " जांबवान्यत्र नेता स्यादंगदश्च महाबलः, अंगदप्रमुखा वीरा, इति बहुधा तत्र तत्र अधिपतित्वव्यवहारात् । राज्ञा च यो यदाधिपत्ये नियुक्तस्तन्मुखेनैव तत्कार्ये साधकानां प्रेषणबहुमत्यादिकं कर्तव्यं । स्वतन्त्रतया बहुमतिनियोजनादिकरणे, तत्प्राधान्यभङ्गापत्तेः । अनेकप्रधानकत्वे च अनेक-ग्रामण्यधिष्ठितग्रामवत्कार्यस्यापि विनाशप्रसंगात् । एतद्दोषपरिजिहीर्षयैव सर्वतान्त्रिकैरपि ज्ञानकर्मेन्द्रियसमुदायो नात्मेत्युक्तम् । अत एवानेकप्रधानकत्वे सति कार्यहानिः एकप्रधानकत्वे च कार्यसिद्धिरिति प्रतिपादितं **उद्योगेऽपि** —

श्रूयन्ते हि महाप्राज्ञ हेहयानमितौजसः । अभ्ययुर्ब्राह्मणास्सर्वे समुच्छ्रितकुशायुधाः ॥
तानन्वयुस्तदा वैश्याश्शूद्राश्चैव पितामह । एकतस्तु त्रयो वर्णाः एकतः क्षत्रियर्षभाः ॥
ते तु युद्धेष्वभज्यन्त त्रयो वर्णाः पुनः पुनः । क्षत्रियास्तु जयन्ते वै बहुलं चैकतो बलम् ॥
ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः । तेभ्यश्शशंसुर्धर्मज्ञा याथातथ्यं पितामह ॥
वयमेकस्य श्रृणुमो महाबुद्धिमतो वचः । भवन्तस्तु पृथक् सर्वे स्वबुद्धिवशवर्तिनः ॥
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजम् । नयेषु कुशलं शूरमजयन् क्षत्रियांस्तदेति ॥

अत एव च सुग्रीवेण —

प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशम्। श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः ॥इति

प्रतीच्यां दिशि वानराणां प्रस्थापनसमये सुषेणाधीनास्सर्वे वानराः कृताः । नच प्रधानत्वेऽप्यसमर्थत्वमङ्गदस्येति वाच्यं, असमर्थत्वे यौवराज्याभिषेकानुपपत्तेः । समर्थस्यैव राज्यार्हत्वात्सुग्रीवहनुमद्वचनाभ्यां समर्थत्वावगमेनासामर्थ्यासिद्धेश्च । तथा च **सुग्रीव-वाक्यम्** —

' सुतस्सुलभ्यस्सुजनस्सुवश्यः कुतस्तु पुत्रस्सदृशोऽङ्गदेन ॥ इति ।

हनुमद्वचनमपि —

बुध्या ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम्। चतुर्दशगुणं मेने हनुमान्वालिनस्सुतम् ॥
आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः। शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥
बृहस्पतिसमं बुध्या विक्रमैस्सदृशं पितुः ॥ इति।

तथा च समर्थतरमखिलगुणाढ्यमाधिपत्ये नियुक्तमङ्गदमपहाय स्वतन्त्रतया हनुमत्पुरस्करणांगुलीयकप्रदानादिकमनुचितमिति चेन्न। ज्ञातित्वेनांगदस्याविश्वसनीयतया, आप्तमन्त्रित्वेन हनुमतो विश्वसनीयतया च तं प्रति विशिष्य कार्यकथनं युक्तमेव। तथाहि— राज्ञां सर्वत्राविश्वास अत्यन्तविश्वासो वा न कर्तव्यः। उभयोर्हानिकरत्वात्, तथा च **राजधर्मे —**

एकान्तेन हि विश्वासः कृत्स्नो धर्मार्थनाशकः। अविश्वासश्च सर्वत्र मृत्युनापि विशिष्यते ॥
अकालमृत्युर्विश्वासः विश्वसन्हि विपद्यते। यस्मिकरोति विश्वासं इच्छतस्तस्य जीवति ॥
तस्माद्विश्वसितव्यं च शंकितव्यं च केषुचित्। एषा नीतिगतिस्तात लक्ष्म्याश्चैव सनातनी ॥ इति

अविश्वसनीयाश्च स्वानन्तरराजार्हाः पुत्रभ्रात्रादयो ज्ञातयश्च। तथाच **राजधर्मे—**

यं मन्येत ममाभावादिममर्थागमः स्पृशेत्।
नित्यं तस्माच्छंकितव्यममित्रं तं विदुर्बुधाः ॥ इति।

ज्ञातिभ्यश्चैव बुध्येथा मृत्योरिव भयं सदा। उपराजेव राजर्धिं ज्ञातिर्न सहते सदा ॥
ऋजोर्मृदोर्वदान्यस्य धीमतस्सत्यवादिनः। नान्यो ज्ञातेर्महाभागो विनाशमभिनन्दति ॥
विश्वस्तवदविश्वस्तस्तेषु वर्तेत सर्वदा ॥ इति।

कामन्दकेऽपि —

लोलुप्यमानास्तेऽर्थेषु हन्युरेनमरक्षिताः। राजपुत्रा मदोन्मत्ता गजा इव निरंकुशाः ॥
भ्रातरं वा विनिघ्नन्ति पितरं वाभिमानिनः। राजपुत्रैर्मदोन्मत्तैः प्रार्थ्यमानमितस्ततः ॥
दुःखेन रक्ष्यते राज्यं व्याघ्राघ्रातमिवामिषम्। रक्ष्यमाणा यदि छिद्रं कथंचित्प्राप्नुवन्ति हि ॥
सिंहशाबा इव घ्नन्ति रक्षितारमसंशयम् ॥ इति।

विश्वासश्च समर्थेषु मन्त्रिषु कर्तव्यः। तथाच **राजधर्मे —**

यं मन्येत ममाभावादस्याभावो भवेदिति। तस्मिन्कुर्वीत विश्वासं यथा पितरि वै तथा ॥
तं शक्त्या वर्धमानश्च सर्वतः परिबृंहयेत्। व्यसनान्नित्यभीतो यः समृध्या यो न तप्यते ॥

यत्स्यादेवंविधं मित्रं तदात्मसममुच्यते । रूपवर्णस्वरोपेतस्तितिक्षुरनसूयकः ॥
कुलीनश्शीलसम्पन्नस्स तस्मात्प्रत्यनन्तरः । मेधावी स्मृतिमान्दक्षः प्रकृत्या चानृशंसवान् ॥
यो मानितोऽमानितो वा न च रुष्येत्कदाचन । गृहे वसेदमात्यस्ते सः स्यात्परमपूजितः ॥
स ते विद्यात्परं मित्रं प्रकृतिं चार्थधर्मयोः । विश्वासस्ते भवेत्तत्र यथा पितरि वै तथा ॥
कीर्तिप्रधानो यश्च स्याद्यश्च स्यात्समये स्थितः । समार्थान्यश्च न द्वेष्टि नानर्थान्कुरुते च यः ॥
यो न कामाद्भयाल्लोभात्क्रोधाद्वा धर्ममुत्सृजेत् । दक्षः पर्याप्तवचनः स ते स्यात्प्रत्यनन्तरः ॥
कुलीनस्सत्वसम्पन्नस्तितिक्षुरविकत्थनः । शूरश्चार्यश्च विद्वांश्च प्रतिपत्तिविशारदः ॥
एते ह्यमात्याः कर्तव्याः सर्वकर्मस्ववस्थिताः । पूजितास्संविभक्ताश्च स्वसहायास्स्वनुष्ठिताः ॥
कृत्स्नमेते विनिक्षिप्ताः प्रतिरूपेषु कर्मसु । युक्ता महत्सु कार्येषु श्रेयांस्युत्पादयन्ति च ॥ इति ।

कामन्दकेऽपि —

न तत्र तिष्ठति भ्राता न पितान्योऽपि वा जनः ।
पुंसामापत्प्रतीकारे सन्मित्रं यत्र तिष्ठति ॥ इति ।

अत एव बिलान्निर्गमनानन्तरं सुग्रीवदुष्प्रवेशेऽस्मिन्नेव बिलप्रदेशे वसाम इति तारेयवचनमादरेण शृण्वतोऽगदस्य राज्यापहरणाभिप्रायमवगत्य हनुमान्वानराणां परस्परं भेदनेन सुग्रीवराज्यं स्थापितवान्, तदसहमानेनांगदेन सुग्रीवो निन्दितश्चेति प्रतिपादितमग्रे—

इदं हिं मायाविहितं सुदुर्गमं प्रभूतवृक्षोदकभोज्यपेयम् ।
इहाद्य नो नैव भयं पुरन्दरात् न राघवाद्वानरराजतोऽपि वा ॥
श्रुत्वाङ्गदस्यापि वचोनुकूलं ऊचुश्च सर्वे हरयः प्रतीताः ।
यथा न हन्येत तथा विधानमसक्तमद्यैव विधीयतां मनः ॥

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि । अथ मेने हृतं राज्यं हनुमानङ्गदेन तत् ॥
अभिसन्धातुमारेभे हनुमानङ्गदं ततः । स चतुर्णामुपायानां तृतीयमुपवर्णयन् ॥
भेदयामास तान्सर्वान्वानरान् वाक्यसंपदा ॥ इति ।

श्रुत्वा हनुमतो वाक्यं प्रश्रितं धर्मसंहितम् । स्वामिसत्कारसंयुक्तमङ्गदो वाक्यमब्रवीत् ॥
स्थैर्यं सर्वात्मना शौचमानृशंस्यमनार्जवम् । विक्रमश्चैव सुग्रीवे सौजन्यं नोपपद्यते ॥
भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं प्रियाम् । धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥
कथं स धर्मं जानीते येन भ्रात्रा दुरात्मना । युद्धायाभिनियुक्तेन बिलस्यापिहितं मुखम् ॥

सत्यात्पाणिगृहीतश्च कृतकर्मा महायशाः। विस्मृतो राघवो येन स कस्य तु कृतं स्मरेत् ॥
लक्ष्मणस्य भयाद्येन नाधर्मभयभीरुणा। आदिष्टा मार्गितुं सीतां धर्मस्तस्मिन् कथं भवेत् ॥
तस्मिन् पापे कृतघ्ने तु स्मृतिहीने चलात्मनि। आर्यः को विश्वसेज्जातु तत्कुलीनो जिजीविषुः ॥
राज्ये पुत्रः प्रतिष्ठाप्यस्सगुणो निर्गुणोऽपि वा। कथं शत्रुकुलीनं मां सुग्रीवो जीवयिष्यति ॥
भिन्नमन्त्रोऽपराद्धश्च हीनशक्तिः कथं ह्यहम्। किष्किन्धां प्राप्य जीवेयं अनाथ इव दुर्बलः ॥
उपांशुदण्डेन हि मां बन्धनेनोपपादयेत्। शठः क्रूरो नृशंसश्च सुग्रीवो राज्यकारणात् ॥ इति।

एवंचाविश्वसनीयमङ्गदमपहाय विश्वसनीये हनुमति विशिष्य पुरस्कारादिकं युक्तमेव। न चैवमङ्गदस्याविश्वसनीयत्वेन वधपरित्यागादिकं किमिति न कृतवानिति वाच्यं, अविश्वसनीयानामपि ज्ञातीनां वधपरित्यागादेरयुक्तत्वात्, अवश्यरक्षणीयत्वाच्च। तथा चावध्यत्वे **उद्योगे** विदुरः—

'अवध्या ब्राह्मणा गावो ज्ञातयश्शिशवः स्त्रियः।
येषां चान्नानि भुञ्जीत ये च स्युश्शरणागताः ॥' इति।

परित्यागोऽप्ययुक्तः रावणवालिसुयोधनप्रभृतीनां विभीषणसुग्रीवधर्मपुत्रादिभ्रातृपरित्यागेन राज्यप्राणनाशादिदर्शनात्। एवं भेदादिकमप्ययुक्तं, तथाच **राजधर्मे** —

भेदाद्विनाशस्संघानां संघमुख्योऽसि केशव।
यथा त्वां प्राप्य नोत्सीदेदयं संघस्तथा कुरु ॥ इति।

उद्योगे विदुरोऽपि —

स्वास्तीर्णानि शयनानि प्रपन्ना न वै भिन्ना जातु निद्रां लभन्ते।
न स्त्रीषु राजन्रतिमाप्नुवन्ति न वै भिन्नाः प्रशमं रोचयन्ति ॥

न वै तेषां स्वदते पथ्ययुक्तं योगक्षेमं कल्पते नैव तेषाम्।
भिन्नानां वै मनुजेन्द्र परायणं न विद्यते किंचिदन्यद्विनाशात् ॥ इति।

राजधर्मे —

ज्ञातिभिर्विग्रहस्तात न कर्तव्यश्शुभार्थिना। सुखानि सह भोज्यानि भ्रातृभिर्भरतर्षभ ॥

संभोजनं संकथनं संप्रीतिश्च परस्परम्।
ज्ञातिभिस्सह कार्याणि न विरोधः कदाचन ॥ इति।

प्रबोधचन्द्रोदयेऽपि —

निर्दहति कुलमशेषं ज्ञातीनां वैरसम्भवः क्रोधः ।
वनमिव घनपवनाहततरुसङ्घट्टसंभवो दहनः ॥ इति ।

तस्मात् ज्ञातयो न द्वेष्याः, विगुणाः सगुणा वा तेऽवश्यं संरक्षणीयाश्च । तथा **चोद्योगे** —

'विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ । किं पुनर्गुणवन्तस्ते त्वत्प्रसादाभिकांक्षिणः ॥ इति ।

तेषामरक्षणे दोषोऽपि **तत्रैव** —

'श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ।
दिग्धहस्तं मृग इव स पापं तस्य विन्दति इति ॥

तद्रक्षणे फलमपि **तत्रैव** —

'यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् । स पुत्रपशुभिर्वृद्धिं श्रेयश्चानन्तमश्नुते ॥
ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः सुखम् । कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचर ॥
श्रेयसा योक्ष्यसे राजन् कुर्वाणो ज्ञातिसत्क्रियाम् । एवं लोके यशः प्राप्तं भविष्यति नराधिप ।
अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यसि ॥ इति ।

राजधर्मेऽपि —

धन्यं यशस्यमायुष्यं स्वपक्षोद्भावनं शुभम् । अज्ञातिनोऽपि न सुखं नावज्ञातस्त्वतः परम् ॥
अज्ञातिमन्तं पुरुषं परे चाभिभवन्त्युत । तान्मानयेत्पूजयेच्च वाचा नित्यं च कर्मणा ॥
कुर्याच्च प्रियमेतेभ्यो नाप्रियं किंचिदाचरेत् ॥ इति ।

ज्ञातिभिरुपेतः परेषामप्रधर्षणीयश्च । तथा**चोद्योगे** —

'महानप्येकको वृक्षः बलवान्सुप्रतिष्ठितः । प्रसह्य चैव वातेन सुस्कन्धो मर्दितुं क्षणात् ॥
अथ ये सहिता वृक्षाः संघशस्तु प्रतिष्ठिताः । अपि शीघ्रसमायातान्सहन्तेऽन्योन्यसंश्रयात् ॥
एवं मनुष्यमप्येकं गुणैरपि समन्वितम् । शक्यं द्विषन्तो मन्यन्ते वायुर्द्रुममिवैकजम् ॥
अन्योन्यं समुपष्टम्भादन्योन्यापाश्रयेण च । ज्ञातयस्संप्रवर्धन्ते सरसीवोत्पलानि च ॥
तन्तवोऽप्यायता नित्यं तन्तवो बहुलास्समाः । बहून्बहुत्वादायासान् सहन्तेत्युपमा सताम् ॥
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च । धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ इति ।

कामन्दकेऽपि —

संघातवान्यथा वेणुः निबद्धः कण्टकैर्वृतः । न शक्यते समुद्धर्तुं भ्रातृसंघातवांस्तथा ॥ इति च ।

परैरुपद्रुतस्यापि ज्ञातिरेव गतिः । तथाच **राजधर्मे** —

निकृतस्य परैरन्यैर्ज्ञातिरेव परायणम् । नान्यातिकारं सहते ज्ञातेर्ज्ञातिः कथंचन ॥ इति ।

अत एव गन्धर्वगृहीताः शत्रुभूता अपि दुर्योधनादयः स्वकुलरक्षणं धर्म इति बुध्या पाण्डवैर्निवर्तिता इति प्रतिपादितं **वनपर्वणि** —

'भवन्ति भेदाः ज्ञातीनां कलहाश्च वृकोदर । प्रसक्तानि च वैराणि कुलधर्मो न नश्यति ॥

यदा तु कश्चित् ज्ञातीनां बाह्यः प्रार्थयते कुलम् ।
न मर्षयन्ति तत्सन्तो बाह्येनापि प्रधर्षणम् ॥

दुर्योधनस्य ग्रहणात् गन्धर्वेण बलात्प्रभोः । स्त्रीणां बाह्याभिमर्शाच्च हतं भवति नः कुलम् ॥

मोक्षयध्वं नरव्याघ्राः ह्रियमाणं सुयोधनम्' ।

इति धर्मराजेन प्रेषितो गन्धर्वानभिगम्य,

ततस्तान्युधि दुर्धर्षान्सव्यसाची परन्तपः । सान्त्वपूर्वमिदं वाक्यमुवाच खचरान्रणे ॥

विसर्जयत राजानं भ्रातरं मे सुयोधनम् । उत्सृजध्वं महावीर्या धृतराष्ट्रसुतानिमान् ॥

दारांश्चैषां विमुञ्चध्वं धर्मराजस्य शासनात् ।

इत्यभिधाय युद्धे विजित्य, दुर्योधनादिभिस्सह धर्मपुत्रं प्रति गन्धर्वानानिनाय । ततो धर्मपुत्रः —

मोचयामास तान्सर्वान् गन्धर्वान्प्रशशंस च । उपकारो महांस्तात कृतो धर्मेण खेचरैः ॥

कुलं नः परिभूतं मे मोक्षेणास्य दुरात्मनः । ततो दुर्योधनं मुक्तं भ्रातृभिस्सहितं तदा ॥

युधिष्ठिरस्तु प्रणयादिदं वचनमब्रवीत् । मा स्म तात पुनः कार्षीरीदृशं साहसं क्वचित् ॥

नहिं साहसकर्तारस्सुखमेधन्ति भारत । स्वस्तिमान्सहितस्सर्वैर्भ्रातृभिः कुरुनन्दन ॥

गृहान्व्रज यथाकामं वैमनस्यं च मा कृथाः । इति ।

ज्ञातिकृतमपराधमपि सोढ्वा उपायेन ते वशीकर्तव्या इत्युक्तं **राजधर्मे** कृष्ण-नारदसंवादे —

दास्यमैश्वर्यवादेन ज्ञातीनां वै करोम्यहम् । अर्धं भोक्तास्मि भोगाय वाग्दुरुक्तानि च क्षमे ॥

अरणीमग्निकामीव मथ्नाति हृदयं मम । वाचा दुरुक्तं देवर्षे तन्मे दहति नित्यदा ॥

बलं संकर्षणे नित्यं सौकुमार्यं पुनर्गदे । रूपेण मत्तः प्रद्युम्नः सोऽसहायोस्मि नारद ॥
अन्ये हि सुमहाभागाः बलवन्तो दुरुत्सहाः । नित्योत्थानेन संपन्ना नारदान्धकवृष्णयः ॥
यस्य ते स्युर्न वै स स्याद्यस्य स्युः कृत्स्न एव सः ।
द्वाभ्यां हि वारितो नित्यं वृणोम्येकतरं न च ॥
स्यातां यस्याहुकाक्रूरौ किन्नु दुःखतरं ततः । सोऽहं कितवमातेव द्वयोरपि महामते ॥
एकस्य जयमाशंसन्द्वितीयस्य पराजयम् । तस्यैवं क्लिश्यमानस्य नारदोभयतस्सदा ॥
वक्तुमर्हति यच्छ्रेयो ज्ञातीनामातुरस्तथा ।

नारदः—

आपदो द्विविधाः कृष्ण बाह्याश्चाभ्यन्तरास्तथा । प्रादुर्भवन्ति वार्ष्णेय सुकृताद्यदिवान्यतः ॥
सेयमाभ्यन्तरात्तुभ्यं आपत्कृच्छ्रात्स्वकर्मजा । अक्रूरभोजप्रवरास्सर्वे ह्येते त्वदाश्रयाः ॥
अर्थहेतोर्हि कामाद्वा वाचा बीभत्सयापि वा । आत्मना प्राप्तमैश्वर्यमन्यत्र प्रतिपादितम् ॥
कृतमूलमिदानीं तु ज्ञातिशब्दसहायवान् । न शक्यं पुनरादातुं वान्तमन्नमिव त्वया ॥
बभ्रूग्रसेनयो राज्यं नाप्तुं शक्यं कथञ्चन । ज्ञातिभेदभयात्कृष्ण त्वया वापि विशेषतः ॥
तस्य सिध्येत्प्रयत्नेन कृत्वा कर्म सुदुष्करम् ।
महाक्षयो व्ययो वा स्याद्विनाशो वा पुनर्भवेत् ॥
अनायासेन शस्त्रेण मृदुना हृदयच्छिदा । जिह्वामुद्धर सर्वेषां प्रविमृज्यानुमृज्य च ॥
शक्त्यान्नदानं सततं तितिक्षार्जवमार्दवम् । यथार्हप्रतिपूजा च शस्त्रमेतदनायसम् ॥
ज्ञातीनां वक्तुकामानां कटुकानि लघूनि च । गिरा त्वं हृदयं वाचं शमयस्व मनांसि च ॥
नान्यत्र बुद्धिक्षान्तिभ्यां नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र धनसंयोगाद्गुणः प्रत्यवतिष्ठते ॥ इति ।

पुत्रविषये ज्ञात्यपेक्षया विशेषमाह **कामन्दकः—**

राजपुत्रः परित्यागं सुदुर्वृत्तोऽपि नार्हति ।
क्लिश्यमानस्तु पितरं परानाश्रित्य हन्ति हि ॥ इति ।

नीतिसारेऽपि—

'लालनीयः पूजनीयो भूषणीयस्तथैव च ।
अर्थशास्त्रं शिक्षणीयो यथा स्याद्विनयी तु सः ॥" इति ।

'प्रजात्मश्रेयसे राजन् कुर्वीतात्माभिरक्षणमिति च ॥

कामन्दकेपि —

'विनयोपग्रहान्भृत्यैः कुर्वीत नृपतिः सुतान् । अविनीतकुमारं हि कुलमाशु विशीर्यते ॥
विनीतमौरसं पुत्रं यौवराज्येऽभिषेचयेत् । दुष्टं गजमिवोन्मत्तं कुर्वीत सुखबन्धनम् ॥
व्यसने सज्जमानं हि क्लेशयेद्व्यसनाश्रयैः । तथाच क्लेशयेदेनं यथा स्यात्पितृगोचरः ॥' इति ।

तथाचाङ्गदस्य ज्ञातित्वेनाविश्वसनीयत्वादपरित्यागेन रक्षणीयत्वाद्विनीतं विधाय यौवराज्येऽभिषेचनीयत्वाच्च रक्षणयौवराज्याभिषेचनकार्यनियोजनादिकं, मन्त्रिणश्च हनुमतः सकलकार्येषु विश्वसनीयस्य स्वातन्त्र्येण पुरस्करणादिकं युक्तमेव ॥

पञ्चचत्वारिंशषट्चत्वारिंशयोः — ततो यथानिदेशं प्रस्थितेषु वानरयूथपेषु

कथं भवान्विजानीते सर्वं वै मण्डलं भुवः ।

इति रामभद्रेण पृष्टो हरीशः मायावियुद्धसमये मत्कृतबिलमुखपिधान, मत्कृत-राज्याभिषेकादिकुपितेन मद्भ्रात्रा विद्रावितो निखिलमपि भूमण्डलं परिधावन् क्वचिदपि शरणमलभमानो हनुमदुपदेशेन मतङ्गनिलयं भ्रातृदुष्प्रवेशं प्रविष्टोऽस्मि ।

एवं मया तथा राजन् प्रत्यक्षमपि लक्षितम् ।
पृथिवीमण्डलं कृत्स्नं गुहामस्म्यागतस्ततः ॥

नन्वत्र जनकतनयागवेषणाय प्रस्थितान्वानरान्प्रति प्राच्यादिदिक्षु गवेषणीयप्रदेश-विशेषाणां विशिष्य कथनं न प्रयोजनवत् । 'विन्ध्यमन्दरोदयास्तमयाचलनिलयाः क्षीरसागरवेलानिलया वानरा आनेया' इति सामान्यतः कथनवत् दिक्चतुष्टयेऽपि यावन्तो भवतां गम्याः प्रदेशाः तत्र विचेतव्या जानकीति सामान्योक्त्या प्रेषणसंभवादिति चेदुच्यते। प्रबलतरशत्रुवधादिमहाकार्यं साधयता प्रथमतस्तत्सामर्थ्याधायकं तपश्चरणपुण्यतीर्थ-क्षेत्रदेवब्रह्मराजर्षिसंकीर्तनश्रवणदर्शनस्मरणादिषु पुण्यतमेषु यत्किञ्चित्कर्तव्यम् । तपश्चरणस्य शत्रुवधहेतुत्वे मन्त्रवर्णः, "तपसा देवा देवतामग्र आयन् तपसर्षयः स्वरन्वविन्दन् . तपसा सपत्नान्प्रणुदामाराती' रिति । जगदीश्वरोऽपि वामनः प्रबलतरतपश्चरणेनैव बलिनियमनं कृतवानिति प्रतिपादितम् —

"बलिनियमनहेतोर्वामनः काननेऽस्मिन्
बलिनियमपरः सन् ब्रह्मचारी चचार ॥ इति ।

एवं पाण्डवान् जेतुकामो जयद्रथः तपसा परमेश्वरमाराधितवानिति प्रतिपादितं **वनपर्वणि —**

जगाम राजन्दुःखार्तो गङ्गाद्वाराय भारत । स देवं शरणं गत्वा विरूपाक्षमुमापतिम् ॥
तपश्चचार विपुलं तस्य प्रीतो वृषध्वजः । वरं चास्मै ददौ देवः तं जग्राह च तच्छृणु ॥
समस्तान्सरथान्पञ्च जयेयं युधि पाण्डवान् । इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत् ॥
अजेयाश्चाप्यवध्याश्च वारयिष्यसि तान्युधि । ऋतेर्जुनं महाबाहुं नरं नाम सुरेश्वरम् ॥

तमेकं वर्जयित्वा तु सर्वं यौधिष्ठिरं बलम् ।
चतुरः पाण्डवान्राजन् विनैकं जेष्यसे रिपून् ॥' इति ।

तथाच भीष्म अंबांबिकांबालिकाख्याः काशिराजतनयाः स्वयंवरे विजित्य भ्रातुर्विचित्रवीर्यस्य विवाहार्थमानयामास । तत्राम्बा पूर्वमेव मया साल्वो मनसा वृत इति विचित्रवीर्यपाणिग्रहणमनिच्छन्ती भीष्मेण परित्यक्ता साल्वमाजगाम । तेनाप्यन्यजितां त्वां नाभिगृह्णामीति परित्यक्ता सती भीष्ममूलेयमनर्थपरम्परेति मत्वा तमेव हन्तुमुग्रं तपश्चचारेति प्रतिपादित**मुद्योगे** अंबोपाख्याने —

'सा तु कन्या महाराज प्रविश्याश्रममण्डलम् । यमुनातीरमाश्रित्य तपस्तेपेऽतिमानुषम् ॥
निराहारा कृशा रूक्षा जटिला मलपंकिनी । षण्मासान्वायुभक्षासीत्स्थाणुभूता तपस्विनी ॥
यमुनाजलमाश्रित्य संवत्सरमथापरम् । उपवासान्निराहारा धारयामास भामिनी ॥
शीर्णपर्णेन चैकेन पालयामास चापरम् । संवत्सरं तीव्रकोपा पादांगुष्ठेन सुस्थिता ॥
एवं द्वादशवर्षाणि तापयामास रोदसी । आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ॥
तत्र पुण्येषु देशेषु साप्लुतांगी दिवानिशम् । व्यचरत्काशिकन्या सा यथाकामविचारिणी ॥
नन्दाश्रमे महाराज तथोलूकाश्रमे शुभे । च्यवनस्याश्रमे चैव ब्रह्मणः स्थान एव च ॥
प्रयागे देवयजने देवारण्येषु चैव हि । भोगवत्यां महाराज कौशिकस्याश्रमे तथा ॥
महाह्रदे च कौरव्य पैलगार्ग्यस्य चाश्रमे । एतेष्वन्येषु तीर्थेषु काशिकन्या विशां पते ॥
आप्लावयत गात्राणि तीव्रमास्थाय वै व्रतम् । ततस्ते तापसास्तात तपसे कृतनिश्चयाम् ॥
न्यवर्तयंस्तदा तात किं कार्यमिति चाब्रुवन् । तानुवाच ततः कन्या तपोवृद्धानृषींस्तदा ॥
साहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणम् । विचरामि महीं देवीं यथा हन्यामहं नृपम् ॥
यत्कृते दुःखवसतिमिमां प्राप्तास्मि शाश्वतीम् । पतिलोकविहीना च नैव स्त्री न पुमानहम् ॥
नाहत्वा युधि गांगेयं निवर्तेयं तपोधनाः । एष मे हृदि सङ्कल्पो यदिदं कथितं मया ॥

तदेनां दर्शयामास शूलपाणिरुमापतिः । मध्ये तेषां महर्षीणां स्वेन रूपेण भामिनीम् ॥
छन्द्यमाना वरेणाथ सा वव्रे मत्पराजयम् । हनिष्यसीति तां देवः प्रत्युवाच मनस्विनीम् ॥
ततस्सा पुनरेवाथ कन्या रुद्रमुवाच ह । उपपद्येत्कथं देव स्त्रिया युधि जयो मम ॥
स्त्रीभावेन च मे गाढं मनश्शान्तमुमापते । प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः ॥
यथा स सत्यो भवति तथा कुरु वृषध्वज । यथा हन्यां समागम्य भीष्मं शान्तनवं युधि ॥
तामुवाच महादेवः कन्यां गोवृषभध्वजः । न मे वागनृतं भद्रे प्राह सत्यं भविष्यति ॥
हनिष्यसि रणे भीष्मं पुरुषत्वं च लप्स्यसे । स्मरिष्यसि च तत्सर्वं देहमन्यं गता सती ॥
द्रुपदस्य कुले जाता भविष्यसि महारथः । शीघ्रास्त्रश्चित्रवेधी च भवितासि सुसम्मतः ॥
यथोक्तमेतत्कल्याणि सर्वमेतद्भविष्यति । भविष्यसि पुमान्पश्चात्कस्माच्चित्कालपर्ययात् ॥
एवमुक्त्वा महाबाहुः कपर्दी वृषभध्वजः । पश्यतामेव विप्राणां तत्रैवान्तरधीयत ॥

अतः प्रबलतररावणहननाय प्रवृत्तेन रामेण तत्सहायभूतसुग्रीवेणापि किंचित्पुण्यं कर्म कर्तव्यम् । पुण्यदेशतीर्थमहर्षीणां तदुपेतभूगोलस्य च संकीर्तनश्रवणादिकं प्रशस्तम् । पुण्यदेशतीर्थादीनां दर्शनश्रवणादिकं महाफलमित्येतद्वनपर्वणि धौम्यतीर्थयात्रायाम् —

तान्सर्वानुत्सुकान्दृष्ट्वा पाण्डवान् दीनचेतसः । आश्वासयंस्तदा धौम्यो बृहस्पतिसमोऽब्रवीत् ॥
ब्राह्मणानुगतान्पुण्यानाश्रमान्भरतर्षभ । दिशस्तीर्थानि शैलांश्च शृणु मे गदतो नृप ॥

यान् श्रुत्वा गदतो राजन् विशोको भवितासि ह ।
द्रौपद्या चानया सार्धं भ्रातृभिश्च नरेश्वर ॥

श्रवणाच्चैव तेषां त्वं पुण्यमाप्नोषि पाण्डव । गत्वा शतगुणं चैव तेभ्य एव नरोत्तम ॥

मार्कण्डेयपुराणेऽपि —

'वैन्यं पृथुं हैहयमर्जुनं च शाकुन्तलेयं भरतं नलं च ।
रामं च यो वै स्मरति प्रयाणे तस्यार्थलाभो विजयश्च हस्ते ॥' इति ।

श्रीहर्षोऽपि —

प्रवसते भरतार्जुनवैन्यवत् स्मृतिधृतोऽपि नल स्वमभीष्टदः ।
स्वगमनाफलतां यदि शंकसे तदफलं निखिलं खलु मङ्गलम् ॥ इति ॥

आनुशासनिके श्रेयोध्याये भीष्मः —

अयं दैवतवंशो वै ऋषिवंशसमन्वितः । त्रिसन्ध्यं पठितः पुत्र कल्मषापहरः परः ॥
यदह्ना कुरुते पापमिन्द्रियैः पुरुषश्चरन् । बुद्धिपूर्वमबुद्धेर्वा रात्रौ यच्चापि सन्ध्ययोः ॥

मुच्यते सर्वपापेभ्यः कीर्तयन्वै शुचिस्सदा । नान्धो न बधिरः काले कुरुते स्वस्तिमान्सदा ॥
तिर्यग्योनिं न गच्छेच्च नरकं संकराणि च । न च दुःखभयं तस्य मरणे न स मुह्यति ॥
देवासुरगुरुर्देवः सर्वभूतनमस्कृतः । अचिन्त्योथाप्यनिर्देश्यः सर्वप्राणो ह्ययोनिजः ॥
पितामहो जगन्नाथस्सावित्री ब्रह्मणस्सती । वेदभूरर्थकर्ता च विष्णुर्नारायणः प्रभुः ॥
उमापतिर्विरूपाक्षः स्कन्दः सेनापतिस्तथा । विशाखो हुतभुग्वायुश्चन्द्रादित्यौ प्रभाकरौ ॥
शक्रश्शचीपतिर्देवो यमो धूमोर्णया सह । वरुणस्सह गौर्या च सह पत्न्या धनेश्वरः ॥
सौम्या गौस्सुरभिर्देवी विश्रवाश्च महानृषिः । संकल्पस्सगरो गङ्गा स्रवन्त्योथ मरुद्गणाः ॥
वालखिल्यास्तपस्सिद्धाः कृष्णद्वैपायनस्तथा । नारदः पर्वतश्चैव विश्वावसुहहाहुहूः ॥
तुंबुरुश्चित्रसेनश्च देवसेनश्च विश्रुतः । देवकन्या महाभाग दिव्याश्चाप्सरसां गणाः ॥
ऊर्वशी मेनका रंभा मिश्रकेशीरलंबुसा । विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा ॥
आदित्या वसवो रुद्राः साश्विनः पितरोऽपि च । धर्मः श्रुतं तपो दीक्षा व्यवसायः पितामहः ॥
शर्वर्यो दिवसाश्चैव मारीचः काश्यपस्तथा । शतद्रुश्च विपाशा च चन्द्रभागा सरस्वती ॥
सिन्धुश्च देविका चैव प्रभासं पुष्कराणि च । गङ्गा महानदी वेणी कावेरी नर्मदा तथा ॥
कुलंपुना विशल्या च करतोयांबुवाहिनी । सरयू गंडकी चैव लोहित्यश्च महानदः ॥

ताम्रारुणा चित्रवती पर्णाशा गोमती तथा ।
गोदावरी च वेणा च कृष्णवेणी तथा प्रिया ॥

दृषद्वती च कावेरी चक्षुर्मन्दाकिनी तथा । प्रयागं च प्रभासं च पुण्यं नैमिशमेव च ॥
तच्च विश्वेश्वरं स्थानं यत्र तद्विमलं सरः । पुण्यतीर्थं च सलिलं कुरुक्षेत्रं प्रकीर्तितम् ॥
सिन्धूत्तमं तपोदानं जंबूमार्गमथापि च । हिरण्वती वितस्ता च तथा प्लक्षवती नदी ॥
वेदस्मृतिर्वेदवती मलवाथाश्मनद्यपि । भूमिभागास्तथा पुण्याः गङ्गाद्वारमथापि च ॥
ऋषिकुल्यास्तथा मेध्या नद्यस्सिन्धुवहास्तथा । चर्मण्वती नदी पुण्या कैशिकी यमुना तथा ।

नदी भीमरथी चैव बाहुदा च महानदी ॥

माहेन्द्रवाणी त्रिदिवा नीलिका च सरस्वती । नन्दा चापरनन्दा च तीर्थातीर्थमहाहृदः ॥
गया च फल्गुतीर्थं च धर्मारण्यं सुरैर्वृतम् । तथा देवनदी पुण्या सरश्च ब्रह्मनिर्मितम् ॥
पुण्यं त्रिलोकविख्यातं सर्वपापहरं शिवम् । हिमवान्पर्वतश्चैव दिव्यौषधिसमन्वितः ॥

मेरुर्महेन्द्रो मलयः श्वेतश्च रजताचलः । शृङ्गवान्मन्दरो नीलो निषधो दर्दुरस्तथा ॥
विन्ध्यो धातुविचित्रांगस्तीर्थवानौषधान्वितः । चित्रकूटोंजनाद्रिश्च पर्वतो गन्धमादनः ॥
पुण्यस्सोमगिरिश्चैव तथैवान्ये महीधराः । दिशश्च विदिशश्चैव क्षितिस्सर्वे महीधराः ॥
विश्वे देवा नभश्चैव नक्षत्राणि ग्रहास्तथा । पांतु वस्सततं देवाः कीर्तिताः कीर्तिता मया ॥
कीर्तयानो नरो ह्येतान्मुच्यते सर्वकिल्बिषैः । स्तुवंश्च प्रतिनन्दंश्च मुच्यते सर्वतो भयात् ॥
सर्वसंकरपापेभ्यो देवतास्तवनन्दकः । देवतानन्तरं विप्रास्तपस्सिद्धास्तपोधिकान् ॥
कीर्तितान् कीर्तयिष्यामि सर्वपापप्रमोचनान् । यवक्रीतोऽथ रैभ्यश्च कक्षीवानौशिजस्तथा ॥
भृग्वङ्गिरास्तथा कण्वो मेधातिथिरथ प्रभुः । बर्ही च गुणसंपन्नः प्राचीं दिशमुपाश्रिताः ॥
भद्रादिशं महाभागा उन्मुचुः प्रमुचुस्तथा । मुमुचुश्चमहाभागास्स्वस्त्यात्रेयश्च वीर्यवान् ॥
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् । दृढायुश्चोर्ध्वबाहुश्च विश्रुतावृषिसत्तमौ ॥
पश्चिमां दिशमाश्रित्य य एधन्ते निबोध तान् । उषद्गुः सह सोदर्यैः परिव्याधश्च वीर्यवान् ॥
ऋषिर्दीर्घतमाश्चैव गौतमः काश्यपस्तथा । एकतश्च द्वितश्चैव तृतश्चैव महानृषिः ॥

अत्रेः पुत्रस्तु धर्मात्मा तथा सारस्वतः प्रभुः ।
उत्तरां दिशमाश्रित्य य एधन्ते निबोध तान् ॥

अत्रिर्वसिष्ठश्शक्तिश्च पाराशर्यश्च वीर्यवान् । विश्वामित्रो भरद्वाजो जमदग्निस्तथैव च ॥
ऋचीकपुत्रो रामश्च ऋषिरौद्दालकिस्तथा । श्वेतकेतुः कोहलश्च विपुलो देवलस्तथा ॥
देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च । लोमशो नाचिकेतश्च लोमहर्षणिरेव च ॥
ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा । एष वै समवायस्ते ऋषिदेवसमन्वितः ॥
आद्यः प्रकीर्तितो राजन् सर्वपापप्रमोचनः । नृगो ययातिर्नहुषो यदुः पूरुश्च वीर्यवान् ॥
धुन्धुमारो दिलीपश्च सगरश्च प्रतापवान् । कृशाश्वो यौवनाश्वश्च चित्राश्वस्सत्यवांस्तथा ॥
दुष्यन्तो भरतश्चैव चक्रवर्ती महायशाः । यवनो जनकश्चैव तथा दृष्टरथो नृपः ॥
रघुर्नरवरश्चैव तथा दशरथो नृपः । रामो राक्षसहा वीरः शशिबिन्दुर्भगीरथः ॥
हरिश्चन्द्रो मरुत्तश्च तथा दृढरथो नृपः । महोदरो ह्यलर्कश्च ऐलश्चैव नराधिपः ॥
करंधमो नरश्रेष्ठः कष्मोरश्च नराधिपः । दक्षोंबरीषः ककुरो रैवतश्च महारथः ॥
कुरुसंवरणश्चैव मान्धाता सत्यविक्रमः । मुचुकुन्दश्च राजर्षिः जह्नुर्जाह्नविसेवितः ॥

आदिराजः पृथुर्वैन्यो मित्रभानुः प्रियङ्करः । त्रसदस्युस्तथा राजा श्वेतो राजर्षिसत्तमः ॥
महाभिषश्च विख्यातो निमी राजा तथाष्टकः । आयुः क्षुपश्च राजर्षिः कक्षेयुश्च नराधिपः ॥
प्रतर्दनो दिवोदासः सुदासः कोसलेश्वरः । एलो नलश्च राजर्षिः मनुश्चैव प्रजापतिः ॥
हविघ्नश्च पृषध्रश्च प्रतीपश्शान्तनुस्तथा । अजः प्राचीनबर्हिश्च तथेक्ष्वाकुर्महायशाः ॥
अनरण्यो नरपतिः जानुजङ्घस्तथैव च । कक्षसेनश्च राजर्षिः ये चान्ये चानुकीर्तिताः ॥
काल्यमुत्थाय यो नित्यं सन्ध्ये द्वे ऽस्तमनोदये । पठेच्छुचिरनावृत्तिः स धर्मफलभाग्भवेत् ॥
देवा देवर्षयश्चैव स्तुता राजर्षयस्तथा । पुष्टिमायुर्यशस्स्वर्गं विधास्यन्ति नरेश्वराः ॥

मा विघ्नं मा च मे पापं मा च मे परिपन्थिनः ।
ध्रुवो जयो मे नित्यं स्यात्परत्र च शुभा गतिः ' ॥ इति ।

अत एव समुद्रलंघनादिमहाकार्याय प्रवृत्तो हनुमान् देवादीनां स्मरणं कृतवानिति प्रतिपादितं **सुन्दरकाण्डे**—

'स सूर्याय महेन्द्राय वरुणाय स्वयंभुवे ।
भूतेभ्यश्चाञ्जलिं कृत्वा चकार गमने मतिम्' ॥ इति ।

'नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै ।
'नमोस्तु रुद्रेन्द्रयमानिलेभ्यः नमोस्तु चन्द्रार्कमरुद्गणेभ्यः' ॥ इति ।

भूगोलश्रवणादेः महाफलत्वं च **भीष्मपर्वणि**—

'श्रुत्वेदं भरतश्रेष्ठ भूमिपर्व मनोनुगम् ।
श्रीमान्भवति राजन्यः सिद्धार्थः साधुसम्मतः' ॥ इति ।

एवं च प्रबलतररावणहननरूपमहाकार्याय प्रवृत्तस्य रामभद्रस्याभीष्टसाधकं भूगोलं श्रावयितुम्—

'नाहमस्मिन्प्रभुः कार्ये वानरेश न लक्ष्मणः । त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥
त्वमेवाज्ञापय विभो मम कार्यविनिश्चयम् ।'

इति वचनेन रामेण स्वकार्यनिर्वाहकत्वेनोक्तस्य स्वस्यापि तत्कीर्तनेन सामर्थ्यं संपादयितुं भूगोलनिरूपणाभिप्रायेण गवेषणीयदेशविशेषाणां विशिष्य संकीर्तनं प्रयोजनवदेव ।
भूगोलश्च विस्तरेण प्रतिपादितो विष्णुपुराणे । **मैत्रेयः**—

'कथितो भवता ब्रह्मन् स्वर्गः स्वायंभुवस्य मे ।
श्रोतुमिच्छाम्यहं त्वत्तः सकलं मण्डलं भुवः ॥
यावंतः सागरा द्वीपाः तथा वर्षाणि पर्वताः । वनानि सरितः पुर्यो देवादीनां तथा मुने ।
यत्प्रमाणमिदं सर्वं यदाधारं यदात्मकम् ॥
संस्थानमस्य च मुने यथावद्वक्तुमर्हसि ।

श्रीपराशरः — मैत्रेय श्रूयतामेतत्संक्षेपाद्वदतो मम ॥

नास्य वर्षशतेनापि वक्तुं शक्नोमि विस्तरात् । जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलश्चापरो द्विज ॥
कुशः क्रौञ्चस्तथा काशः पुष्करश्चैव सप्तमः । एते द्वीपास्समुद्रैस्तु सप्त सप्तभिरावृताः ॥
लवणेक्षुसुरासर्पिर्दधिदुग्धजलैस्समम् । जम्बूद्वीपस्समस्तानामेतेषां मध्यमास्थितः ॥
तथापि मेरुर्मैत्रेय मध्ये कनकपर्वतः । चतुराशीतिसाहस्रैर्योजनैरस्य चोच्छ्रयः ॥
प्रविष्टः षोडशाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः । मूले षोडशसाहस्रो विस्तारस्तस्य सर्वतः ॥
भूपद्मस्यास्य शैलोसौ कर्णिकाकारसंस्थितः । हिमवान्हेमकूटश्च निषधश्चास्य दक्षिणे ॥
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः । लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथा परे ॥
सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते । भारतं प्रथमं वर्षं ततः किंपुरुषं स्मृतम् ।
हरिवर्षं तथैवान्यन्मेरोर्दक्षिणतो द्विज ॥
रम्यकं चोत्तरं वर्षं तस्यैवानुहिरण्मयम् । उत्तराः कुरवश्चैव यथा वै भारतं तथा ॥
नवसाहस्रमेकैकमेतेषां द्विजसत्तम । इलावृतं च तन्मध्ये तन्मध्ये मेरुरुच्छ्रितः ॥
मेरोश्चतुर्दिशं तत्त नवसाहस्रविस्तरम् । इलावृतं महाभाग चत्वारश्चात्र पर्वताः ॥
विष्कंभा रचिता मेरोर्योजनायतमुच्छ्रिताः । पूर्वेण मन्दरो नाम दक्षिणो गन्धमादनः ॥
विपुलः पश्चिमे पार्श्वे सुपार्श्वश्चोत्तरे स्मृतः । कदंबस्तेषु जम्बुश्च पिप्पलो वट एव च ॥
एकादशशतायामाः पादपाः गिरिकेतवः । जंबूद्वीपस्य सा जंबूर्नामहेतुर्महामुने ॥
महागजप्रमाणानि जंब्वास्तस्या फलानि वै । पतंति भूभृतः पृष्ठे शीर्यमाणानि सर्वतः ॥
रसेन तेषां प्रख्याता तत्र जंबूनदीति वै । सरित्प्रवहते सापि पीयते तन्निवासिभिः ॥
न स्वेदो नच दौर्गन्ध्यं न जरा नेन्द्रियक्षयः । तत्पानस्वस्थमनसां जनानां तत्र जायते ॥
तीरमृत्तद्रसं प्राप्य सुखवायुविशोषिता । जांबूनदाख्यं भवति सुवर्णं सिद्धभूषणम् ॥

भद्राश्वः पूर्वतो मेरोः केतुमालश्च पश्चिमे। वर्षे द्वे तु मुनिश्रेष्ठ तयोर्मध्यमिलाव्रतम् ॥
वनं चैत्ररथं पूर्वं दक्षिणं गन्धमादनम्। वैभ्राजं पश्चिमे तद्वत उत्तरे नन्दनं स्मृतम् ॥
अरुणोदं महाभद्रमसिनोदं च मानसम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा ॥
शीतांभश्च कुमुद्वांश्च कुररी माल्यवांस्तथा। वैकंकप्रमुखा मेरोः पर्वतः केसराचलः ॥
त्रिकूटश्शिशिरश्चैव पतंगो रुचकस्तथा। निषधाद्या दक्षिणतस्तस्य केसरपर्वताः ॥
शिखिवासाः सवैडूर्यः कपिलो गन्धमादनः। जारुधिप्रमुखास्तद्वत्पश्चिमे केसराचलाः ॥
मेरोरनन्तरांगेषु जठरादिष्ववस्थिताः। शंकुकूपोऽथ ऋषभो हंसो नागस्तथापरः ॥
कलांजनाद्याश्च परे उत्तरे केसराचलाः। केसरास्तु शतोछ्रायास्तेऽशीतिपृथुलायताः ॥
चतुर्दशसहस्राणि योजनानि महापुरी। मेरोरुपरि मैत्रेय ब्रह्मणः प्रथिता दिवि ॥
तस्यास्समन्ततश्चाष्टौ दिशासु विदिशासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः ॥
विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम्। समन्ताद्ब्रह्मणः पुर्यां गंगा पतति वै दिवः ॥
सा तत्र पतिता दिक्षु चतुर्धा प्रतिपद्यते। सीता चालकनन्दा च चक्षुर्भद्रा च वै क्रमात् ॥
पूर्वेण शैलाच्छैलाश्च सिता यात्यन्तरिक्षगा। ततः पूर्वेण वर्षेण भद्राश्वेनैति सार्णवम् ॥
तथैवालकनन्दापि दक्षिणेनैत्य भारतम्। प्रयाति सागरं श्रुत्वा सत्यभेदा महामुने ॥
सुचक्षुः पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षं गत्वैति चार्णवम् ॥
भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमंभोधिं समभ्येति महामुने ॥
आनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः ॥
भारतः केतुमालश्च भद्राश्वः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्यादाशैलबाह्यतः ॥
जठरो देवकूटश्च मर्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामा वानीलनिषधायतौ ॥
गन्धमादनकैलासौ पूर्ववच्चायतावुभौ। अशीतियोजनायामावर्णवान्तर्व्यवस्थितौ ॥
निषधः पारियात्रश्च मर्यादापर्वतावुभौ। मेरोः पश्चिमदिग्भागे यथापूर्वं तथा स्थितौ ॥
त्रिश्रृंगो जारुधिश्चैव उत्तरौ वर्षपर्वतौ। पूर्ववच्चायतावेतौ अर्णवान्तर्व्यवस्थितौ ॥
इत्येते मुनिवर्योक्ता मर्यादापर्वतास्तव। जठराद्यास्थिता मेरोरेषां द्वौ द्वौ चतुर्दिशम् ॥
मेरोश्चतुर्दिशं ये तु प्रोक्ताः केसरपर्वताः। शिताधाश्च मुने तेषामतीव हि मनोहराः ॥
शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तासु काननानि पुराणि च ॥

लक्ष्मीर्विष्ण्वग्निसूर्यादिदेवानां मुनिसत्तम। तास्वायतनवर्याणि जुष्टानि वरकिन्नरैः॥
गन्धर्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्॥
भौमा ह्येते स्मृताः स्वर्गाः धर्मिणामालया मुने। न तेषु पापकर्तारो यान्ति जन्मशतैरपि॥
भद्राश्वे भगवान्विष्णुरास्ते हयशिरा द्विज। वराहः केतुमाले तु भारते कूर्मरूपधृत्॥
मत्स्यरूपस्तु गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्वत्र सर्वस्सर्वेश्वरो हरिः॥
सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने॥

न तेषु शोको नायासो नोद्वेगः क्षुद्भयादिकम्।
स्वस्थाः प्रजा निरातङ्काः सर्वदुःखविवर्जिताः॥

दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः। न तेषु वर्षते देवो भौमान्यम्भांसि तेषु वै॥
कृतत्रेतादिकानेव तेषु स्थानेषु कल्पना। सर्वेष्वेतेषु सर्वेषु सप्त सप्त कुलाचलाः॥

नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम।

इत्यध्यायः

श्रीपराशरः —

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने। कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम्॥
महेन्द्रो मलयस्सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्वताः॥
अतस्संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयान्ति च। तिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने॥
इतस्स्वर्गश्च मोक्षश्च मध्यं चान्तश्च गम्यते। न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते॥
भारतस्यास्य वर्षस्य नव भेदान्निशामय। इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान्॥

नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः।

अयं तु नवमस्तेषां द्वीपस्सागरसंवृतः। योजनानां सहस्रं तु द्वीपोऽयं दक्षिणोत्तरः॥

पूर्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः।
ब्राह्मणाः क्षत्रिया वैश्याः मध्ये शूद्राश्च भागशः॥

इज्यायुद्धवणिज्याद्यैर्वर्तयन्तो व्यवस्थिताः। शतद्रूचन्द्रभागाद्याः हिमवत्पादनिस्सृताः॥
वेदस्मृतिमुखाश्चान्याः पारियात्रोद्भवा मुने। नर्मदा सुरसाद्याश्च नद्यो विन्ध्याद्रिनिस्सृताः॥
तापी पयोष्णी निर्विन्ध्याप्रमुखा ऋक्षसंभवाः। गोदावरी भीमरथीकृष्णवेण्यादिकास्तथा॥

सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः । कृतमाला ताम्रपर्णीप्रमुखा मलयोद्भवाः ॥
त्रिधामा ऋषिकुल्याद्या महेन्द्रप्रभवास्स्मृताः । ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसंभवाः ॥
आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः । तास्विमे कुरुपाञ्चाला मध्यदेशादयो जनाः ॥
पूर्वदेशादिकाश्चैव कामरूपनिवासिनः । आन्ध्राः कलिङ्गा मगधा दाक्षिणात्याश्च कृत्स्नशः ॥
तथा परांताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः । मारुका मालवाश्चैव पारियात्रनिवासिनः ॥
सौवीरास्सैन्धवा हूणाः साल्वाः शाकलवासिनः । मद्रारामास्तथांबष्ठाः पारसीकादयस्तथा ॥
आसां पिबन्तः सलिलं वसन्ति सरितां सदा । चत्वारि भारते वर्षे युगान्यत्र महामुने ॥
कृतं त्रेता द्वापरं च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति यतयो जुह्वते चात्र यज्वनः ॥
दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते ॥
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा । अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ॥
यदा हि कर्मभूरेषा अतोन्या भोगभूमयः । अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ॥

कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् ।

गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषासुरत्वात् ॥

कर्माण्यसंकल्पिततत्फलानि सन्यस्य विष्णौ परमात्मरूपे ।
अवाप्य तां कर्ममहीमनन्ते तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥

जानीम नैतत्कच यन्ति नीले स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्याः ये भारते नेन्द्रियशक्तिहीनाः ॥

नववर्षं तु मैत्रेय जम्बूद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात्कथितं तव ॥
जम्बूद्वीपं समावृत्य लक्षयोजनविस्तरः । मैत्रेय वलयाकारः स्थितः क्षारोदधिर्बहिः ॥

श्रीपराशर उवाच —

क्षारोदेन यथा द्वीपो जम्बुसंज्ञोऽभिवेष्टितः । संवेष्ट्य क्षारमुदधिं प्लक्षद्वीपस्तथा स्थितः ॥
जम्बूद्वीपस्य विस्तारः शतसाहस्रसंमितः । स एव द्विगुणो ब्रह्मन् प्लक्षद्वीपोऽप्युदाहृतः ॥
सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य वै । ज्येष्ठश्शान्तभयो नाम शिशिरस्तदनन्तरः ॥
सुखोदयस्तथानन्दः शिवः क्षेमक एव च । ध्रुवश्च सप्तमस्तेषां प्लक्षद्वीपेश्वरा हि ते ॥

पूर्वं शान्तभयं वर्षं शिशिरं सुखदं तथा । क्षेमकं च शिवं चैव नन्दं च ध्रुवमेव च ॥
मर्यादाकारकास्तेषां तथान्ये वर्षपर्वताः । सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम ॥
गोमदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा । सोमकः सुमनाश्शैलो वैभ्राजश्चैव सत्तमः ॥
वर्षाचलेषु रम्येषु वर्षेष्वेतेषु चान्यथा । वसन्ति देवगन्धर्वसहिताः सततं प्रजाः ॥
तेषु पुण्या जनपदाश्चिराच्च म्रियते जनः । नाधयो व्याधयो वापि सर्वकालसुखा हि ताः ॥
तेषां नद्यस्तु सप्तैव वर्षाणां तु समुद्रगाः । नामतस्ताः प्रवक्ष्यामि श्रुताः पापं हरन्ति याः ॥
अनुतप्ता शिखी चैव विपापा त्रिदिवा क्रमा । अमृता सुकृता चैव सप्तैतास्तत्र निम्नगाः ॥
एते शैलास्तथा नद्यः प्रधानाः कथितास्तव । क्षुद्रनद्यस्तथा शैलास्तत्र सन्ति सहस्रशः ॥
ताः पिबन्ति सदा हृष्टाः नदीर्जनपदास्तु ते । अपसर्पणं न तेषां वै न वैवोत्सर्पणं द्विज ॥
न त्वेवास्ति युगावस्था तेषु स्थानेषु सप्तसु । त्रेतायुगसमः कालः सर्वदैव महामुने ॥
प्लक्षद्वीपादिषु ब्रह्मन् शाकद्वीपान्तरेषु च । पञ्चवर्षसहस्राणि जना जीवन्त्यनामयाः ॥
धर्मः पञ्चस्वथैतेषु वर्णाश्रमविभागशः । वर्णास्तु तत्र चत्वारस्तान्निबोध महामुने ॥
आर्यकाः कुरकाश्चैव विदग्धा भाविनश्च ये । विप्रक्षत्रियवैश्यास्ते शूद्राश्च मुनिसत्तम ॥
जम्बूवृक्षप्रमाणस्तु तन्मध्ये सुमहांस्तरुः । प्लक्षस्तन्नामसंज्ञोऽयं प्लक्षद्वीपो द्विजोत्तम ॥
रज्यते तत्र भगवान् तैर्वर्णैरार्यकादिभिः । सोमरूपी जगत्स्रष्टा सर्वस्सर्वेश्वरो हरिः ॥
प्लक्षद्वीपप्रमाणेन प्लक्षद्वीपसमावृतः । तथैवेक्षुरसोदेन परिवेषानुकारिणा ॥
इत्येतत्तव मैत्रेय प्लक्षद्वीपमुदाहृतम् । संक्षेपेण मया भूयश्शाल्मलं मे निशामय ॥
शाल्मलस्येश्वरो वीरो वपुष्मांस्तत्सुतान् शृणु । एषां तु नामसंज्ञानि सप्तवर्षाणि तानि वै ॥
श्वेतोऽथ हरितश्चैव जीमूतो रोहितस्तथा । वैद्युतो मानसश्चैव सुप्रभाश्च महामुने ॥
शाल्मलेन समुद्रोऽसौ द्वीपेनेक्षुरसोदकः । विस्तारद्विगुणेनाथ सर्वतस्संवृतः स्थितः ॥
तत्रापि पर्वतास्सप्त विज्ञेया रत्नयोनयः । वर्षाभिव्यञ्जकास्ते तु तथा सप्तैव निम्नगाः ॥
कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः । द्रोणो यत्र महौषध्यस्स चतुर्थो महीधरः ॥
कङ्कस्तु पञ्चमष्षष्ठो महिषस्सप्तमस्तथा । ककुद्मान् पर्वतवरः सरिन्नामानि मे शृणु ॥

या निस्तोया वितृष्णा च वज्रा शुक्लावमोचनी ।
निवृत्तिस्सप्तमी तासां स्मृतास्ताः पापशान्तिदाः ॥

श्वेतं च लोहितं चैव जीमूतं हारितं तथा । वैद्युतं मानसं चैव सुप्रभं चातिशोभनम् ॥
सप्तैतानि तु वर्षाणि चातुर्वर्ण्ययुतानि वै । शाल्मले ये तु वर्णाश्च वसन्त्येते महामुने ॥
कपिलाश्चारुणाः पीताः कृष्णाश्चैव पृथक् पृथक् ।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चैव यजन्ति तम ॥
भगवन्तं समस्तस्य विष्णुमात्मानमव्ययम् । वायुभूतं मखश्रेष्ठैः यज्वानो यज्ञसंस्थितम् ॥
देवानामत्र सान्निध्यमतीव सुमनोरमे । शाल्मलश्च महावृक्षो नाम निर्वृतिकारकः ॥
एवं द्वीपस्समुद्रेण सुरोदेन समावृतः । विस्ताराच्छाल्मलस्यैव समेन तु समन्ततः ॥
सुरोदकः परिवृतः कुशद्वीपेन संवृतः । शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः ॥
ज्योतिष्मतः कुशद्वीपे सप्त पुत्रान् शृणुष्व तान् । उद्भिदो वेणुमांश्चैव स्वैरथो लंबनो धृतिः ॥
प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः । तस्यां वसन्ति मनुजैः सह दैतेयदानवाः ॥
तथैव देवगन्धर्वयक्षकिंपुरुषादयः । वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः ॥
दमिनश्शुष्मिगस्नेहान्मन्देहांश्च महामुने । ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः ॥
यथोक्तकर्मकर्तृत्वात्स्वाधिकारक्षयाय च । तत्र ते तु कुशद्वीपे ब्रह्मरूपं जनार्दनम् ॥
यजन्तः क्षपयन्त्युग्रमाधिकारफलप्रदम् । विद्रुमो हेमशैलश्च द्युतिमान्पुष्पवांस्तथा ॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः । वर्षाचलाश्च सप्तैते तत्र द्वीपे महामुने ॥
नद्यश्च सप्त तासां तु नामानीमान्यनुक्रमात् । धूतपापा शिवा चैव पवित्रा संमिता तथा ॥
विद्युदम्भा मही यान्या सर्वपापहरास्त्विमाः । अन्याः सहस्रशस्तत्र क्षुद्रा नद्यस्तथाचलाः ॥
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत्स्मृतम् । तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः ॥
घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः । क्रौञ्चद्वीपो महाभागः श्रूयतां चापरो महान् ॥
कुशद्वीपस्य विस्ताराद्द्विगुणो यस्य विस्तरः । क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः ॥
तन्नामानि वर्षाणि तेषां चक्रे महीपतिः । कुशलो मानुषश्चोष्णः पीवरोथान्धकारकः ॥
मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने । तत्रापि देवगन्धर्वसेवितास्सुमनोरमाः ॥
वर्षाचला महाबुद्धे तेषां नामानि मे शृणु । क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः ॥
चतुर्थो रत्नशैलश्च स्वभाभिर्भासयन्नभः । दिवावृत्पञ्चमश्चैव तथान्यः पुण्डरीकवान् ॥
दुन्दुभिश्च महाशैलो द्विगुणास्ते परस्परम् । द्वीपाद्द्वीपेषु ये शैला यथा द्वीपेषु ते तथा ॥
वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च । निवसन्ति निरातङ्काः सह देवगणैः प्रजाः ॥

पुष्कराः पुष्कला धन्यास्तिष्याख्याश्च महामुने।
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्राश्चानुक्रमोदिताः ॥

ते तत्र नद्यो मैत्रेय याः पिबन्ति शृणुष्व ताः। सप्त प्रधानाश्शतशस्तत्रान्याः क्षुद्रनिम्नगाः ॥

गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा।
ज्योतिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः ॥

अत्रापि वर्णैर्भगवान्पुष्कराद्यैर्जनार्दनः। यागै रुद्रस्वरूपस्थ इज्यते यज्ञसन्निधौ ॥
क्रौञ्चद्वीपस्समुद्रेण दधिमन्थोदकेन तु। आवृतस्सर्वतः क्रौञ्चो द्वीपतुल्येन मानतः ॥
दधिमन्थोदकश्चैव शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य विस्ताराद्द्विगुणेन महामुने ॥
शाकद्वीपेश्वरस्यापि हर्यश्वस्य महात्मनः। सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः ॥
जलदश्च कुमारश्च सुकुमारो मणीचकः। कुसुमत्तस्समीकश्च सप्तमश्च महाद्रुमः ॥
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्यनुक्रमात्। तत्रापि पर्वतास्सप्त वर्षविच्छेदकारिणः ॥
पूर्वस्तत्रोदयगिरिर्जलधारस्तथापरः। तथा रैवतकश्श्यामस्तथैवाम्भोगिरिर्द्विज ॥
अम्बिकेयस्तथा रम्यः केसरी पर्वतोत्तमः। शाकस्तत्र महावृक्षः सिद्धगन्धर्वसेवितः ॥
यत्पत्रवातसंस्पर्शादाह्लादो जायते परः। तत्र पुण्या जनपदाश्चातुर्वर्ण्यसमन्विताः ॥
नद्यश्चात्र महापुण्याः सप्त पापभयापहाः। सुकुमारी कुमारी च नलिनी वेणुका च या ॥
इक्षुश्च धेनुका चैव गभस्तिस्सप्तमी तथा। अन्यास्त्वयुतशस्तत्र क्षुद्रनद्यो महामुने ॥
महीधरास्तथा सन्ति शतशोथ सहस्रशः। ताः पिबन्ति मुदा युक्ता जलदादिषु ये स्थिताः ॥
वर्षेषु ते जनपदाः स्वर्गादभ्येत्य मेदिनीम्। धर्महानिर्न तेष्वस्ति न संघर्षः परस्परम् ॥
मर्यादाव्युत्क्रमो वापि तेषु देशेषु सप्तसु। मगाश्च मगधाश्चैव मानसा मन्दगास्तथा ॥
मगाः ब्राह्मणभूयिष्ठा मगधाः क्षत्रियास्तथा। वैश्यास्तु मानसास्तेषां शूद्रास्तेषां तु मन्दगाः ॥
शाकद्वीपेषु तैर्विष्णुः सूर्यरूपधरो मुने। याज्ञिकैरिज्यते सम्यक् कर्मभिर्नियतात्मभिः ॥
शाकद्वीपस्तु मैत्रेय क्षीरोदेन समन्ततः। शाकद्वीपप्रमाणेन वलयेनेव वेष्टितः ॥
क्षीराब्धिः सर्वतो ब्रह्मन् पुष्कराख्येन वेष्टितः। द्वीपेन शाकद्वीपात्तु द्विगुणेन समन्ततः ॥
पुष्करे सवनस्यापि महावीतोऽभवत्सुतः। धातकिश्च तयोस्तत्र द्वे वर्षे नामचिह्निते ॥
महावीतं तथा चान्यद्धातकीषण्डसंज्ञितम्। एकश्चात्र महाभाग प्रख्यातो वर्षपर्वतः ॥
मानसोत्तरसंज्ञो वै मध्यतो वलयाकृतिः। योजनानां सहस्राणि ऊर्ध्वं पञ्चाशदुच्छ्रितः ॥

तावदेव च विस्तीर्णः सर्वतः परिमण्डलः । पुष्करद्वीपवलयं मध्येन विभजन्निव ॥
स्थितोऽसौ तेन विच्छिन्नं जातं वर्षद्वयं मुने । वलयाकारमेकैकं तयोर्वर्षं तथा गिरिः ॥
दश वर्षसहस्राणि तत्र जीवन्ति मानवाः । निरामया विशोकाश्च रागद्वेषविवर्जिताः ॥
अधमोत्तमौ न तेष्वास्तां न वध्यवधकौ द्विज । नेर्ष्यासूयाभयं रोषो दोषो लोभादिकश्च ॥
महावीतं बहिर्वर्षं धातकीसंज्ञमन्ततः । मानसोत्तरशैलस्य देवदैत्यादिसेवितम् ॥
सत्यानृते न तत्रास्तां द्वीपे पुष्करसंज्ञिके । न तत्र नद्यश्शैला वा द्वीपे वर्षद्वयान्विते ॥
तुल्यवेषास्तु मनुजा देवैस्तत्रैकरूपिणः । वर्णाश्रमाचारहीनं धर्माधर्मविवर्जितम् ॥
त्रयीवार्तादण्डनीतिशुश्रूषारहितं च तत् । वर्षद्वयं तु मैत्रेय भौमस्स्वर्गोयमुत्तमः ॥
सर्वर्तुसुखदः कालो जरारोगविवर्जितः । पुष्करे धातकीषण्डे महावीते च वै मुने ॥
न्यग्रोधः पुष्करे द्वीपे ब्रह्मस्थानमनुत्तमम् । तस्मिन्निवसते ब्रह्मा पूज्यमानस्सुरासुरैः ॥
स्वादूदकेनोदधिना पुष्करः परिवेष्टितः । समेन पुष्करस्यैव विस्तारान्मण्डलात्तथा ॥
एवं द्वीपास्समुद्रैस्तु सप्त सप्तभिरावृताः । द्वीपाश्चैव समुद्राश्च समाना द्विगुणाः परे ॥
पयांसि सर्वदा सर्वसमुद्रेषु समानि वै । न्यूनातिरिक्तता तेषां कदाचिन्नैव जायते ॥
स्थालीस्थमग्निसंयोगादुद्रेकि सलिलं यथा । तथेन्दुवृद्धौ सलिलमम्भोधौ मुनिसत्तम ॥
अन्यूनानतिरिक्ताश्च वर्धन्त्यापो ह्रसन्ति च । उदयास्तमये त्विन्दोः पक्षयोश्शुक्लकृष्णयोः ॥
दशोत्तराणि पञ्चैव अंगुलानां शतानि वै । अपां वृद्धिक्षयौ दृष्टस्समुद्राणां महामुने ॥
भोजनं पुष्करद्वीपे तत्र स्वयमुपस्थितम् । षड्रसं भुञ्जते विप्र प्रजास्सर्वास्तथैव हि ॥
स्वादूदकस्य पुरतो दृश्यते लोकसंस्थितिः । द्विगुणाप्यम्मयी भूमिः सर्वजन्तुविवर्जिता ॥
लोकालोकस्ततश्शैलो योजनायुतविस्तृतः । उच्छ्रयेण च तावन्ति योजनान्यचलो हि सः ॥
ततस्तमस्समावृत्य तं शैलं सर्वतः स्थितम् । तमश्चाण्डकटाहेन समन्तात्परिवारितम् ॥
पञ्चाशत्कोटिविस्तारा सेयमुर्वी महामुने । सहैवाण्डकटाहेन सद्वीपाब्धिमहीधरा ॥

सेयं धात्री विधात्री च सर्वभूतगुणाधिका ।
आधारभूता सर्वेषां मैत्रेय जगतामिति ॥ इति ।

ज्योतिश्शास्त्रे तु भूगोलविस्तारः सिद्धान्तशिरोमणौ प्रश्नप्रतिप्रश्नरूपेणाभिहितः—

तथा च भूगोलविषये प्रश्नः—

भ्रमद्भचक्रचक्रान्तर्गगने गगनेचरैः। वृता धृता धरा केन येन नेयमियादधः ॥

किमाकारा कियन्माना नानाशास्त्रविचारणात्।
कीदृग्द्वीपकुलाद्रीन्द्रसमुद्रैर्मुद्रितोच्यताम् ॥ (सि. सि. गो श्लो. १–२)

अस्योत्तरम्—

भूमेः पिण्डशशांकज्ञकविरविकुजेज्यार्किनक्षत्रकक्ष्या-
वृत्तैर्वृतोवृतस्सन्मृदनिलसलिलव्योमतेजोमयोऽयम्।
नान्याधारस्स्वशक्त्या वियति च नियतं तिष्ठतीहास्यपृष्ठे
निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात् ॥

भूवृत्तविषये सम्मतिः। आर्यभटः—

वृत्तभपञ्जरमध्ये कक्ष्यापरिवेष्टितः खमापस्थः।
मृज्जलशिखिवायुमयो भूगोलः सर्वतोवृत्तः ॥ (आर्यभटी. गो. श्लो. ७)

नभस्ययस्कान्त महामणीनां मध्ये स्थितो लोहगुडो यथास्ते।
आधारशून्योऽपि तथैव सर्वाधारो धरित्र्याः स्थित एष गोलः ॥

सर्वतः पर्वतारामग्रामचैत्यचयैः श्रितः।
कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव ॥ (सि. सि. भूगो श्लो. ३)

पुराणेषु भूमेराधारपरम्परोक्ता, तान्निराकरोति—

मूर्तो धर्ता चेद्धरित्र्यास्तदन्यस्तस्याप्यन्योस्यैवमत्रानवस्था।
अन्ते कल्प्या चेत्स्वशक्तिः किमाद्ये किन्नो भूमेः साष्टमूर्तेश्च मूर्तिः ॥
(सि. सि. भूगो श्लो. ४)

यथोष्णतार्कानलयोश्च शीतता विधौ द्रुतिः के कठिनत्वमश्मनि।
मरुच्चलो भूरचला स्वभावतो यतो विचित्रा बत वस्तुशक्तयः ॥ (श्लो. ५)

प्रत्यक्षतया समा दृश्यते तद्दोषं निराकुर्वन्नाह—

समो यतः स्यात्परिधेः शतांशः पृथ्वी च पृथ्वी नितरां तनीयान्।
नरश्च तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतस्सा ॥
(सि. सि. भूगो श्लो. १३)

इदानीं भूगोले पुरां निवेशमाह —

लङ्का कुमध्ये यवकोटिरस्याः प्राक् पश्चिमे रोमकपट्टणं च ।
अतस्ततस्सिद्धपुरं सुमेरुः सौम्योथ याम्ये बडवानलश्च ॥

कुवृत्तपादान्तरितानि तानि स्थानानि षट्कोणविदो वदन्ति ।
वसन्ति मेरौ सुरसिद्धसङ्घाः और्वे च सर्वे नरकास्सदैत्याः ॥

यो यत्र तिष्ठत्यवनीतलस्थमात्मानमस्या उपरिस्थितं च ।
स मन्यतेतः कुचतुर्थसंस्था मिथश्च ते तिर्यगिवामनन्ति ॥

अधःशिरस्काः कुदलान्तरस्थाः छायामनुष्या इव नीरतीरे ।
अनाकुलास्तिर्यगधःस्थिताश्च तिष्ठन्ति ते तत्र वयं यथात्र ॥

इदानीं द्वीपानां समुद्राणां च संस्थानमाह —

भूमेरर्धं क्षारसिन्धोरधस्थं जम्बूद्वीपं प्राहुराचार्यवर्याः ।
अर्धेन्यस्मिन्द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः ॥
(सि. सि. भूगो श्लो. २१)

लवणजलधिरादौ दुग्धसिन्धुश्च तस्मात् अमृतममृतराशिश्श्रीश्च यस्माद्बभूव ।
महितचरणपद्मः पद्मजन्मादिदेवैः वसति सकलवासो वासुदेवश्च यत्र ॥

दध्नो घृतस्येक्षुरसस्य तस्मान्मद्यस्य च स्वादुजलस्य चान्त्यः ।
स्वादूदकान्तर्बडवानलोऽसौ पातालल्लोकाः पृथिवीपुटानि ॥ (श्लो. २३)

चञ्चत्फणामणिगणांशुकृतप्रकाशा एतेषु सासुरगणाः फणिनो वसन्ति ।
दीव्यन्ति .... दिव्यरमणीयदेहैः सिद्धाश्च तत्र च लसत्कनकावभासैः ॥

शाकं ततः शाल्मलमत्र कौशं क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति ॥

इदानीं जम्बूद्वीपमध्ये गिरिसन्निवेशवशेन नवखण्डान्याह —

लङ्कादेशाद्धिमगिरिरुदग्धेमकूटोऽथ तस्मात्तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदीर्घाः ।
एवं सिद्धादुदगपि च पुराच्छृङ्गवच्छुक्लनीलाः वर्षाण्येषां जगुरिह बुधा अन्तरद्रोणिदेशान् ॥

भारतवर्षमिदं ह्युदगस्मात् किन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्मात् हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यवकोटिपत्तनात् रोमकश्च किल गन्धमादनः ॥
नीलशैलनिषधावधी च तावन्तरालमनयोरिलावृतम् ।
माल्यवज्जलधिमध्यवर्तियत्तत्तु भद्रतुरगं जगुर्बुधाः ॥
गन्धशैलजलराशिमध्यगं केतुमालकमिलाकलाविदः ।
निषधनीलसुगन्धकमाल्यकैरलमिलावृतमावृतमाबभौ ॥
अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम् ।
इह हि मेरुगिरिः किल मध्यगः कनकरत्नमयस्त्रिदशालयः ॥
द्रुहिणजन्म कुपद्म च कर्णिकेति च पुराणविदोमुमवर्णयन् ॥
विष्कम्भशैलाः किल मन्दरोऽस्य सुगन्धिशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात्सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बूफलामलगलद्रसतः प्रवृत्तजम्बूनदीरसयुतं मृदुशुक्लवर्णम् ।
जंबूनदं हि तदतः सुरसिद्धसंधाः शश्वत्पिबन्त्यमृतपानपराङ्मुखास्तम् ॥
वनं तथा चैत्ररथं विचित्रं तेष्वक्षरो नन्दननन्दनं च ।
धृत्याह्वयं यद्रतिकृत्सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् ॥
सरांस्यथैतेष्वरुणं च मानसं महाह्रदं श्वेतजलं यथाक्रमात् ।
सरस्सुरामारमणश्रमालसाः सुरा रमन्ते जलकेलिलालसाः ॥
सद्रत्नकाञ्चनमयं शिखरत्रयं च मेरौ मुरारिक पुरारि पुराणि तेषु ।
तेषामधःशतमखज्वलनान्तकाख्यरक्षोंबुपानिलशशीशपुराणि चाष्टौ ॥
विष्णुपदी विष्णुपदात्पतिता मेरौ चतुर्धास्मात् । विष्कम्भाचलमस्तकशस्तसरस्संगता वियतः ॥
शीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम् ।
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून् याता ॥
याकर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ।
उक्ता स्मृता स्तुता वा पुनाति बहुधापि पापिनः पुरुषान् ॥
यां चलिते दलिताखिलबन्धो गच्छति वल्गति तत्पितृसंघः ।
प्राप्ततटे विजितान्तकदूतः स्नाति नरो निरयात्सुरलोकम् ॥

प्रकारान्तरेण लक्षणमाह । तत्र वाक्यार्थपदार्थाभिनयात्मकं आंगिकाभिनयमात्रोपेतं गात्रचलनं नाट्यम् । आंगिक, वाचिकाहार्य सात्विक, चतुष्टयात्मकं गात्रचलनं नृत्यम् । गात्रचलनमात्रं नृत्तम् । तत्रैकैकं द्विविधं लास्यताण्डवभेदात् । तत्र कोमलकरणाङ्गविक्षेपकैशिकवृत्तिप्रधानं मकरध्वजवर्धनं स्त्रीकर्तृकं गात्रचलनं लास्यम् । उद्धतकरणाङ्गविक्षेपारभटीवृत्तिप्रधानं ताण्डवम् । आंगिकः अंगैर्विनिर्मितो व्यापारविशेषः । नायकादिगततत्तद्व्यापारसूचकशब्दविशेषो वाचिकः । अनुकार्यतत्नायकादिगतहारकेयूरकिरीटालङ्कारादिभूषणमाहार्यः । सात्विकैरन्तःकरणव्यापारविशेषैर्विरचितः सात्विकः । तदुक्तं **संगीतरत्नाकरे**-

नाट्यं, नृत्यं, तथा नृत्तं त्रेधा तु परिकीर्तितम् । चतुर्धाभिनयोपेतं लक्षणावृत्तितो बुधैः ॥
नाटकस्थितवाक्यार्थपदार्थाभिनयात्मकम् । नाट्यं तन्नाटकेष्वेव प्रयुक्तं तद्गतार्थवत् ॥
विहाय त्रीनभिनयानाँगिकोत्र विधीयते । आंगिको वाचिकस्तद्वत् आहार्यः सात्विकोऽपरः ॥
चतुर्धाभिनयस्तत्र ह्यांगिकोंगैर्विनिर्मितः । वाचा विरचितः काव्यनाटकादिषु वाचकः ॥
आहार्यो हारकेयूरकिरीटादिविभूषणम् । सात्विकः सात्विकैर्भावैर्भावुकेन विभावितः ॥
लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धनम् । तद्रिक्तमुद्धतं प्रायः प्रयोगं ताण्डवं विदुः ॥ इति ।

नर्तनारंभवेलायां पात्राणां प्रवेशे विशेषमाह **नन्दिकेश्वरः**—

नायकाभिमुखं पात्रं प्रविशेद्रङ्गमन्दिरम् । प्रवेशे दक्षिणे भागे मार्दलीकः प्रतिष्ठितः ॥
वामपार्श्वे मार्दलीकः वंशशंखे तु दक्षिणे । तद्दक्षिणे करटिका तत्पृष्ठे गायकाः स्मृताः ॥
गायकानां ततः पश्चात्काहलीक्रमतालकः ॥ इति ।

एतादृशनृत्तस्य फलमुक्तं **नन्दिकेश्वरेण**—

द्रष्टव्ये नाट्यनृत्ये ते सर्वकाले विशेषतः । नृत्तं खलु नरेन्द्राणामभिषेके महोत्सवे ॥
श्रुतार्थिभिः प्रयोक्तव्यं माङ्गल्यं सर्वकर्मसु ॥ इति ।

क्वचिदुन्नदद्भिरित्यनेन शारीरं गानं सूचितम् । तच्च गानं नादोत्पत्तिक्रमेणोत्पद्यते । प्रथमं विवक्षमाणेनात्मना प्रेरितं मनः जाठरं वह्निमाहन्ति, स च वायुं प्रेरयति । स च वायुर्मूलाधारे स्थितः क्रमादूर्ध्वस्थाने संचरन् नाभिहृदयकण्ठमूर्धास्यरूपेषु स्थानेषु ध्वनिमाविर्भावयति । स एव ध्वनिर्नाद इत्युच्यते । स चातिसूक्ष्म, सूक्ष्म पुष्टापुष्ट, कृत्रिमभेदेन क्रमान्नाभ्यादिस्थानेषु स्थितः पञ्च संज्ञा धत्ते । एवं व्यवहारकाले नादस्त्रिविधः । मन्द्रो मध्यस्तारश्चेति । हृदि मन्द्रः, मध्यः कण्ठे, मूर्ध्नि तारः, । स च पूर्वपूर्वध्वन्यपेक्षया उत्तरोत्तरो द्विगुणध्वनिः । तदुक्तं **भरतशास्त्रे**—

कोटिघ्नैर्नखनन्दषट्कनखभूभूभृद्भुजङ्गेन्दुभि-
ज्योतिश्शास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः ।
तद्ब्रह्माण्डकटाहसंपुटतटे केचिज्जगुर्वेष्टनं
केचित्प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः सूरयः ॥
करतलकलितामलकवदमलं सकलं वदन्ति ये गोलम् ।
दिनकरनिकरनिहततमसो नभसः परिधिरुदितस्तैः ॥'

भूगोलज्ञाने फलमाह– सूर्यसिद्धान्ते —

'ग्रहनक्षत्रचरितं ज्ञात्वा गोलं च तत्वतः । ग्रहलोकमवाप्नोति पर्यायेणात्मवान्नरः ॥'

तत्रैव — 'इत्येतदखिलं प्रोक्तं देवानामपि दुर्लभम् ।
विदित्वैतदशेषेण परं ब्रह्माधिगछति ॥' इति ।

भीष्मपर्वण्यपि —

'श्रुत्वेदं भरत श्रेष्टं भूमिपर्व मनोनुगम् । श्रीमान्भवति राजन्यः सिद्धार्थः साधुसम्मतः ॥
आयुर्बलं च कीर्तिश्च तस्य तेजश्च वर्धते । यश्शृणोति महीपाल पर्वणीदं यतव्रतः ॥
प्रीयन्ते पितरस्तस्य तथैव च पितामहाः' इति ॥

इत्थं रामः शत्रुविजयप्रदभूगोलश्रवणमिव मधुमांसवर्जनरूपं तपश्चरणमपि सीता-वियोगजनितदुःखव्याजेन कृतवानिति प्रतिपादितं **सुन्दरकाण्डे —**

न मांसं राघवो भुङ्क्ते न चापि मधु सेवते । वन्यं सुविहितं नित्यं भक्तमश्नाति पञ्चमम् ॥
नैव दंशान्न मशकान्न कीटान्न सरीसृपान् । राघवोपनयेद्गात्रात्त्वद्गतेनान्तरात्मना' इति ॥

तस्माच्छत्रुवधे सामर्थ्यसम्पादनाय विजयप्रदभूगोलश्रवणाय विशिष्य संकीर्तनमुपपन्नमेव ।

सप्तचत्वारिंशाष्टचत्वारिंशयोः — ततो विनतशतबलिसुषेणप्रमुखाः प्राच्यादिदिक्षु यथाराजसन्देशं अन्विष्य तत्र तत्र सीतां अपरिज्ञाततद्वृत्तान्ताः संकेतितसमयानतिक्रमेण सुग्रीवनिकटमागत्य न दृष्टा जानकीत्यवोचन् । दक्षिणाशाभिमुखास्त्वंगदप्रमुखा गिरिकन्दरवननदीपुलिनानि सर्वतो विचित्य अलब्धमनोरथाः परिश्रान्ताः क्वचिद्वृक्षमूले निषेदुः ॥

एकोनपञ्चाशपञ्चाशयोः —

ततो विषण्णमानसान्वानरांस्तांस्तारकेयस्तत्कालोचितमित्थमाचचक्षे —

अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयम् ।
कार्यसिद्धिकराण्याहुस्तस्मादेतद्ब्रवीम्यहम् ॥

अनेनानिर्वेदादयः कार्यसिद्धिकरा इत्युक्तम् । तथा **चोद्योगे** विदुरः —

अनिर्वेदः श्रियो मूलं धर्मस्य च सुखस्य च । महान्भवत्यनिर्विण्णो भयं न महदृच्छति ॥
नातश्श्रीमत्तरं किंचिद्दृष्टं पथ्यतमं तथा । इति ।

सुग्रीवः कोपनो राजा तीक्ष्णदण्डश्च वानरः ।
भेतव्यं तस्य सततं रामस्य च महात्मनः ॥

अनेन तीक्ष्णदण्डात्प्रभोः सर्वे बिभ्यतीति सूचितम् । तथाच **कामन्दकः** —

प्रतापयुक्तात्त्रस्यन्ति परे सिंहान्मृगा इव, इति ।

प्राचीना अपि 'सर्वे चण्डस्य बिभ्यतीति'। अतोऽस्माभिरविगणय्य क्षुत्पिपासादिपरिश्रमं भूयोपि विचेतव्या दरीकन्दरवनेषु सीतेति विचिन्त्य पुनः पुनर्नदीगिरिकन्दरान्विचिन्वन्तः अधिरुह्य रजतगिरिं तत्र सप्तपर्णलोध्रवनानि दरीश्चावलोक्य अलब्धमनोरथाः विंध्यभूधरोपत्यकायां क्वचित्क्षुत्पिपासापरिश्रान्ताः भूविवरनिर्गतैः सलिलक्लिन्नपक्षैः सारसचक्रवाकक्रौञ्चगणैरनुमितजलाशयाः परस्परपरिगृहीतबाहवः गाढान्धकारसमावृतं तद्बिलं प्रविश्य भृशं परितप्यमानाः कथमपि योजनमात्रमतिक्रम्य तत्रत्यविचित्रतरजांबूनदमयगोपुरप्राकारसौधजालसमलंकृतां सौवर्णवनगिरिमृगविहगोपशोभितां पुरीमदूरतः चीरकृष्णाजिनधरां नियताहारां काञ्चित्तापसीं चाभिवीक्ष्य विस्मयाविष्टमानसाः तामेव तापसीमुपतस्थुः ॥

एकपञ्चाशे —

ततश्च प्रणामपूर्वकं कस्येयं सौवर्णमृगनगविहगोपशोभिता पुरी? त्वं वा कस्य? कासीति हनुमता पृष्टा तापसी तपश्चर्याप्रसादितपितामहवरलब्धौशनसधनो मयाभिधो दानवो गीर्वाणविस्मयास्पदं हर्म्यप्रासादपरिष्कृतामिमां पुरीं निर्माय सुखमत्रैव भोगान् भुञ्जानः कदाचन हेमाभिधस्वर्वेश्यासक्तिकुपितेन पुरन्दरेण अशनिनिहतो बभूव । ततो हेमायै ब्रह्मदत्तां तया च सख्या मद्वशे स्थापितां इमां पुरीं तथैव लब्धवरा मेरुसावर्णिदुहिता स्वयंप्रभाभिधाहं तदाज्ञया रक्षामि । भवतामप्यत्र किं कार्यं? किमर्थश्चैतद्बिलप्रवेशः? तदखिलमपि ज्ञातुमिच्छामि —

इमान्यभ्यवहाराणि मूलानि च फलानि च ।
भुक्त्वा पीत्वा च पानीयं सर्वं मे वक्तुमर्हथ ॥

अनेन समागतमतिथिमन्नपानादिभिरभिपूज्य परिहृतश्रममेव वृत्तान्तं पृच्छेदिति सूचितम् । अत एव **मोक्षधर्मे** उञ्छवृत्त्युपाख्याने—

कदाचिदतिथिः प्राप्तो ब्राह्मणस्सुसमाहितः । स तस्मै सत्क्रियां चक्रे क्रियायुक्तेन हेतुना ॥
विश्रान्तं सुसमासीनमिदं वचनमब्रवीत् । इति ।

पराशरोपि भोजनानन्तरमेव प्रश्नमुक्तवान्—

अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना । तथासनप्रदानेन पादप्रक्षालनेन च ॥
श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च । गच्छतश्चानुयातेन प्रीतिमुत्पादयेद्गृही । इति ।
इत्यभिधाय संपूज्य चान्नपानादिभिः—

अथ तानब्रवीत्सर्वान्विश्रान्तान्हरियूथपान् ।
वानरा यदि वः खेदः प्रणष्टः फलभक्षणात् ॥

यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि कथ्यताम्, इति ।

अनेन पररहस्यं निर्बन्धेन न पृच्छेदिति सूचितम् । तथा**चोत्तरकाण्डे** अगस्त्यं प्रति रामः—

केन वा कारणेनैष रावणादतिरिच्यते । शक्यं यदि मया श्रोतुं न खल्वाज्ञापयामि वः ॥
यदि गुह्यं न चेद्वक्तुं श्रोतुमिच्छामि कथ्यताम्, इति ॥

द्विपञ्चाशत्रिपञ्चाशयोः—

ततस्तत्कृतसपर्यया परिहृतश्रमेषु वानरेषु हनूमता स्वागमनवृत्तान्तमखिलमपि यथावदावेद्य शरणागतानस्माननभिज्ञातनिर्गमनोपायान्पाहीति प्रार्थितया स्वयंप्रभया तत्प्रदेशात्समुत्तारितविन्ध्यदेशपर्यन्तमागता वानराः प्रफुल्लतरवासन्तिकलतादिभिस्संप्राप्तान् वासन्तिकवासरानभिज्ञाय पराजितसंकेतितकालोऽस्माकमतिक्रान्त इति भीताः—

अदृष्टायां च वैदेह्यां दृष्ट्वास्मांश्च समागतान् ।
राघवप्रियकामाय घातयिष्यत्यसंशयम् ॥

अनेन राजाज्ञप्तकार्यमकृत्वा तत्पार्श्वगमनमनुचितमिति सूचितम् । तथा च **कालिदासः**—

भवानपीदं परवानवैति महान्हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्नहि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ इति ।

न क्षमं त्वपराद्धानां गमनं स्वामिपार्श्वतः ।

अनेन राजशासनभंगकर्तुर्दण्ड इति सूचितम् । तथाच **राजधर्मे**—

'हन्तव्या एव ते राजन्राजशासनदूषकाः' इति ।

तस्मिन्नतीते काले तु सुग्रीवेण कृते स्वयम् ।
अप्रवृत्तौ च सीतायाः पापमेव करिष्यति ॥

अत्रापराधिनामकृतकार्यत्वं दोष इत्युक्त्या कृतकार्याणामपराधो न दोष इति सूचितम् । तथाच **सुन्दरकाण्डे** दधिमुखं प्रति सुग्रीवः—

प्रीतोऽस्मि सौम्य यद्भुक्तं वानरैः कृतकर्मभिः ।
मर्षितं मर्षणीयं च चेष्टितं कृतकर्मणाम् ॥ इति ।

इहैव सीतामन्विष्य प्रवृत्तिमुपलभ्य वा ।
नो चेद्गच्छाम तं वीरं गमिष्यामो यमक्षयम् ॥

इत्यवोचत् । तदनु—

प्लवङ्गमानां तु भयार्दितानां श्रुत्वा वचस्तार इदं बभाषे ।
अलं विषादेन बिलं प्रविश्य वसाम सर्वे यदि रोचते वः ॥

इदं हि मायाविहितं सुदुर्गमं प्रभूतवृक्षोदकभोज्यपेयम् ।
इहास्ति नो नैव भयं पुरन्दरात् न राघवाद्वानरराजतोऽपि वा ॥

श्रुत्वाङ्गदस्यापि वचोनुकूलं ऊचुश्च सर्वे हरयः प्रतीताः ।
यथा न हन्येम तथा विधानं असक्तमद्यैव विधीयतान्नः ॥' इति ।

चतुःपञ्चाशे—

तथा ब्रुवति तारे तु ताराधिपतिवर्चसि ।
अथ मेने हृतं राज्यं हनुमानङ्गदेन तत् ॥

बुध्या ह्यष्टाङ्गया युक्तं चतुर्बलसमन्वितम् ।
चतुर्दशगुणं मेने हनुमान्वालिनस्सुतम् ॥

अत्राष्टाङ्गबुध्या उपेत इत्युक्तं । बुध्यङ्गानि च श्रवणार्हस्य श्रोतुमिच्छा, अनन्तरं तच्छ्रवणं, ततस्तदर्थग्रहणं, गृहीतस्यार्थस्याविस्मरणं, अविस्मृतस्य चार्थस्य विविधसाध्यसाधनस्वरूपविज्ञानं, ज्ञातस्य चोपपत्तिभिर्विचारः, अनुपपन्नस्य त्यागः, ततो वस्तुस्वभावनिर्णयः इत्यष्टौ । त दक्तं **कौटिल्येन**— 'शुश्रूषा श्रवण ग्रहण धारण ऊहापोह तत्वाभिनिवेशाः प्रज्ञागुणा' इति ।

कामन्दकेऽपि —

'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः' ॥ इति ।

अत्रार्थक्रमाद्धारणानन्तरमेव वक्तव्यमप्यर्थविज्ञानं श्लोकसौकर्यायोहापोहानन्तरं पठितम् । अथवा बुध्या अष्टाङ्गया सेनया च युक्तमित्यर्थः । सेनाङ्गानि च, गजाः, अश्वाः, शतघ्न्यः, प्राकारः, खड्गाद्यायुधानि, रथाः, पदातयो, धनानीति । तदुक्तं **नीतिशास्त्रे —**

हस्त्यश्वयन्त्रावरणायुधानि रथाः पदातिर्द्रविणं तथापि ।
एतानि सम्यक् समवाप्य राजा शक्तस्समस्तां पृथिवीं विजेतुम् ॥ इति ।

चतुर्बलसमन्वितम् — मौलश्रेण्याटविकभृत्यरूपम् । अथवा, बाहुबल, मनोबल, उपायबल, बन्धुबलानि । अथवा राज्ञामावश्यकेषु बाहुबलामात्यबल, धनबल, पितृपैतामहप्रसिद्धिबल, प्रज्ञाबलात्मकेषु पञ्चसु चतुर्विधबलोपेतमिति वा । पञ्चबलानि च **विदुरप्रजाकरे —**

बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे । यत्तद्बाहुबलं नाम प्रथमं बलमुच्यते ॥
अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते । धनलाभात्तृतीयं तु बलमाहुर्जिगीषवः ॥
यत्तस्य सहजं राजन्पितृपैतामहं बलम् । अभिजातं बलं नाम चतुर्थं बलमुच्यते ॥
येन त्वेतानि सर्वाणि संगृहीतानि भारत । यद्बलानां बलं श्रेष्ठं प्रज्ञानं बलमुच्यते' ॥ इति ।

चतुर्दश गुणाश्च —

देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानता दाक्ष्यं ऊर्जस्संवृतमन्त्रता ॥
अविसंवादिता शौर्यं शक्तिज्ञत्वं कृतज्ञता । शरणागतवात्सल्यममर्षित्वमचापलम् ॥' इति ।

आपूर्यमाणं शश्वच्च तेजोबलपराक्रमैः ।

शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥

बृहस्पतिसमं बुध्या विक्रमैस्सदृशं पितुः ।
शुश्रूषमाणं तारस्य शुक्रस्येव पुरन्दरम् ॥

भर्तुरर्थे परिश्रान्तं सर्वशास्त्रविशारदम् ।
अभिसन्धातुमारेभे हनुमानङ्गदं ततः ॥

स चतुर्णामुपायानां तृतीयमुपवर्णयन् ।
भेदयामास तान्सर्वान्वानरान्वाक्यसम्पदा ॥

अत्र सामदानभेददण्डाश्चत्वार उपायाः । तेषु तृतीयेन भेदाभिधेनोपायेन हनुमान्वानरान्भेदयामासेत्युक्तम् । चत्वारश्चोपायाः प्रसिद्धा **अमरकोशे —**

'सामदाने भेददण्डावित्युपायचतुष्टयमिति' ।

कामन्दके तु सप्तोपाया उक्ताः —

'साम दानं च भेदश्च दण्डश्चेति चतुष्टयम् ।
मायोपेक्षेन्द्रजालं च सप्तोपायाः प्रकीर्तिताः' इति ।

'परानुद्वेगकारिणी वाक्सामेत्युच्यते बुधैः ।'

तथाच **कामन्दके —**

वागनुद्वेगजननी सामेति परिकीर्तिता ।' इति ।

तच्च साम परस्परोपकारकीर्तन, गुणकीर्तन, संबन्धकथनायतिप्रकाशन, स्वकीयत्व-प्रतिपादनभेदेन पञ्चविधम् । तथाच **कामन्दकः —**

'परस्परोपकाराणां कीर्तनं गुणकर्मणाम् । संबन्धस्य समाख्यानमायत्याः संप्रकाशनम् ॥
वाचा पेशलया साधु तवाहमितिचार्पणम् ।
इति सामप्रयोगज्ञैः साम पञ्चविधं स्मृतम् ॥' इति ।

इदं च सामावश्यं प्रयोक्तव्यं, अप्रयोगे अनिष्टप्रसंगात् प्रयोगेऽभ्युदयाच्च । तथाच **कामन्दकः —**

प्रविशन्निव चेतांसि नृणां साधु पिबन्निव । स्रवन्निवामृतं सोम आयुञ्जीत प्रियं वचः ॥
निजघ्निरे धार्तराष्ट्राः सामप्रद्वेषिणोचिरात् ।
क्षीरोदो मथितस्साम्ना फलायामरदानवैः ॥ इति ।

अलस परिश्रान्त व्याधिष्ठ भीत मूर्ख स्त्री बाल धार्मिक दुर्जन मैत्रीप्रधान कल्याणबुद्धयः सान्त्वनीयाः। तथा च **कामन्दकः** —

अलसं विक्रमश्रान्तं विहितोपायचेष्टितम्। क्षुतव्याधाप्रसारैस्तु सन्तप्तं परिविद्रुतम्॥

भीतं मूर्खं स्त्रियं बालं धार्मिकं दुर्जनं पशुम्।
मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन सन्नयेत्॥ इति।

